CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

भा.शा.
of The First
of Nepali &
Sanskritists
1978
आ. 25

Proceedings
Of
e First Symposium Of
i and German Sanskritists
1978

10513

Institute of Sanskrit Studies, Tribhuvan University, Dang
Nepal Research Centre, Kathmandu

1980

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Proceedings Of The First Symposium Of Nepali and German Sanskritists 1978

इ.भू.आ.आ. ४८

Institute of Sanskrit Studies, Tribhuvan University, Dang
Nepal Research Centre, Kathmandu
1980

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपाल एक हिन्दू अधिराज्य हो र हिन्दूधर्ममूलक आदर्शलाई सँगाली विश्वलाई आध्यात्मिक चेतना दिनुपर्ने कुरामा हामी विश्वस्त छौं।

–श्री ५ महाराजाधिराज वीरेन्द्रवीरविक्रम शाहदेव
वि. सं. २०३१ चैत्र १५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आंशिक आरक्षित

वाल्मीकि विद्यापीठ (क्याम्पस)
पुस्तकालय

१०५१३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वक्तव्यम्

जगति भाष्यमाणाः प्रायः सर्वा अपि भाषास्तत्तद्देशविशेषस्य प्रान्तविशेषस्य च प्रातिनिध्यं कुर्वत्यो दृश्यन्ते । सुरभारती तु नास्त्येतादृशी । नेयं कस्यापि देशविशेषस्य नाम्ना संजिता । अस्याः कृते तु स्वदेशो भुवनत्रयम् ।

संस्कृतभारती खलु सर्वासु भाषासु ज्येष्ठा पावनी संस्कृता च यावदियं प्रोत्साहिता न भवति न तावदेतन्मूला अन्या भाषाः समृद्धिपदं लभन्ते । अधुनातने समये समुन्नतिपथे प्रसरन्तीनां कासाञ्चन भगिनीस्थानीयानां किं वा पुत्रीस्थानीयानां च भाषान्तराणां कृते च ज्यायस्या अस्याः साहाय्यं नितरामपेक्षितं वर्तते ।

विश्वस्मिन् विश्वेऽस्मिन् प्रायः सर्वेऽपि देशा देवगिरमेनां समाद्रियन्ते । तेषु चैकतमः शर्मण्यदेशोऽत्रेत्यत्र नास्ति कोऽपि शङ्कापङ्कलेशः ।

२०३५ वैक्रमाब्दे नैपालकानां शर्मण्याभिजनानां च संस्कृतविदुषामेकं सम्मेलनं त्रिभुवनविश्वविद्यालयान्तर्गतेन संस्कृतसंस्थानेनानेन समायोजितम् । सम्मेलनस्यास्य क्षेत्रेऽस्मिन्नैतिहासिकं महत्त्वं वर्तते । नेपालदेशस्यात्रत्यानां संस्कृतानुरागिणां चान्येषां संस्कृतवाङ्मयोपरि कीदृशी वर्तत आस्थेत्यस्यापि सम्मेलनमिदं सुन्दरमेकमुदाहरणम् । अस्मिन्नवसरे शर्मण्यदेशीयैर्विद्वद्भिर्यादृशी सक्रियता यादृशी च संस्कृतसेवापरायणता प्रकटिता नूनं सा गौरवास्पदा । शर्मण्यदेशीयैः संस्कृतानुरागिभिः संस्कृतस्य सर्वाङ्गीण-समुन्नत्यै विहितः प्रयासो नास्ति तिरोहितः केषामपि ।

अत्र समायोजिते सम्मेलन उभाभ्यां पक्षाभ्यामष्टौ कार्यपत्राणि प्रस्तुतानि । अधोऽङ्किताः प्रस्तावाश्च पारिताः—

१. नेपालदेशस्य संस्कृतौ परम्परायां च संस्कृतवाङ्मयस्य महत्त्वपूर्णं स्थानं वरीवर्ति । अतः स्वसंस्कृतेः स्वपरम्परायाश्च संरक्षणाय संस्कृतशिक्षाया राष्ट्रव्यापि प्रसारण-मावश्यकम् ।

उपर्युक्तोद्देश्यप्राप्त्यर्थं साधारणशिक्षाक्षेत्रेऽपि चतुर्थकक्षातः स्नातककक्षापर्यन्तं संस्कृतमनिवार्यतया निर्धारणीयम्, कर्मकाण्डस्य ज्यौतिषस्य सत्यावश्यके विषयान्तराणां च प्राविधिकी शिक्षा च दातव्या ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपालस्य परम्परागतसंस्कृतशिक्षणस्यानुसन्धानपद्धते: शर्मण्यदेशस्याधुनातनसंस्कृत-शिक्षणस्यानुसन्धानपद्धतेश्च परस्परं विनिमय आवश्यक: । कार्यमिदमधोऽङ्कितानुसारं प्रारब्धव्यमिति पक्षयोरुभयो: सम्मति: । यथा–

(क) उभयो: पक्षयोर्विदुषां छात्राणां ग्रन्थानां चाऽऽदानप्रदानाभ्याम् ।

(ख) उभयोर्देशयोर्विश्वविद्यालयेषु चाऽऽगन्तुकप्राध्यापकपदं संस्थाप्यैतद्द्वारा परम्परागताधुनातनयो: शिक्षणानुसन्धानपद्धत्योर्विनिमयेन ।

(ग) छात्राणां चोभयपक्षीयाणां परस्परं विनिमयेन ।

२. विनिमयकार्यक्रमे प्रारब्धे नेपालकजर्मनविदुषां संयुक्तकार्यक्रमश्च संचालनीय: । अस्य च कार्यक्षेत्रमधोऽङ्कितं भविष्यति–

(क) मूर्तिनिर्माणविषयसंस्कृतग्रन्थसम्पादनम्

(ख) स्वयम्भूपुराणस्य तत्सदृशानामन्येषां च ग्रन्थानां सम्पादनम् ।

वैदिकविधानानां शास्त्रीयमधुना प्रचलितं च प्रयोगविधिमनुसृत्य तुलनात्मकमध्ययनम् ।

ज्यौतिषग्रन्थानामध्ययनम् ।

तान्त्रिकग्रन्थानां तेषां विधिप्रयोगाणां च ध्ययनम् ।

संस्कृते निबद्धानां संस्कृतोपयोगिनामन्येषां जर्मनग्रन्थानां पत्रपत्रिकादीनां नेपाले, नैपालकानां च शर्मण्यदेशे विनिमयकार्यक्रमसंचालनायोभयोर्देशयो: सम्बद्धाधिकारिण: प्रार्थनीया: ।

एतत् तु प्राथमिकं सम्मेलनम् । आशास्महे नैपालकानां शर्मण्यदेशविदुषां च संस्कृत-समुन्नत्यै विधीयमान: प्रयासोऽत्राऽप्यधिकेनोत्साहेन सम्पत्स्यतेति ।

वयं नैपालका: संस्कृतवाङ्मयस्य समुन्नत्यै कृतप्रतिज्ञा: स्म: । न केवलं नेपालेऽपितु विश्वस्मिन्नपि विश्वे यत्र कुत्रापि संस्कृतगिर: संवर्द्धनाय संरक्षणाय च विधीयमाने प्रयासेऽस्माकं हार्दिकी शुभाशंसा वर्त्तनीति वो भविष्यतीति चेति शम् ।

भावत्क:

तोयनाथपाण्डेय:

अध्यक्ष: (डीन)

संस्कृताध्ययनसंस्थानस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

PREFACE

The present volume is the concrete result of the close cooperation between Nepali Sanskrit scholars and their West German colleagues. This very first 'Symposium of Nepali and West German Sanskrit Scholars' of which the proceedings and papers read are presented herein, was held from Oct. 17th–22nd, 1978 as a joint venture betweeen the Institute of Sanskrit, Tribhuvan University, and the Nepal Research Centre, Kathmandu. Its chief aim was to create a platform by means of which the Nepali and West German Sanskritists could exchange information and ideas on certain problem areas in their respective fields. As the contributions in this volume indicate, I believe it succeeded remarkably well in reaching this goal. It is therefore our sincere hope that future cooperation between scholars of Nepal and the Federal Republic of Germany will become even closer, so as to establish a working relationship which can only further the aims of Sanskrit studies in general.

Last but not least, it is my pleasure to express my heartfelt gratitude to all those involved in the planning and execution of this Symposium. Without their efforts, this Symposium would not have been the undeniable success it was. We are also grateful to the Ministry for External Affairs in Bonn for their financial support in the publication of this volume.

WOLFGANG VOIGT

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

TABLE OF CONTENTS

		Page
Events		1--45
Opening Ceremony		1--18
Second Day		18--24
Third Day		24--30
Fourth Day		30--31
Fifth Day		31--32
Sixth Day		33--45
Papers		1--172
१. नेपालराष्ट्रे संस्कृताध्ययनस्य स्थितिः	–तोयनाथपाण्डेयः, गोपालनिधितिवारी, देवराजपौडेलः	१–१४
2. Sanskrit and Buddhist Studies in the Federal Republic of Germany	–Michael Hahn	15—27
3. Remarks on the Problems of Textual Criticism in Editing Anonymous Sanskrit Literature	–Oskar v. Hinueber	28--40
४. नेपाले परम्परागतं संस्कृतशिक्षणम्	–लोकनाथढकालः, खेमराजोपाध्यायः 'केशवशरणः', शिवहरिमरहट्टा	४१–७५
५. नेपाले संस्कृतशिक्षणमनुसन्धानं च	–हरिदेवमिश्रः, विद्यानाथोपाध्यायः, विष्णुराज आत्रेयः	७७–९०
6. Haribhatta and Gopadatta: Two authors in the Succession of Aryasura: on the Rediscovery of Parts of their Jatakamalas	–Michael Hahn	91--120
7. Planets and Pseudoplanets in Indian Literature and Art with Special Reference to Nepal	–Adalbert Gail	121—136
८. नेपाले संस्कृतानुसन्धानक्षेत्रे सामयिकसमस्यानां सर्वेक्षणम्	–सरस्वतीप्रसादघिमिरे, दुर्गाप्रसाद दवाडी, बाबुरामशर्मा पोखरेलः	१३७–१५६
9. Aspects of Nepalese Culture: Ancient Inscriptions and Modern Yatras	– Bernhard Koelver	157—172

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Opening Ceremony

31st Asvina, 2035 (17th October, 1978)

The inaguration ceremony was held at Rashtriya Sabha Griha, the City Hall, in Kathmandu at 1400 Hrs.

The ceremony started with recitation of Vedic Hymns, *Mangalacaarana*, by Prof. Soma Nath Paudel and Prof. Damodar Koirala:

हरिः ॐ

१. पावका नः सरस्वती वाजेभिर्वाजिनीवती । यज्ञं वष्टु धियावसुः ॥
२. चोदयित्री सूनृतानां चेतन्ती सुमतीनाम् । यज्ञं दधे सरस्वती ॥
३. महोऽअर्णः सरस्वती प्रचेतयति केतुना । धियो विश्वा विराजति ॥
४. मेधां मे वरुणो ददातु मेधामग्निः प्रजापतिः ।
मेधामिन्द्रश्च वायुश्च मेधां धाता ददातु मे स्वाहा ॥
५. भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ।
स्थिरैरङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥

हरिः ॐ

To conduct the business of the august assembly, the Vice-chancellor of the Tribhuvan University, Prof. Jagat Mohan Adhikari, was requested to preside over as the chairman. This proposal was welcomed by all the participants of the session, which was held in the form of a public meeting, amidst clapping. Prof. Jagat Mohan Adhikari then took the chair.

Prof. Ambika Prasad Adhikari, Dean of the Institute of sanskrit Studies, delivered his welcome speech. Given below is the original text of his welcome speech:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मान्याः सभापतिमहोदयाः
माननीया महामहिमशालिनो मन्त्रिप्रभृतिमहाभागा राजदूतमहोदयाः
अभ्यर्हणीया गुरुवराः
स्वराष्ट्रिया मित्रराष्ट्रियाश्च सहकर्माणः सहभागिनश्चाभ्यर्हणीया महानुभावाः
सभाजनीया भद्रमहिलाः सज्जनाः

राष्ट्रनायकानां श्री५महाराजाधिराजवीरेन्द्रवीरविक्रमशाहदेवदेवानां सर्वगुणसम्पन्ने कुलपतित्वे विकसतः त्रिभुवनविश्वविद्यालयस्य संस्कृताध्ययनसंस्थाने संस्कृतस्य चतुरस्र-समुन्नतये प्रयत्नशीले नैपालकानां मित्रराष्ट्रशर्मण्यदेशीयानां च संस्कृतविदुषां गोष्ठीयं जायमाना वर्तते। अस्माकं राष्ट्रस्य प्रगतिशीले प्रयासे मित्रराष्ट्रस्यैतादृशी सारभरिता-ऽभिरुचिरवश्यमेवोत्साहदायिनी संस्कृतस्य भविष्यदुज्ज्वलमादर्शयत्स्वनेकेषु शुभलक्षणे-ष्वन्यतमं शुभलक्षणं च। एतादृश्या महत्त्वपूर्णाया गोष्ठ्याः सुमधुरेऽस्मिन् समुद्घाटनसमारोहे सौहार्दस्निग्धभावेन समभ्यागतानां माननीयानां मन्त्रिप्रभृतिमहोदयानां महामहिमशालिनां राजदूतमहाभागानां मित्रराष्ट्रियाणां स्वराष्ट्रियाणां च समेषां महानुभावानां त्रिभुवनविश्व-विद्यालयीयसंस्कृताध्ययनसंस्थानतः स्वागताभिनन्दनं निवेदयन्नमन्दानन्दमेदुरो धन्यम्मन्यश्च विनयावनतमूर्धा सौहार्दाप्लावितहृदयोऽहं सशुभाशंसनं स्वागतमावेदयामि। शुभसमागमे-ऽस्मिन् नेपालस्य संस्कृतस्य च विषये किमपि विनिवेदयितुं च वाञ्छामि।

ऐतिहासिकाच्चन्द्रगुप्तमौर्यसमयात् पूर्वमेव नेपालनाम्ना विख्यातं प्राचीनं राष्ट्रमिदं श्रौतस्मार्तकालयोर्निमिपाल-जयन्त-विदेह-मिथिला-नेमिपालनामभिर्विश्रुतमासीत्। निमिपालस्य नेमिपालस्य वाऽपभ्रष्टं विकसितं वा नाम नेपालः स्यादिति प्रतिभाति। अनुसन्धानसन्धेयं विषयमिममधुना परित्यज्य संस्कृतकाव्यसाहित्ये समीक्ष्यमाणं नेपालीय-महिमानं वस्तुनिर्देशात्मकमङ्गलरूपेण प्रस्तौमि।

द्वादशशताब्दीजेन महाकविना श्रीहर्षेण सप्तदशशताब्दीजेन पण्डितराजेन जग-न्नाथेनालंकारशास्त्रिणाऽप्पय्यदीक्षितेन कृतं नेपालनरेशसद्गुणवैभवकीर्तिवर्णनं भारतीय-हिन्दूभूभुजां मुगलसम्राजां च देदीप्यमानसमृद्धियुतेऽपि शासनसमये नेपालीयानां प्रवरचरित-स्यातुलवैभवस्य समुज्ज्वलगौरवस्य च भारतभुवि प्रबलः प्रभाव आसीदिति स्पष्टं प्रत्याययति। शाहवंशप्रभवैर्नेपालनरपतिभिः प्रचकाश्यमानायामेतस्यामेव नेपालीयचरित-परम्परायां वयमद्यत्वे हिन्दूराष्ट्ररूपेण प्रतिष्ठिताः सन्तः श्री ५ महाराजाधिराजानां वीरेन्द्रवीरविक्रमशाहदेवदेवानां नेतृत्वेऽनवरतं विकासपथेऽग्रेसरीसरन्तो ज्ञानविज्ञानाना-मखिलशाखानां विद्यानामुन्नमनोद्देश्यके महायज्ञे दीक्षिताः कर्माणि कुर्वाणाः स्मः।

संस्कृतं नेपालस्य प्राचीनतमा महत्तमाऽऽत्मीयतमा च भाषा विद्या वाङ्मयं चेति विषये नास्ति सन्देहावसरः। नेपाले संस्कृतस्य विषये देशान्तर इव चिन्तनं वस्तुस्थितिं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न स्पृशति । फ्रान्सदेशीयस्य प्रसिद्धस्य मनोरोगचिकित्सकस्य संस्कृतविदुषो डा. फिलिपब्रुइन-महोदयस्य यूरोपदेशीयशब्दकोशेषु संस्कृतभाषाविषयकं विवरणं द्रुतं संशोधनीयमिति विचारोऽप्यत्र विषयेऽन्यतमं निदर्शनम् ।

संस्कृतं नेपालीयसंस्कृतौ जीवनं ददती विद्या जीवन्तीयमेव विद्या नेपालीयसंस्कृते-र्जीवनस्य स्रोतः । संस्कृतस्य नेपालीयसंस्कृतेश्चाविनाभावसम्बन्धो वर्तते । नेपालराष्ट्रं सांस्कृतिक्या एकताया अनुलोमपरिणामः संस्कृतं सांस्कृतिकैकताया मूलं कारणमक्षय्यं स्रातश्च । व्यक्तिविशेषान् वर्गविशेषान् समाजविशेषांश्चैकस्मिन् राष्ट्राभिधानकेऽवयविनि समन्वयन् मूलं तत्त्वं संस्कृतिरेव । अस्या उपादानान्यथवाऽऽलम्बनान्यहं मन्ये वेशो भाषाऽऽचारो विचारश्चेति । काश्चन कारकविभक्तीः कतिचन क्रियाविशेषणानि संयोजकानि विहाय नेपालीयभाषायां संस्कृतभाषायास्तत्समशब्दाः प्रतिशतमुपपञ्चसप्तति-संख्याः संस्कृततद्भवशब्दाश्च प्रतिशतमुपपञ्चदशाः प्राप्यन्ते । नेपालराष्ट्रियपर्वोत्सवेषु प्रतिशतमुपषडशीतिसंख्याः पर्वोत्सवाः संस्कृतमूला दृश्यन्ते । नेपालीयपर्वयात्रा विधि-विधानानि संस्काराश्च संस्कृतप्राणनेनैव प्राणन्ति । नेपालराष्ट्रियविचारदर्शनसिद्धान्ताः संस्कृतापजीव्याः संस्कृतप्रतिपादिताश्च । नेपालीयराज्यव्यवस्थाया आपूरकं वास्तविकं स्रोतः समीक्ष्यमाणं संस्कृतमेवेति पर्यवस्यति । पञ्चायतप्रजातान्त्रिकदर्शनप्रवर्तकस्य तदाधारित-राज्यव्यवस्थाप्रतिष्ठापकस्य श्री ५ महेन्द्रस्य महनीयेषु विश्वविस्मरगौरवेषु चरितेषु नेपालीयराज्यव्यवस्थाया आत्मवादेनाऽऽस्तिकवादेनानुप्राणनमप्यन्यतममिति संस्कृतविद्यार्थि-श्रेणिषु वर्तमानस्य मम निश्चयः । नेपाले संस्कृतेः संस्कृतस्य च सूक्ष्मविचारणाया-मन्यूनानतिरिक्त महिममहनीयत्वमर्थपूर्णत्वं च विभाव्येते । सांस्कृतिकवस्तुजात-संरक्षणोद्देश्यायां गुरुयोजनायां पर्याप्तं सहयोगमासादयितुं नेपालो यथाशक्ति प्रयत-मानोऽस्ति । उक्तगुरुयोजनायाः कार्यान्वयने पश्चिमजर्मनीदेशतः संयुक्तराष्ट्रसंघीयशिक्षा-संस्कृतिविज्ञानसम्बन्धिसङ्घटनतः (युनेस्कोतः) संस्थान्तरतश्च सहयोगः प्राप्य-माणोऽस्ति । सांस्कृतिकवस्तूनां संरक्षणं संस्कृतिसंरक्षणस्यैकः पक्षश्चेत् सांस्कृतिकवस्तु-निर्माणसम्बन्धिविद्याया अनुसन्धानपूर्वकं समुज्जीवनेन संरक्षणं ततोऽप्यपरिहार्योऽन्यः पक्ष इति मे द्रढीयान् विश्वासः । देशान्तरेष्वाधुनिकप्रविधीनामाविर्भावात् ततस्तेषा-मस्मद्देश आयातात् पूर्वमेव भूयांसि सांस्कृतिकवस्तूनि नगरभवनमन्दिरमूर्तिचित्राण्य-स्मद्देशीयपरम्परागतविद्याशिल्पप्रविधिभ्य एव निर्मितानीति तेषां विद्याशिल्पप्रविधीनां समुज्जीवनसन्दर्भे देवमन्दिरमूर्तिचित्रप्रतिमूर्तिप्रतिलिपीनामुत्तारणावश्यकता प्रतीयमाना ऽस्ति । समयेन क्रमशः क्षीयमाणावयवायुधानां देवमूर्तीनां स्वरूपाण्यायुधानि च विशेषतो-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऽनुसन्धाय ध्यानमपि प्रतिदैवतं निश्चेयं वर्तते। निश्चितानि ध्यानान्याधारीकृत्य वास्तव-देवतानां तद्भेदानां च निर्धारणमावश्यकं विद्यते। प्रचलितपूजार्चाविधिविधानानां यथार्थ-रूपं शास्त्रसम्मतिमपि समीक्ष्य सुरक्षणीयं प्रतीयते।

राष्ट्रियशिक्षापद्धतेर्योजनया संस्कृतशिक्षणस्यापि व्यवसायोन्मुखत्वमनुसन्धान-प्रवणत्वं च लक्ष्योकृते स्तः। श्री ५ राजकीयशासनं (श्री ५ को सरकार) संस्कृत-शिक्षासमुन्नतौ सदैव चिन्तनशीलं सद्गोष्ठीमिमां दर्गीदृश्यमानमस्याः समुदर्कं च प्रतीक्ष-माणमिव दृश्यते। संस्कृताध्ययनसंस्थानं च क्षमतानुसारं प्राप्तसाधनैश्च यावच्छक्यं त्रिभुवनविश्वविद्यालयस्य नीतिनिर्देशनयोरग्रेसरदस्ति। काश्चन समस्याः समाधीयमानाः कतिपयेषु च पक्षेषु प्रगतिरपि जायमाना दृश्यन्ते। अनुसन्धानपक्षे तु प्रारम्भिकस्येव कालस्य विद्यमानत्वेनानुकूलवातावरणस्यापि प्राशस्त्येन वाञ्छनीयतया च गतौ द्रुतता नाऽऽयाता। तथापि प्राध्यापकवराच्छ्रीनयराजपन्तमहाभागात् संस्कृताध्ययनसंस्थानस्याऽऽयोजने सम्पन्नेन सुमतितन्त्रग्रन्थस्य समीक्षापूर्णेन कार्येणोत्साहो वर्द्धमानोऽस्ति। नेपालीये राष्ट्रियाभिलेखालये सुरक्षितस्य दुर्लभस्य सुमतितन्त्रस्य पाण्डुलिपेः प्रतिलिपौ विद्वच्छिरो-मणिहेमराजपण्डितमहाभागतः प्रसिद्धेन संस्कृतविदुषा श्रीमता टुचीमहाभागेनोपलब्धाया-मपि नेपालीयैर्विद्वद्भिरेवमस्य ग्रन्थस्य समीक्षापूर्णं सम्पादनमकारीत्येवमभिलेखालयस्य ग्रन्थानां समीक्षणसम्पादनक्रमे तन्त्रं ज्यौतिषं च प्रत्यनुसन्धानकार्यक्रमोऽस्माद् वर्षादेवा-ऽऽरप्स्यमानो वर्तते। प्रारम्भे कतिपयानि काठिन्यानि दृश्यमानानि सन्ति तथापि वयमग्रे-सरिष्याम इति विश्वासः।

संस्कृतेऽनुसन्धानकार्यक्रमे शिक्षणकार्यक्रमे च मनोयोगः समानोऽपेक्ष्यते। आधुनिकभाषाया ग्रन्थेषु तत्सम्बद्धविषयेषु चिरकालात् प्रतिवर्षं नैकान्यनुसन्धानकार्याणि संचलन्त्यभिनवानुसन्धानकृतयोऽपि प्रकाश्यमाना दृश्यन्ते। तादृशवाङ्मयानां शिक्षा-परम्परया उत्तरोत्तरं परिवर्द्धमानतयैवानुसन्धानक्षेत्रेऽपीदृशी समृद्धिर्दरीदृश्यते। अनुसन्धान-कार्येऽप्रसरति विद्याविकासस्य गतिरवरुद्धा भवति चेच्छिक्षणकार्यक्रमे सम्यगप्रचलति विद्यालोपभयमप्युद्भवति। बहु विमृश्य सम्यगनुभूय चेदं संस्कृतस्य विकासाय सम्पूर्ण-संस्कृतशिक्षणस्य निःशुल्कसञ्चालनं निरणायि। निर्णयश्चायं कार्यान्वितो व्यधायि। शिक्षण-प्रविधिः पाठ्यक्रमश्च यथावश्यकं परिष्करणीयः समयानुकूलश्च सम्पादनीयः। परं संस्कृतं यावदपि महिमशालि भवतु, वयमस्य महिम्नो गानं यावदपि कुर्मः, संस्कृते छात्राणा-माकर्षणमुत्तरोत्तरमपचीयमानं दृश्यते। फलतः संस्कृतशिक्षायां त्रिभुवनविश्वविद्यालयस्य समग्रस्यार्थव्ययभारस्य प्रतिशतं (२.७४) द्विदशमलवचतुःसप्ततिकमात्रस्य विनियोजनेऽपि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतशिक्षातदितरशिक्षासु महर्घेति मन्यते। अत्र प्रतिवर्षं प्रतिच्छात्रं पञ्चशतोत्तरसप्त-सहस्ररूप्यकाणां व्ययो दृश्यते। स्थितिरियं छात्रसंख्यालपता प्रयुक्तैव। छात्रसंख्या यदनुपातेन वर्द्धते तदनुपातेन प्रतिच्छात्रं विनियोज्यार्थभारोऽपि न्यूनतामुपगच्छति। छात्रसंख्यावृद्धौ छात्राणामाकर्षणमावश्यकं छात्राकर्षणवृद्ध्यै च कार्यक्षेत्रेण विस्तृतेन च भाव्यम्। एवं सति कतिपयशिक्षान्तरेषु वर्तमानः संवाधो न वर्धते। संस्कृतशिक्षायां छात्रसंख्या वर्द्धिष्यते। एकस्मिन् क्षेत्रेऽवश्यम्भाविनो व्ययादेवाधिकतराणां शिक्षितानां कार्यकर्तॄणामुत्पादनं सुसम्भव भवति।

संस्कृतशिक्षायामाकर्षणं वर्धयितुं संस्कृतविद्यार्थिनां प्रज्ञाविकासाय देशान्तरेष्वप्य-ध्ययनस्य विशेषज्ञानस्यावसरलाभो वाञ्छितो वर्तते। विषयानिमान् विचिन्त्य भविष्यति संस्कृतोन्नायकत्वेन सम्भाविताः पक्षाः सामान्यतो निम्नप्रकाराः।

१. संस्कृतशिक्षणस्य विकासः परिष्कारश्च।
२. संस्कृतशिक्षाक्षेत्रस्य विस्तारः।
३. संस्कृतशिक्षितानां कार्यक्षेत्रस्य विस्तारः।
४. देशान्तरीयसंस्कृतविद्वत्सम्पर्कश्चेति।

मया बहु निवेदितम्। सत्सूच्चावचेषु क्षमामभ्यर्थये। पुनरपि विनम्रशिराः सौहार्दभरितस्वान्तः श्रद्धामरन्दरसभारवहं स्वागताभिनन्दनकुसुमाञ्जलिमिममुपहरामि।

स्वागतम्। सुखागतम्। शुभागतम्।

संस्कृतो नृपः संस्कृताः प्रजा भवतु संस्कृतो देश उन्नतः।

ॐ तत्सत्

The Honourable Minister of State for General Administration, Shri Bhadra Sharma was requested to inaugurate the Symposium. He inaugurated the Symposium by declaring open "नेपालक-जर्मन-संस्कृतविद्वद्गोष्ठी"

The Honourable Minister of State then delivered his inauguration speech in Sanskrit, which is given below:

समादरणीयाः सभापतिमहोदयाः
महामहिमशालिनो राजदूतमहोदयाः
मान्या विद्वद्वराः
समुपस्थिताः सज्जनाः भद्रमहिलाश्च

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अतीव मोदावहोऽयं विषयो यत् नैपालक–जर्मन–संस्कृतविद्वद्गोष्ठ्याः समुद्घाटनावसरो मया लब्धः । अस्मिन्नुपलक्ष्येऽत्रभवतामत्रभवतीनां च समक्षे समुपलब्धस्यास्य शुभावसरस्य सदुपयोगार्थं मनस्युद्भूतं चिरकालतोऽनुभूतं च संस्कृत-विषयकं किञ्चन वक्तव्यं निवेदयन्नस्मि ।

प्रथमं तावत् संस्कृतवाङ्मयस्यापरिहार्यावश्यकता प्रायः सर्वत्र सर्वैरपि स्वेन स्वेन रूपेण स्वीकृता वर्तते । तत्राप्यस्माकं हिन्दूराष्ट्रे नेपालाधिराज्ये ज्ञानविज्ञानयोर्दर्शनस्य कलायाः साहित्यस्य संस्कृतेश्चापाररत्नाकरस्य राष्ट्रभाषावष्टम्भरूपस्य संस्कृतवाङ्मयस्य शिक्षणव्यवस्थायां वैशिष्ट्यविषये च विचारणीयाः समालम्बनीयाश्च विषया नैकविधा विद्यन्ते । तेषु सारसंक्षेपतो महत्त्वपूर्णानामत्रोल्लेखः क्रियते ।

१. संस्कृतशिक्षापद्धतौ सरलतां रोचकतां च समानीय सर्वेषां कृते संस्कृतमाकर्षकं काठिन्यरहितं चेति सर्वथा विश्वासावहं विधातव्यम् ।

२. भाषा केवलं विषयज्ञानस्यैव माध्यमरूपिण्येवेत्यतो भाषागतं काठिन्यं यथासंभवं संस्कृतप्रकृत्यनुकूलत एवापसार्य विषयगाम्भीर्यावगाहे सौकर्यं समानेयम् ।

३. भाषाविज्ञानदृष्ट्याऽवलोकनं क्रियते चेद् भारोपेलीपरिवाराणां भाषाणां रूपस्वभावविकासादिप्रक्रियाववोधे संस्कृतभाषाविज्ञानं महत्त्वपूर्णं योगदानं कर्तुं नितरां सामर्थ्यसमेतमस्तीत्यत्र न वर्तते कस्यचित् किमपि वैमत्यम् ।

४. इदानीं भाषान्तरसाहाय्येनाध्येतव्यानां विषयाणां संस्कृतमाध्यमेनैवाध्ययनव्यवस्था विधीयते चेदवश्यमपि संस्कृताध्ययनेच्छुकानां संख्याबाहुल्ये कार्यक्षेत्रविस्तारे च प्रयासान्तरापेक्षैव न भवतीति मे दृढो निश्चयः ।

५. अद्यत्वे शर्मण्यदेशे संस्कृतस्य विषये यान्युल्लेखनीयानि कार्याणि जातानि सन्ति । ततोऽस्माकं देशेऽपि संस्कृतस्य विकासायाऽऽधुनिकप्रविधिसाहाय्येनेतोऽप्यधिकसक्रियाः कार्यक्रमाः सञ्चलिष्यन्तीति वयमाशास्महे ।

६. संस्कृताध्ययनपरिपाटी व्यावहारिकी व्यवसायोन्मुखी राष्ट्रियावश्यकतायाः पूरयित्री च यथा भवति तथाविधप्रयासे सर्वदैवास्माभिः सावधानैर्भाव्यम् ।

७. अनुवादादिकार्यतः संस्कृतनिष्ठं दर्शनसाहित्यादिगतमुत्कृष्टं मौलिकं च स्वारस्यं न कदापि समाहितं भवितुं शक्नोत्यतः संस्कृतस्यामरतानुसन्धानार्हता चेत्यपि सुतरां स्वीकर्तव्यमेव ।

उपर्युक्तानां वस्तुतथ्यानामङ्गीकारत एव त्रिभुवनविश्वविद्यालयीयसंस्कृताध्ययन-संस्थानस्य स्वतन्त्ररूपेण संघटनं विहितम् । यत् संस्थानं संघटनसमयतः स्वकीयमुन्नतमुदात्तं विशालं च दृष्टिकोणमवलम्ब्य प्रचलत् सदेतादृशेऽन्तरराष्ट्रिये कार्यक्रमेऽधुना संलग्नं वरीवर्ति।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शिक्षणानुसन्धानादिसन्तुलितकार्यक्रमसञ्चालनतः संस्कृताध्ययनसंस्थानं सततमुत्तरोत्तरं विकासविलसितं भवत्विदं विद्वद्गोष्ठ्यपि संस्कृतशिक्षासमुन्नतिपक्षे साधारणोपलब्धिप्रदाने सफला भवेदिति मे हार्दिकी शुभकामना ।

धन्यवादः

His Excellency the Ambassador of the Federal Republic of Germany for the Kingdom of Nepal, Dr. Karl Maes, then delivered his speech. The text of his speech is given below:

It is a great honour and pleasure for me to say a few words on the occasion of today's opening of the Nepal–German Sanskrit Conference.

I consider it an important event since it is the first joint conference of Nepalese and German scholars of Sanskrit. Four professors from the Federal Republic of Germany are participating in the conference. All of these established already in the past close and fruitful contacts with their Nepalese colleagues.

In fact, this conference is another proof of the close and friendly cooperation between the Kingdom of Nepal and the Federal Republic of Germany in a specific field.

Successful cooperation between Nepalese and Germans in various disciplines of natural sciences of the humanities and applied sciences had already a well-founded tradition. In this regard I should mention the activities of the Nepal Research Centre and the Nepal–German Manuscript Preservation Project.

It was natural scientists and ethnologists who originally started the activities of the Nepal Research Centre. Their activities led to numerous and valuable scientific results which have been published in *Khumbu Himal*.

Important events for the Nepal Research Centre were the construction of its new building and the conclusion of a new agreement between the Tribhuvan University and the German Oriental Society. The new agreement introduced an additional aim, namely to balance the activities of humanities and natural sciences.

In 1977, the Nepal Research Centre started its own publication, the *Journal of the Nepal Research Centre*. Alternating it carries contributions in the fields of the humanities and natural sciences.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

This Journal is especially designed as a forum for Nepalese authors. The first issue carried four contributions from Nepalese scholars. Now a few words about the activities of the Nepal-German Manuscript Preservation Project. Since 1970 it microfilmed and catalogued more than 56,000 manuscripts with about 2,500,000 pages. Two copies of the films remain in Nepal, one copy is sent to Germany. The efforts of the Nepal-German Manuscript Preservation Project will save a great number of endangered texts from the hazards of nature and from neglect by careless owners, and thus will preserve a sizeable part of the great Nepalese cultural heritage.

Joint aims of the Nepal Research Centre and the Nepal-German Manuscript Preservation Project are: First: continuation of the already established good and friendly cooperation and, at the same time, deepening of the exchange of ideas, experiences and methods. Second: cooperation in evaluating material so far not yet or only insufficiently used. I am confident that both institutions will fulfil these noble tasks.

It goes without saying that the upcoming conference, a symposium of Nepalese and German Sanskrit scholars, comes as a natural result and as a useful extension of the joint efforts of the past. It also gives an opportunity to evaluate the work done till now.

However, most important will be the scientific conclusions reached during the Symposium. With this in mind, I wish the conference in the interest of the joint Nepalese and German research on Sanskrit a full success and all scholars who take part a rewarding participation.

The Rector of the Tribhuvan University, Dr. Kamal Prakash Malla, then shed light on the background of organizing the symposium and expressed his views advising the Sanskrit scholars. The original text of his speech is as follows.

सभापति महोदय, माननीय राज्यमन्त्रीज्यू, महामहिम संघीय गणतन्त्र जर्मनीका राजदूत, उपस्थित संस्कृतविद् तथा संस्कृतप्रेमी विद्वान्‌हरू,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आज संस्कृतशिक्षाको विषयमा, संस्कृत अनुसन्धानको विषयमा, संस्कृतसाहित्यको विषयमा जर्मन तथा नेपाली विद्वान्हरूको यो संयुक्त गोष्ठीमा विश्वविद्यालयको तर्फबाट दुइ चार शब्द भन्ने मौका दिनुभएकोमा यो गोष्ठीका संयोजकलाई म साधुवाद टक्र्याउँछु। यो गोष्ठीको कसरी शुरूआत भयो, सो कुरा छोटकरीमा यो सभाको सामु निवेदन गर्दछु।

त्रिभुवन विश्वविद्यालय र नेपाल रिसर्च सेण्टरको बीचमा १९७७ ई. अगस्तको ३१ तारीखमा एउटा संझौता भएको थियो। त्यो संझौतामा त्रि० वि० वि० तथा जर्मन विद्वान्हरूको बीच विविध क्षेत्र या नेचरल साइन्स, सामाजिक विज्ञान, मानविकी र साथ-साथै संस्कृतको विषयमा पनि संयुक्त अनुसन्धान, संयुक्त खोजी, अध्ययन तथा संयुक्त बौद्धिक सहयोगका कार्यक्रमहरू तर्जुमा गर्ने व्यवस्था थियो। यही सिलसिलामा राष्ट्रिय शिक्षा-समितिको बैठक बस्यो, जुन बैठकमा नेपालमा संस्कृतशिक्षाको विषयमा निकै लामो र निकै गहन छलफल भयो। हुनत यो पहिलो छलफल थिएन, राष्ट्रिय शिक्षापद्धतिको योजना लागू भएदेखि नै संस्कृतशिक्षाको विषयमा विभिन्न तहमा, विभिन्न ठाउँमा संस्कृतशिक्षाको संवर्द्धन, उत्थान तथा संरक्षणको लागि छलफलहरू भए। योजनाहरू तर्जुमा हुँदै आएका थिए। तर त्यो दिन राष्ट्रिय शिक्षासमितिको छलफलमा एउटा ठोस सुझाव प्रस्तुत गरियो। जुन सुझावअनुसार नेपालमा संस्कृतशिक्षाको आधुनिकीकरणको लागि त्रि. वि. वि. तथा नेपाल रिसच सेण्टरको बीचमा जुन संझौता भएको हो, त्यही संझौताको शर्त-अन्तर्गत जर्मन विद्वान्हरू र संघीय जर्मनीको जर्मन ओरियन्टल सोसाइटीका विद्वान्हरूको सहयोग माग्ने हामीले निधो गर्‍यौं। त्यहीअनुसार अक्टोबर २ तारीखका दिन नेपाल रिसर्च सेण्टरका मुख्य प्रमुख डा. मिषायल विट्सेलज्यूलाई हामीले अनुरोध गर्‍यौं। त्रि.वि.वि. तथा राष्ट्रिय शिक्षासमितिको तर्फबाट हामीले अनुरोध गर्‍यौं, एक अध्ययनको एक योजना प्रस्तुत गर्न, जसमा नेपाली विद्वान्हरू पनि सम्मिलित थिए। योजना बनाउने र यही योजना-को सिलसिलामा संघीय जर्मन राजदूतावासका प्रथम सचिव तथा डा० अस्कर फन हिनूवर त्यस वेला नेपाल रिसर्च सेण्टरको प्रमुखको रूपमा त्यस विषयमा छलफल गर्नको लागि विश्वविद्यालयमा पाल्नुभयो र हामी धेरै बेरसम्म छलफल गरेपछि यौटा निष्कर्षमा पुग्यौं। त्यो निष्कर्ष यही थियो कि जुन क्षेत्रमा जर्मन विद्वान्हरू, ओरियन्टल सोसाइटी अफ जर्मनी तथा नेपाल रिसर्च सेण्टर एवं नेपालका संस्कृतविद्वान्हरूको बीचमा सहयोग र बौद्धिक आदानप्रदान हुन सक्छ, यस विषयमा यौटा गोष्ठीको आयोजना गर्ने र त्यही गोष्ठीबाट पछि हामीले ठोस कार्यक्रम, ठोस कार्ययोजना तर्जुमा गर्ने भन्ने निधो गर्‍यौं र त्यसैको फलस्वरूप आज यो गोष्ठी हुँदैछ। यो गोष्ठीमा जर्मन विद्वान्हरूको तर्फबाट चार-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वटा कार्यपत्रहरू प्रस्तुत हुँदैछन् र नेपाली विद्वान्हरूका तर्फबाट चार कार्यपत्रहरू प्रस्तुत हुँदैछन् । हामी यही आशा गर्दछौं कि यी कार्यपत्रहरूमा भरखर महामहिम जर्मन राजदूतज्यूबाट आज्ञा भए जस्तै यी कार्यपत्रहरूको छलफलको दौरानमा नेपाल संस्कृत अध्ययन, अध्यापन, अनुसन्धान तथा संस्कृतशिक्षाको विषयमा कुनै वैज्ञानिक र कुनै ठोस निष्कर्षहरू आउनेछन् ।

संस्कृतशिक्षाको विषयमा कुरा गर्दाखेरि हामी पटकपटक उही कुराहरू दोहोऱ्याउँछौं, उही कुराहरू गर्छौं, हाम्रो अतीतको गरिमा, हाम्रो संस्कृतसाहित्यको भण्डार हामो देखाउँछौं। राष्ट्रिय अभिलेखालय जहाँ दुर्लभ, अप्राप्य अतिप्राचीन करीव चौबीस सय ताडपत्रका हस्तलिखित ग्रन्थहरू र अरू करीव सत्ताइस हजार हस्तलिखित ग्रन्थहरूको संरक्षण भएका छ । हामी पटकपटक औंल्याउँछौं, हाम्रो गरिमामय अतीतलाई, जुन बेला संस्कृतको ठूलो सम्मान थियो, जुन बेला संस्कृतको ठूलो राजकीय संरक्षण थियो । हामी औंल्याउँछौं कि हाम्रा सबै अभिलेखहरू संस्कृतमा छन्, हाम्रा सबै लिपिवद्ध साहित्य, मुख्यतया प्राचीन मध्यकालीन लिपिवद्ध साहित्य संस्कृतमै छन्, हाम्रा प्राचीनकालीन महत्त्वपूर्ण अभिलेखहरू मानदेवदेखि जयदेवसम्म र त्यसपछिका अभिलेखहरू जति संरक्षित छन्, जति प्राप्य छन्, ती ती अभिलेखहरू सबै संस्कृतमै छन् । हाम्रो संस्कृत हाम्रो संस्कृतिको आधारभूत, हाम्रो संस्कृतिको, हाम्रो जीवनको, हाम्रो धर्मको आधारशिला नै संस्कृत हो भन्ने हामी औंल्याउँछौं, यत्तिमै यी यस्तै कुरामा वा यी कुरा यीं इतिहासको पाना पल्टाएर नै हामी ठान्छौं कि संस्कृतशिक्षा वा संस्कृत अनुसन्धान, संस्कृतभाषाको संरक्षण हुन्छ भन्ने ठान्छौं । तर आज परिस्थिति निकै बदलिइसकेको छ । सामाजिक आर्थिक परिस्थिति, नेपालको समाज, नेपालको आर्थिक परिस्थिति निकै बदलिइसकेको छ । त्यस कारण आजका चुनौतीहरूलाई, आजका हाँकहरूलाई हामीले सामना गर्नको लागि संस्कृतशिक्षाको संरक्षण, संस्कृतसाहित्यको संरक्षण, संस्कृतभाषाको संरक्षणको लागि हामीले के गर्नुपर्छ भन्ने कुरा हामीले यस्तै गोष्ठीहरूबाट खोज्नु अत्यन्त आवश्यक छ । मलाई लाग्छ, संक्षेपमा भनूँ भनेदेखि संस्कृतविद्वान्हरूको अगाडि, संस्कृतप्रेमीहरूको अगाडि नेपालमा मुख्यतया दुइ तीन चुनौतीहरू खडा छन् । सबभन्दा ठूलो चुनौती संस्कृतशिक्षामा अहिले आकर्षण निकै घट्दै गएको छ । यो आकर्षण घट्दै गएको कारण के हो ? किन आकर्षण घट्दै गइरहेको छ र यसलाई फेरि किन बढ्ता, कसरी बढ्ता आकर्षण दिलाउने हो ? यो मलाई लाग्छ, सबभन्दा ठूलो चुनौती हो । त्यसपछि संस्कृतशिक्षा हाम्रो नेपालमा प्राप्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपाली समाजको विभिन्न निकायहरूले दिन सक्ने कार्यअवसर, नेपालमा जति कार्यअवसर प्राप्त छन्, ती प्राप्त कार्यअवसरहरूसँग कसरी संस्कृतशिक्षा संबद्ध गर्ने, कस्तो किसिमको जनशक्ति तयार गर्ने र कुन किसिमको दक्षता हाम्रो समाजलाई चाहिएको छ । संस्कृतबिद्हरूबाट, संस्कृतशिक्षादीक्षाप्राप्तहरूबाट कस्तो किसिमको दक्षता हामीले खोज्ने हो ? यस विषयमा हामी स्पष्ट हुन नितान्तै आवश्यक छ । त्यस्तै मलाई लाग्छ– तेस्रो महत्त्वपूर्ण चुनौती हामीले सामना गर्नुपरेको छ कि संस्कृतशिक्षालाई कसरी सरल, सुगम र व्यावहारिक बनाउने हो र खालि सुगम र व्यावहारिक मात्र होइन कि संस्कृतशिक्षालाई कसरी व्यापक बनाउने हो ? यो कुनै सीमित वर्ग वा कुनै सीमित स्थान, कुनै सीमित क्षेत्रभित्र मात्रै प्रचार नगरीकन समाजको विभिन्न अङ्ग, समाजको विभिन्न निकायहरू र नेपालको कुनाकाप्चासम्म पनि कसरी यसको प्रचार गर्ने ? मलाई लाग्छ, यी तीनओटै चुनौताहरू संस्कृतशिक्षा, संस्कृतप्रेमीहरू, संस्कृतविद्हरूको अगाडि आज नेपालमा छ ।

यो गोष्ठीबाट अवश्य पनि दिशाबोध हुनेछ, अवश्य पनि मार्गदर्शन हुनेछ । खास गरेर मलाई लाग्छ कि हाम्रा जर्मन विद्वान्हरूको सम्पर्कबाट हामी अवश्य पनि लाभान्वित हुनेछौं । किनकि संस्कृतशिक्षामा अहिले चाहिएको यौटा आलोक हो । त्यो आलोक हो, आधुनिकीकरणको । त्यो आधुनिकीकरण यो नै आजको चुनौतीहरूलाई सामना गर्ने सक्ने क्षमता । यो क्षमता हामी अवश्य पनि विदेशी विद्वान्हरू चाहे ती जर्मन हुन्, चाहे ती भारतीय हुन्, चाहे पाश्चात्त्य जगत्का हुन्, ती विद्वान्हरूको सम्पर्कमा हामी अवश्य पनि चुनौतीहरू सामना गर्ने दक्षता प्राप्त गर्न सक्नेछौं । म यति भनेर यहाँहरूसँग बिदा लिन चाहन्छु । धन्यवाद ।

The Representative of the Nepal Research Centre, Kathmandu, Prof. Dr. Michael Hahn then made his speech. The text of his speech is given below:

The opening of the first symposium of Nepali and German Sanskrit scholars or **नेपालक-जर्मनसंस्कृतकविद्वद्गोष्ठी**, as it sounds in the Sanskrit language, is an occasion of great joy and satisfaction for all those who worked together in turning into reality the mere idea of such a meeting. In order to explain to you why this conference and its successful organization was regarded so important to us I should like

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

to give a few remarks on the German Sanskritists' point of view with regard to Nepal-German co-operation in the field of Sanskrit and related studies.

The Nepal of today is a country which has good and friendly relations with almost all countries in the world. Well so. The great interest in the beauty of this country and the richness of its cultural heritage is expressed by the ever-increasing number of tourists that visit Nepal every year. But apart from those people who show but a general interest in your country's nature, culture, and history there is a limited number of people in Germany who spared no pains and efforts to get to the very core of your culture. These people not only heard or read that there is a very old language called Sanskrit which is of utmost importance for understanding what a Nepali– be he a common man or an erudite–really feels and thinks.

These strange people– called Sanskritists in our country– who started learning Sanskrit only at a very late age compared to your standards and therefore will never achieve your command of written or spoken Sanskrit, have yet studied the language and literature of Sanskrit for more than 170 years with great diligence and devotion and thus were able to inform the German people about the intrinsic values of your culture. What the German Sanskritists perhaps are lacking in practical knowledge of Sanskrit and in everyday's experience in its living culture they have at least partly compensated by their objective and historical manner to treat the phenomena of Nepali culture and by the whole set of a highly developed methodology which they were able to borrow from subjects like classical studies and to apply to the study of Sanskrit.

One result of our western training is that after recognizing the great importance of Sanskrit culture preserved here in Nepal two major steps were undertaken to preserve this culture and to do research work with regard to this culture. These two steps were the launching of the Nepal–German Manuscript Preservation Project and the establishment of the Nepal Research Centre, sponsored by the German Oriental Society.

These two steps led to intensive co–operation between scholars from

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal and from the Federal Republic of Germany. Thus it was quite natural that the wish arose for an opportunity to inform each other about the different means and methods in dealing with the same subject.

One of my predecessors, Dr. Michael Witzel, discussed the possibilities of organizing a joint Nepal-German Sanskrit Symposium with Professor Saraswati Prasad Ghimire and other Nepali scholars and after realizing a warm response from the Nepali side the preparation and organization of this conference was started almost one year ago.

Now we are witnesses of the effective and successful work that has been done from both the Nepali and the German sides. On behalf of the German scholars I should like to convey our heart-felt thanks to all those who in one way or another contributed to the organization of this symposium.

I have to thank the Honourable Minister of State for General Administration, Shree Bhadra Sharma, not only for his presence at this opening function but also for his fine speech in beautiful Sanskrit.

I am indebted to the Rector of the Tribhuvan University, Dr. Kamal Prakash Malla, both for his endorsement of the plans of my predecessors, Dr. Michael Witzel and Dr. Oskar von Hinueber, and for his long and cordial welcome speech.

I should like to express my thanks to the Dean of the Institute of Sanskrit, Prof. Ambika Prasad Adhikari, to the Assistant Dean of the Institute of Sanskrit, Prof. Toya Nath Pandeya, to Prof. Saraswati Prasad Ghimire and others for the active role they played in the exhausting task of organizing this meeting. I apologize for not mentioning so many other helpers and assistants that deserve to be mentioned.

Finally I should like to extend my gratitude to His Excellency the German Ambassador to Nepal, Dr. Karl Maes, who together with his former First Secretary, Dr. Wild, always took keen interest in the German scientific activities here in Nepal and who gives us the privilege of his presence at this opening session;

to the German Foreign Ministry which generously met the travel

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

expenses of the three German scholars who came here only for this conference;

to these three German scholars, the Professors Dr. Adalbert Gail, Dr. Oskar von Hinueber, and Dr. Bernhard Koelver, who took the trouble–not only literally a trouble for them, I hope–to prepare a lecture and to come here despite the heavy university duties of the present winter term in Germany.

I am quite hopeful that after an encouraging beginning the first Symposium of Nepali and German Sanskrit scholars will become a success in the sense that it inaugurates a long period of friendly and fruitful co-operation.

A student of Balmiki Campus, Mr. Kosha Raj Sharma, expressed his views on the Symposium.

Given below is the text of his speech.

समादरणीयाः सभापतिमहोदया
आदरणीया राजदूतमहाभागा
आदरणीया अतिथिमहोदयाः
समुपस्थिता विद्वांसो विदुष्यश्च

अद्य जायमानेऽस्मिन् समारोहे संस्कृतविषयमधिकृत्य हृदि संलग्नान् कांश्चन विषयान् प्रस्तोतुमुद्यताः संस्कृताध्यायिनः संस्कृतानुरागिणश्च वयं छात्रा गौरवमनुभवामः ।

प्राचीनकालादेव विश्वस्मिन् संस्कृतस्य विपुलं महत्त्वं वर्तत इति विश्वस्येतिहासः प्रमाणम् । ऋग्वेदादयो ग्रन्थाः संसारे सर्वेभ्यो ग्रन्थेभ्यः प्राचीनतमा इति पौरस्त्यैः पाश्चात्त्यैश्च विद्वद्भिः स्वीकृतम् । अस्यां भाषायां वेदा ब्राह्मणान्युपनिषदः श्रौतगृह्यधर्मशास्त्राणि स्मृतय इतिहासपुराणानि तन्त्रादीनि दर्शनान्यश्वपाकशिल्पादीनि नानाविधानि कलाजातानि स्कन्धत्रयसमायुक्तं ज्यौतिषमायुर्विज्ञानं गान्धर्वविज्ञानं च निबद्धानि सन्ति । संस्कृतस्यानेन गरिम्णा समाकृष्टाः स्वदेशवासिनो वैदेशिकाश्च केचन विद्वांसोऽत्याधुनिकेऽप्यस्मिन् पारमाणविके युगे संस्कृतग्रन्थस्थितं वस्तुरत्नमन्वेष्टुकामाः सततं प्रयतमाना दृश्यन्ते ।

विश्वस्यैकस्मिन् कोणे स्थितमिदं नेपालराष्ट्रं यस्येमे हिमवन्तो महित्वेत्यादिसूक्तिभिर्गीतमहिमपवित्रैः क्षत्रियराजभिः परिपाल्यमानं हिन्दूराष्ट्रत्वेनाधुना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विश्वस्मिन् परिचितं वर्तते । अत्रत्यैः पूर्वैर्लिच्छविमल्लादिभिश्च राजभिः श्रुतिस्मृतिप्रतिपादितनियमैः शासनं विहितमित्यस्मिन् विषये तैर्लिखिताः शिलालेखादयः साक्षिभूताः सन्ति ।

राष्ट्रोन्नत्यै समयस्य परिवर्तनशीलत्वान्नानाविधानि राजनीतिकपरिवर्तनानि च संजातानि । तेषु मुख्यतमं पृथ्वीनारायणशाहदेवस्य नेपालराष्ट्रस्यैकीकरणाभियानमासीत् । तस्य राजनीतिदाक्षिण्येनाभियाने सफलतां गते सति नैपालकैः राष्ट्रोन्मुखैरभूयत । तदानीं पाश्चात्त्यशिक्षायाः प्रचलनं नाऽऽसीत् । अतो जनाः संस्कृतमेवाधीयते स्म । ब्राह्मणेतरजातिभिः संस्कृतं नाध्येतव्यमिति संस्कृतविद्भिरत्रत्यप्रशासनेन च न कुत्रापि प्रतिषिद्धमासीत् । पुनश्च शर्मण्यदेशवासिभिर्विद्वद्वरैः सार्धमत्रत्यानां विदुषां संस्कृतविषयमधिकृत्य यदेतत् संमेलनं जायमानं वर्तते तेनापि ब्राह्मणेतरजातीनां संस्कृतशिक्षा न निरर्थिकेत्यनुभूयते । पूर्वाग्रहग्रस्ता ये केचन सन्ति तेषां हृदयतः संस्कृतं केवलं मुष्टिपरिमितानामेवेति धारणां खण्डयितुमप्येतदायोजनं प्रभवतु ।

अस्माकं राष्ट्रं स्वतन्त्रं राजतन्त्रात्मकं हिन्दूराष्ट्रं वयं च सनातनधर्मावलम्बिनो हिन्दवः । एतद्देशवासिनो वयं संस्कृतग्रन्थानाधारीकृत्यैव राजानं विष्णुस्वरूपं जानन्तः पितृतुल्यं मन्यामहे । अस्माकं राज्ञः प्रजानां च समस्तसंस्काराः वैदिकविधिनैव संपद्यन्ते । राज्ञः प्रजानां च सान्निध्यं स्नेहभावो ममता सौहार्दं च संस्कृतजन्यधर्मसंस्कृतिसुसंस्कृतमृत्तिकानुरूपाणि । यद्यपि स्वसंस्कृतेर्मूलमजानन्तः केचन संस्कृतं तिरस्कुर्युस्तथापि स्वसंस्कृतेर्वर्धनार्थं राजतन्त्रराजमुकुटयोरस्तित्वार्थं नैपालकानां हितार्थं चापरिहार्या संस्कृतशिक्षा ।

परन्तु कतिपयेषु मण्डलेषु संस्कृतमाध्यमिकविद्यालयानामेवाभावात् सप्तमकक्षापर्यन्तं संस्कृतपाठ्यक्रमस्याभावाच्च संस्कृतमध्येतुं समुत्सुकानां छात्राणामपि क्षेत्रसंकोचादध्ययनस्य वातावरणमेव न विद्यतेऽधुना । अत एव संस्कृताध्यायिच्छात्राणां संख्यापि न्यूनत्वं गता । वर्तमानसमये शैक्षिकव्यवस्थापकैरनुसन्धानस्तरपर्यन्तमध्ययनाध्यापनयोर्व्यवस्था कृता वर्तते । परन्त्वाधारस्य निर्बलतया सा व्यवस्थाऽधुनाऽपूर्णा वर्तते ।

आयुर्विज्ञानं हि संस्कृतविद्या । यस्या विद्याया अध्ययनमध्यापनं च नेपालदेशेऽद्यापि प्रचलदस्ति । परन्तु तस्या विद्याया वैदेशिकैराङ्ग्लभाषायामनुवादो विहितः । तमेवानुवादं वयं पठामः । नहि मूलस्य ज्ञानमस्माकम् । एष एवास्मदीयो लज्जावहो विषयः । तथैव विश्वविद्यालयस्य संस्कृतिविभागे मनुस्मृतेः श्रीमद्भगवद्गीतायाश्चाध्य-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यनमध्यापनं च जायते, तदप्याङ्ग्लभाषामाध्यमेनैव । एतादृशं शैक्षिकगतिविधिं विलोक्य मनसि खेदो जायते ।

वस्तुतः संस्कृतभाषा विश्वभाषाणां जननी समादरणीया च । नेपालदेशेऽस्याः संस्कृतभाषाया आवश्यकता वर्तते चेदस्या एतादृशी दीनावस्था नैव कार्या । राष्ट्रस्य कृते संस्कृतस्याऽऽवश्यकता न विद्यते चेदल्पसंख्यकानां ब्राह्मणानां कृते नगण्यानां विद्यालयानां कृते चास्याऽऽवश्यकता नास्ति । निरर्थकेऽस्मिन् कार्यजाते किमर्थमेतादृशो बहुलो व्ययः । परं संस्कृतस्योन्मूलनेनास्माकं राष्ट्रस्य कीदृशी दशा भवेदेतदपि विचारयन्तु सम्बद्धाधिकारिणः ।

अन्ते च संस्कृतस्याभिवर्धनाय संरक्षणाय च कृतप्रयत्नेभ्यो जर्मनीदेशवास्तव्येभ्यो विपश्चिद्भ्यो वयं साभारं धन्यवादं समर्पयामः । अस्तु ।

The Assistant Dean of the Institute of Sanskrit Studies, Reader Toya Nath Pandeya, then offered his vote of thanks. Following is the text of his speech in Sanskrit:

समादरणीयाः सभापतिमहोदयाः
माननीयाः राज्यमन्त्रिमहोदयाः
श्रीमन्तो जर्मनराजदूतमहोदयाः
श्रीमन्तः शिक्षाध्यक्षमहोदयाः
अन्ये उपस्थिताः सज्जनाश्च

अद्य नैपालक-जर्मनसंस्कृतविद्वद्गोष्ठ्याः समुद्घाटनस्य शुभावसरः । एषोऽवसरो नेपालसंस्कृतक्षेत्रे प्रथमः । अत एव संस्कृताध्ययनसंस्थानस्य हर्षस्य विषयः । अस्माकं पूर्वजैर्विद्वद्भिर्ज्ञानं प्रति ध्यानं दत्तम् । ज्ञानपिपासवो ज्ञानिनां समक्षं गत्वा ज्ञानमर्जितवन्तः । कालेन परिस्थितौ परिवर्तनं समायातम् । विज्ञानं प्रादुर्भूतम् । प्रत्येकविषये वैज्ञानिकमनुसन्धानं प्रारभ्यत । यैर्यैरर्थव्यवस्था सुदृढीकृता तैस्तैरनुसन्धानविषये प्रगतिः कृता । अनुसन्धानविषये या उपलब्धयस्ताः सर्वाः साधारणजनसमक्षं प्रापयितव्या इति मान्यता समायाता । वयमपीदानीमर्थव्यवस्थायाः सुदृढीकरणस्य पक्षे प्रयत्नं कुर्वन्तः स्मः । अतो वयमप्यवश्यमेव विज्ञानपक्ष उन्नतिं करिष्याम इत्याशासे ।

आदरणीयसभापतिमहोदयेभ्यो माननीयराज्यमन्त्रिमहोदयेभ्यः श्रीमद्भ्यो जर्मनराजदूतमहोदयेभ्यः श्रीमद्भ्यः शिक्षाध्यक्षमहोदयेभ्योऽत्रोपस्थितेभ्यः सर्वेभ्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्वद्भ्यः सज्जनेभ्यश्च सविनयं कृतज्ञतां समर्पयामि ।

नमः सभाभ्यः सभापतिभ्यश्च वो नमो नमः ।

Speaking from the chair, Mr. Jagat Mohan Adhikari, Vice-Chancellor of Tribhuvan University, expressed his views as follows:

आज यहाँ आयोजित संस्कृतसम्बन्धी नेपाल-जर्मनविद्वद्गोष्ठीको उद्घाटन-अवसरमा सम्मिलित हुन पाउदा मलाई अत्यन्त खुशी लागेको छ । संस्कृतको क्षेत्रमा योगदान गर्दै आएका नेपाल र जर्मनीका विद्वान्हरू सम्मिलित भई आयोजना गरिएको यो पहिलो गोष्ठी भएकोले यसको विशेष महत्त्व रहेको देख्दछु । संस्कृतको क्षेत्रमा पाश्चात्त्य विद्वान्हरूमध्ये जर्मनीका विद्वान्हरूले विशेष योगदान दिएका छन् । आज त्यस मुलुकका विद्वान्हरूसँग यो संयुक्त गोष्ठीको आयोजना हुनु त्रिभुवन विश्वविद्यालयका लागि विशेष खुशीको कुरा हो ।

नेपालको पृष्ठभूमिमा संस्कृतको पठनपाठन र विकासलाई विचार गर्दा प्राचीन समयदेखि नै संस्कृतशिक्षाप्रणालीको अटूट परम्परा रहेको पाइन्छ । यही कारण हो कि नेपाली जनजीवन र संस्कृतशिक्षाबीच रहेको सम्बन्ध आज पनि कतिपय दृष्टिले घनिष्ठ र महत्त्वपूर्ण रहेको छ । यसै सन्दर्भलाई अनुभव गरेर नै राष्ट्रिय शिक्षापद्धतिको योजनामा संस्कृतशिक्षालाई आफ्नै विशेष स्थान प्रदान गरिएको छ र त्रिभुवन विश्व-विद्यालयअन्तर्गत एक अलग्गै संस्कृतअध्ययनसंस्थान खडा गरी तल्लो तहदेखि अनुसन्धान तहसम्म पढाइको व्यवस्था गरिएको छ ।

शिक्षायोजनाले संस्कृतशिक्षालाई जुन किसिमको महत्त्व प्रदान गरेको छ, त्यसअनुरूप संस्कृतविद्वान्हरूको सामु केही प्रश्नहरू उपस्थित भएका छन् । संस्कृत-साहित्य विशाल छ र यसको भण्डार अति ठूलो छ । संस्कृतशिक्षाको दीर्घ परम्परा रहेको हाम्रो नेपाल संस्कृतसाहित्यको यति ठूलो भण्डारबाट अझै लाभान्वित हुन सकेको छैन । यस किसिमको सीमित स्थितिबाट संस्कृतशिक्षालाई मुक्त गरी वृहत् समुदायबीच पु-याउनुपरेको छ र यसको निमित्त संस्कृतको ज्ञान सरलीकरण तथा बोधगम्य गराउने-तर्फ विद्वान्हरूको विशेष ध्यान जानु आवश्यक देख्दछु ।

आज एक अर्को प्रश्न उठाउनु पनि अप्रासङ्गिक नहोला भन्ठान्दछु– त्यो हो, संस्कृत-शिक्षातर्फ विद्यार्थीहरूको आकर्षणको विषय । संस्कृतशिक्षातर्फ विद्यार्थी भर्ना क्षीण

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हुँदैछ, जुन शोचनीय विषय कमै मानिसलाई थाहा छ. आज विश्वविद्यालयअन्तर्गत सञ्चालित विभिन्न अध्ययनसंस्थानका कार्यक्रमहरूमा प्रतिविद्यार्थीलागत खर्च सबैभन्दा बढी संस्कृतअध्ययनसंस्थानतर्फ नै पाइएको छ । यस स्थितिमा संस्कृतशिक्षातर्फ गरेको लगानीलाई कसरी फलदायीं तुल्याउने भन्ने प्रश्न प्रमुख रूपमा उपस्थित भएको छ। संस्कृतशिक्षालाई कार्यमूलक गराउने उद्देश्यले सदोपयोगी पाठ्यक्रमको तर्जुमा गर्नुका साथै पठनपाठनमा पनि आवश्यक सुधार गर्नुपरेको छ। संस्कृतशिक्षालाई कार्यमूलक वनाई राष्ट्रिय आवश्यकताको अङ्गको रूपमा कसरी परिणत गर्दै लैजाने भन्ने वारे पनि आज गम्भीरताका साथ सोच्नुपरेको छ।

आज यस गोष्ठीमा संस्कृतका विद्वान्हरू जम्मा हुनुभएको छ। म संस्कृतशिक्षाबारे लामो व्याख्यान गर्ने धष्टता गर्न सक्दिन ! आफूलाई लागेका केही कुरा तपाईंहरूसमक्ष प्रस्तुत गर्ने कोशिश गरेको छु। यसरी प्रस्तुत गर्दा यी प्रश्नहरूबारे तपाईं विद्वान् साथीहरूबाट छलफल भै टोस सुझाव पाउन सक्ने विश्वास लिएको छु। संस्कृतशिक्षाविकासको लागि यस गोष्ठीले व्यापक र उपयोगी दृष्टिकोणको आधारमा समयोचित भूमिका पूरा गर्न सफल हुनेछ भन्ने कुरामा आशा राख्दै गोष्ठीको सफलताको कामना गर्दछु।

The announcer, Prof. Gopal Nidhi Tewari, then requested the participants and guests to proceed to the lawns for a refreshment.

Second Day

1st Kartika, 2035 (18th October, 1978)

First Session **11.00 Hrs–. 12.45 Hrs.**

The session was chaired by Prof. Loka Nath Dhakal of the Balmiki Campus, Institute of Sanskrit Studies, Tribhuvan University, Kathmandu. Mr. Khem Raj Keshav Sharan Upadhyaya, Lecturer at Balmiki Campus, acted as the Announcer. He outlined the proceedings of the session. He then described the rules for the presentation of working papers and discussion on them.

Mr. Keshav Sharan pointed out that the time set aside for the

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

presentation of a lecture was 45 minutes; that after the lecture, written questions in Sanskrit, English or Nepali could be submitted to the chairman by the 15 minutes following the lecture; that questions and answers in Sanskrit or in Nepali would be translated into English and those in English would be translated into Sanskrit or into Nepali.

Mr. Khem Raj Keshav Sharan and Prof. Gopal Nidhi Tewari of the Balmiki Campus assisted the chairman in coordinating and translating the various questions in all the sessions.

Then Prof. Toya Nath Pandeya, Assistant Dean of the Institute of Sanskrit Studies, presented the paper entitled "Some Information on the State of Sanskrit Studies in Nepal", co-authored by him, together with Prof. Gopal Nidhi Tewari and Dr. Deva Raj Paudel of the Curriculum Development Centre of the Tribhuvan University.

After the paper reading, Mr. Keshav Sharan thanked the speaker and the house was opened for discussion.

The questions from Mr. Amir Pandeya, Dr. Michael Hahn, Mr. Rishi Ram Pokhrel, Mr. Radha Krishna Adhikari, Mr. Shri Krishna Acharya, Mr. Dirgha Raj Ghimire, and Dr. Bernhard Koelver were answered.

After the discussion, at the orders of the chairman, the first session come to a close for tea.

Second Day

Second Session **14.15 Hrs. – 16.00 Hrs.**

Mr. Keshav Sharan outlined the proceedings of the session.

Prof. Dr. Michael Hahn, Representative of the Nepal Research Centre at Kathmandu, read out his paper entitled "Sanskrit and Buddhist Studies in the Federal Republic of Germany."

Mr. Keshav Sharan thanked Dr. Hahn for his illuminating lecture. He then invited questions.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Following questions from Mr. G. N. Upadhyaya, Mr. Shiva Gopal Risal, Miss Minoo Rajbhandari, Mrs. Kamala Subedi, Prof. Chuda Nath Bhattaraya, Mr. Rameshwar Sharma, and Mr. Shiva Hari Marahatta, a very lively discussion took place.

Dr. Michael Hahn thanked all for their interesting questions.

Mr.. Keshav Sharan then announced that it was time for the *sastrartha*, i. e. the debate programme.

The same session of the symposium was converted into a public meeting of *sastrartha*. The topic given for *sastrartha* was "The Vedas are not man-made."

A jury headed by Mr. Buddhi Sagar Parajuli was formed. Other members of the jury were Mr. Chhavi Lal Pokhrel; Mr. Durga Prasad Dawadi and Mr. Rameshwar Sharma.

There were two groups, each consisting of two members. The members participating in the motion were.

1. Mr. Bishnu Hari Pande
2. Mr. Keshav Raj Bhattarai

Against the motion :-

1. Mr. Lekhanath Acharya
2. Mr. Govinda Bhattarai.

The gist of the *sastrartha* is given below in Sanskrit:

प्रमेयसिद्धिः प्रमाणाद्धीत्यभियुक्तोक्त्यनुसारं दृश्यस्यादृश्यस्य वा सर्वस्यैव प्रमेयस्य सिद्धिः प्रमाणादेव भवति नान्यथा। तत्र दृश्यप्रमेयप्रमितिः प्रत्यक्षानुमानागमैः प्रमाणैः सम्भूयैकैकशो वा विधीयते। अदृश्यस्य प्रमाविषयस्य प्रमितये तु वैदिकं वाङ्मयं तन्मूलकं शास्त्रमेव वा प्रभवति नान्यत किञ्चिदिति समेषां विपश्चिदपश्चिमानां सिद्धान्तः। न हि सर्वथैवातीन्द्रिये स्वर्गापवर्गादौ प्रत्यक्षं तन्मूलमनुमानं वाऽस्मदादीनां प्रवर्तते। विवादग्रस्तस्यैतादृशविषयस्य निर्णयोऽपि सुचिरकालात् प्रचलितया वैज्ञानिक्या विचारपद्धत्यैव क्रियते याऽऽधुनिकैः शास्त्रप्रतिपाद्यवस्तुतत्त्वनिर्णयक्षमतयोपचारेण शास्त्रार्थ इति परिभाष्यते विद्वद्वरैः। शास्त्रार्थप्रणालीमेवेमां शास्त्रकृतः शास्त्रीयां कथां कथयन्ति। यस्यास्त्रयो भेदाः भवन्ति वादो जल्पो वितण्डेति। तदेतदुदितं वात्स्यायनेन मुनिना –

तिस्रः खलु कथा भवन्ति वादो जल्पो वितण्डेति (न्या० भा०) तन्त्रवार्तिककारेणोद्योतकरेण कथितम् –

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नायं कथानियमः किन्तु विचारवस्तुनियमः। यद् विचार्यते तत् त्रेधा विचार्यते (वादेन जल्पेन वितण्डया वेति)।

वादकथा-

तत्र महर्षिणा गौतमेन वादलक्षणमित्थमुट्टङ्कितम् -

प्रमाणतर्कसाधनोपालम्भः पञ्चावयवोपपन्नः सिद्धान्ताविरुद्धः पक्षप्रतिपक्षपरिग्रहो वादः। (न्या० सू० १।२।१)

सूत्रोक्तलक्षणानुसारं वादिनः प्रथमतः शब्दो नित्यो न वेत्यादि विवादास्पदविषये न्यायसिद्धान्तमवलम्ब्य शब्दोऽनित्यः प्रयत्नजन्यत्वाद् घटवदिति स्वपक्षं स्थापयित्वा प्रयत्नजन्यत्वादित्ययं हेतुर्न हेत्वाभास इति सामान्यतो न बाधितो न सत्प्रतिपक्षितो नानैकान्तिको न विरुद्धो नासिद्धस्तल्लक्षणायोगादिति विशेषतश्च स्वपक्षसाधनस्य निर्दुष्टत्वेनोपसंहारे कृते तत्र कर्ममीमांसासिद्धान्तमवलम्ब्य प्रतिवादी प्रत्यवतिष्ठते।

प्रतिवादी- वादिन्!

भवदुक्तो हेतुर्न युक्तः स्वरूपासिद्धत्वात्। शब्दाभिव्यञ्जकमुच्चारणमेव प्रयत्नजन्यं न तु शब्दस्तथा तस्य नित्यत्वेनोच्चारणद्वाराभिव्यक्तत्वाद् यथा प्रदीपो विद्यमानमेव घटादिकं प्रकाशयति तथोच्चारणमपि सत एव शब्दस्याभिव्यञ्जकं न तूत्पादकमिति वादिपक्षं प्रदूष्य स्वपक्षं स्थापयति-

शब्दो नित्यः श्रावणत्वाच्छब्दत्ववदिति।

यथा शब्दत्वं श्रावणत्वान्नित्यं तथा शब्दोऽपि श्रावणत्वान्नित्य इति शब्दनित्यत्वसाधकस्य श्रावणत्वसाधनस्यास्य बाधादिसर्वदोषरहितत्वेन न दुष्टत्वम्। अतो निर्दुष्टेनानेन साधनेन शब्दस्य नित्यत्वमेव युज्यते न तु भवदुदितमनित्यत्व तत्साधनस्य निर्दुष्टत्वाभावादिति।

ततस्तृतीयकक्षामाश्रित्य पुनर्वादी प्रतिवादिदत्तस्वपक्षदूषणं समुद्धृत्य प्रतिवादिपक्षं दूषयति।

ततश्चतुर्थकक्षायां स्थित्वा पुनः प्रतिवादी वादिनोक्तं स्वपक्षदूषणं समुद्धृत्य वादिपक्षं प्रदूषयति।

एवंरीत्या कथयँस्तावत्प्रचलति यावत्तत्त्वनिर्णयो न जायते। तत्त्वनिर्णयानन्तरं तु स्वत एव समाप्ता भवति तत्त्वनिर्णयफलकत्वाद् वादकथायाः।

अत एव तत्त्वजिज्ञासुकथा वाद इत्यपि तल्लक्षणं वर्णयन्ति। अस्यां कथायां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रमाणाभासतर्काभासयोर्वा प्रमाणमेव तर्क एव वेति बुद्ध्यैव प्रयोगः कर्तुं शक्यते न तदाभासत्वबुद्ध्या । हेत्वाभासन्यूनाधिकायसिद्धान्तादीनि तत्त्वनिर्णयाविरोधीनि कानिचिन्निग्रहस्थानान्येव प्रयुज्यन्ते न सर्वाणि नापिच्छलादीनि । तत्त्वनिर्णयार्थं द्वाभ्यां विद्वद्वराभ्यां वादिप्रतिवादिभ्यामेवापीयं कथा प्रवर्तयितुं शक्यते । सभायां मध्यस्थादीनां च नात्राऽऽवश्यकता ।

जल्पकथा–

परस्परविजयैषिणौ वादिप्रतिवादिनौ पक्षप्रतिपक्षपरिग्रहेण यां कथां कुरुतः सा जल्प इति कथ्यते । अस्यां कथायां सर्वाणि निग्रहस्थानानिच्छलादीनि च यथासंभवं प्रयुज्यन्ते ।

अत एव यथोक्तोपपन्नश्छलजातिनिग्रहस्थानसाधनोपालम्भो जल्प इति जल्पलक्षणं व्यधायि महर्षिणा । (न्या० सू० १।२।२)

अस्यां प्रमाणाभासतर्काभासत्वेन ज्ञातयोरपि प्रमाणतर्कयोर्विजयलाभाय प्रयोगः कर्तुं शक्यते । इयमपि कथा स्वपक्षमण्डनपरपक्षखण्डनद्वारा वादरीत्यैव प्रवर्तते ।

वितण्डाकथा–

यत्र प्रतिवादी स्वपक्षस्थापनं विनैव विजिगीषया परपक्षं विहन्ति सा कथा वितण्डेति भण्यते । अत एव तल्लक्षणतया–

स (जल्पः) प्रतिपक्षस्थापनाहीनो वितण्डेति सूत्रमसूत्रयत् सूत्रकारः ।

(न्या० सू० १।२।३)

जल्पवितण्डयोरुभयोर्विजिगीषुकथात्वेनाविशेषेऽपि प्रतिपक्षस्थापना तद्धानाभ्यां विशेषः । अत एव–

उभयपक्षस्थापनावती विजिगीषुकथा जल्पः ।

प्रतिपक्षस्थापनाहीना विजिगीषुकथा वितण्डेत्यपि तल्लक्षणं वर्णयन्ति विपश्चितः । यथोपवनस्यावनार्थं कठोरकण्टकशाखाभिरपि तस्याऽऽवरणं विधीयते तथैव तत्त्वज्ञान-संरक्षणार्थं तत्त्वज्ञैरपि जल्पवितण्डे विधेये इति शास्त्रे तदुपदेश इत्यवधेयम् ।

विजिगीषुकथायां जयपराजयप्रविवेचनार्थं सभाया अप्यावश्यकता भवति । सा चानुविधेयस्थेया सभ्यपुरुषवती जनता सभेति (न्यायसूत्रवृत्तौ) विश्वनाथन्याय-पञ्चाननेन लक्षिता । तत्रानुविधेयोऽध्यक्षो राजादिः । स्थेयान् मध्यस्थः साक्षीत्यर्थः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लोकव्यवहारेऽपि सर्वत्र विवादास्पदविषयस्य निर्णयः पूर्वनिर्दिष्टशास्त्रार्थप्रकारानुकरण-प्रणाल्या सुचिराद् विधीयते स्म । अधुनाऽपि तदर्थं सैव प्रणाली स्वीक्रियते सर्वत्र (सम्भाव्यते च पश्चादपि सुचिरमनुवर्तिष्यते) । लोकेऽपि पूर्वपक्षिणं वादिनमुत्तरपक्षिणश्च प्रतिवादिनं कथयन्ति । मध्यस्थाः साक्षिणो वादिप्रतिवादिनोर्वादप्रतिवादौ श्रुत्वा यथोचितनिर्णयकारिणश्चाध्यक्षं न्यायाधीशं कथयन्ति । तदनेनानुकृतेन सर्वत्र प्रचलितेन पुरातनेन लोकव्यवहारेण शास्त्रार्थप्रणाल्याः प्राचीनतरत्वमभिव्यज्यते ।

तदस्यां संस्कृतविद्वद्गोष्ठ्यां समुपस्थापिते शास्त्रार्थे उपरि निर्दिष्टानां कथा-भेदानां दिग्दर्शनमेव विहितम् । तत्र वादिपक्ष आसीद् वेदः पौरुषेय इति । यद्यपि पौरुषेयत्वं पौरुषेयत्वेन सामान्यतः पुरुषप्रणीतत्वमेवान्यथा दृष्टान्तस्य साध्यहीनत्व-प्रसङ्गात् । तथापि वेदस्य पक्षीकृतत्वात् पक्षधर्मताबलादधिकरणसिद्धान्तन्यायेन यादृश-पुरुषस्य वेदप्रणयनसंभवस्तादृशस्य नित्यत्वसर्वज्ञत्वादिविशिष्टस्यैव पुरुषविशेषस्य परमेश्वरस्य सिद्धिर्भवति । अनुमानस्थले प्रायशो विशिष्टस्यैव साध्यस्य सिद्धेरभ्युपगमात् । अत एव कुसुमाञ्जलौ कार्यायोजनेत्यादीश्वरसाधनेषु वाक्यग्रहणमपि सङ्गच्छते ।

वेदोऽपौरुषेय इति प्रतिवादिपक्षेऽपौरुषेयत्वं तु मीमांसकप्रभृतिभिरभ्युपेतं नित्यत्वमेवेति ।

At the end of the *Sastrartha*, Prof. Loka Nath Dhakal delivered the following speech from the chair.

समुपस्थिता विद्वांसोऽधिकारिणश्छात्राश्च ।

नेपाल-जर्मनीराष्ट्रयोरेवेतिहासे सर्वप्रथमं सम्पद्यमानाया नैपालक-जर्मनविद्वद्गोष्ठ्याः सन्दर्भेऽद्यतनोपवेशे सम्पन्नान् विचारविमर्शान् विलोक्य श्रुत्वा च मोमुद्यते मच्चेतः। सहभागिभिर्विद्वद्भिः सोत्साहं साभिरुचि च स्वकीया विचाराः प्रकटिताः। एतादृशेन विचारेण प्रसङ्गेन च संस्कृतशिक्षाया उन्नत्यै प्रचाराय प्रसाराय च महत् साहाय्यं भवतीति दृढतरो मे विश्वासः। एतादृशविचारविनिमयकार्येण विशेषतः संस्कृतशिक्षणविधौ नवीनता शिक्षकाणां मनसि विशेषाध्ययन औत्सुक्यं चोदेतीति नास्ति सन्देहावसरः। परन्त्विदमत्रावश्यमवधेयं भवति यत् संस्कृतस्याधिकप्रचारप्रसारार्थं सरलीकरणेन सहैव शास्त्रीयपरिपाट्या अपि संरक्षणमत्यावश्यकं प्रतीयते । शास्त्रीयपरिपाटीसंरक्षणेन विना संस्कृतवाङ्मयस्य तन्निष्ठसूक्ष्मचिन्तनानाञ्च संरक्षणसम्बद्धं नाभिलाषोऽवश्यमेव दूरङ्गतो भवेत् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पुनश्च–

जर्मनीदेशवास्तव्यानां विदुषां नेदानीमेव संस्कृतेऽभिरुचिर्जागरितापितु प्राचीन समयादेव संस्कृतस्याध्ययनानुसन्धानकर्मणि तत्रत्य विद्वांसो निरता एवासन् । फोस्तरगेटे-मोक्षमूलरप्रभृतीनां विदुषां संस्कृतक्षेत्रे महद्योगदानं विलोक्य तदाख्यातुं शक्यत एव । आधुनिकप्रविधिमनुसृत्य संस्कृतस्यानुसन्धाने जर्मनविदुषां नेपालापेक्षयाऽग्रेसरत्वं वर्तत एव । शास्त्रीयपरिपाटीमनुसृत्य संस्कृतस्याध्ययनेऽपि तत्रत्यानां मनीषिणां प्रगाढाऽभिरुचिरदम्य उत्साहश्च मदनुभवविषयीभूतो जातः। तत्रत्येन डाक्टरेण प्राध्यापकेन (अल्ब्रेट वेज्लर) महोदयेन विदुषा जयन्तभट्टविरचिताया न्यायमञ्जर्याः प्रमेयप्रकरणस्याध्ययनं मत्सकाशाच्छास्त्रीयपरिपाटीमनुसृत्येव संपादितम् । अपरस्मिन्वर्षे प्रमाणप्रकरणमपि किञ्चिदधीतम् । अस्मिन्वर्षेऽपि तत्रभवता तस्यैव ग्रन्थस्य प्रमाणप्रकरणस्य पिपठिषा प्रकटिताऽऽसीत् । परन्त्वस्यामेव गोष्ठ्यां प्रस्तोष्यमाणकार्यपत्रनिर्माणविधौ संलग्नतया मया सोऽभिलाषः पूरयितुं नाशक्यत । एतेन प्रसङ्गेनापि जर्मनीदेशवासिनां विदुषां संस्कृतवाङ्मयप्रियत्वं प्रमाणी भवति । अस्मिन्सन्दर्भे उभयोर्देशयोर्विदुषां सम्पद्यमानाया गोष्ठ्या अतीवौचित्यं प्रतिभाति नात्र कापि विचिकित्सा ।

अन्ते च–

एतावत्कालपर्यन्तं सभायामुपस्थाय स्वकीयानि बहुमूल्यविचारविमर्शजातानि प्रदाय चाद्यतनीं सभां सफलयितुं महत् साहाय्यं कुर्वद्भ्यः समुपस्थितेभ्यः समेभ्यो नैपालक-जर्मन-विद्वद्भ्यः शास्त्रार्थकारकेभ्यश्छात्रेभ्योऽन्येभ्यश्च शतशो धन्यवादान् वितरामि । अस्तु ।

The session was concluded for the day.

Third Day

2nd Kartik, 2035 (19th October, 1978)

First Session — 11.00 Hrs. -12.45 Hrs

The day's proceedings were conducted under the chairmanship of Dr. Bernhard Koelver, Professor at the University of Kiel, West Germany.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Dr. Oskar von Hinueber, Professor at the University of Mainz, West Germany, presented his lecture on "Remarks on the Textual Problems in Editing Anonymous Sanskrit Literature."

After the presentation of the paper, Mr. Keshav Sharan thanked the speaker for his elucidating lecture. Then the house was opened for discussion.

The questions were from Mr. Shiva Hari Marahatta, Mr. Rameshwar Sharma, Prof. Ramchandra Paudel, Mr. Amir Pandeya, Prof. Chuda Nath Bhattaraya, Mr. Durga Prasad Dawadi and Prof. Saraswati Prasad Ghimire, and were answered by Dr. Hinueber.

After the discussion the session was adjourned for tea.

Second Session

14.15 Hrs. –16.00 Hrs.

Prof. Loka Nath Dhakal read out the paper on "Traditional Studies of Sanskrit in Nepal" prepared by a group consisting of himself, Mr. Khem Raj Keshav Sharan Upadhyaya and Mr. Shiva Hari Marahatta, lecturers at Balmiki Campus.

Mr. Keshav Sharan thanked the speaker and the house was opened for discussion.

Questions from Mr. Dinesh Raj Pant and Dr. Adalbert Gail were answered.

Prof. Dr. Bernhard Koelver then delivered his speech from the chair. Following is the text of his speech:

Gentlemen, I feel our very special thanks are due to today's lecturers. I may say that Prof. Loka Nath Dhakal's lecture was particularly fascinating to us. We really know that Nepal is *Mahat Kendram* of Sanskrit studies, as he tells us. We have known this from inscriptions and manuscripts all along. And today we have heard how it all came about and how the result has come to be achieved. Now, compared to your tradition, Sanskrit studies in our country are very young indeed. As Prof. Hahn had been saying yesterday, they are only about 160 years old. When Sanskrit came to our universities

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

and was incorporated in our syllabus, then of course, our universities employed teaching methods which at that time were habitual in our country. And this teaching does not include speaking Sanskrit, a problem which, I take it, worries you. As one of my colleagues said yesterday, now, if we were to launch speaking Sanskrit in our country who would they speak to ? This is a certain problem. Still, I think, we have achieved well what could be done in such a short time of our Sanskrit studies. You may know that the first editions of your very ancient books – the first edition of the *Rigveda*, the *Samveda* and the *Yajurveda* – were all done by the German scholars and they were all done in the last century, as well as many other Sanskrit books.

At the present time, and on this occasion, when we are meeting here, two traditions very different from each other are trying to fuse, or to unite. This will not be quite easy and there may be difficulties and misunderstandings on both sides. Yet we are united in the love of your tradition, which is the lifework of all of us. So, I am sure, we shall overcome difficulties. Prof. Loka Nath Dhakal has just now told us how we should work. We should work with *jijnasa* and with *manasa ekagrata*. Let us do this. Thank you.

The discussion was concluded for the day. Then *Suskesti* was performed.

After theoretical study, mock *yagas* are performed in order to give practical training of the *yagas*. It is called *Suskesti*. In *Suskesti* all the hymns are recited, all the requisites are furnished, all the rituals are performed as in the real *yagas*, but only the holy fire is not lit. In Nepal the Institute of Sanskrit Studies, aiming at the preservation of the *yagavidya*, has been continuing the process of *Suskesti* among its various extracurricular activities. The Vedic Professor, Soma Nath Paudel, and others exhibited the performance of the *Suskesti* successfully in a decent way which was highly appreciated by foreign scholars as well as by the distinguished guests.

The prominent personalities present to observe the *Suskesti* were Honourable Chairman of the Rastriya Panchayat, Mr. Ram Hari Sharma, Honourable member of the Rastriya Panchayat, Mrs.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Angoor Baba Joshi, Vice-Chancellor of the Tribhuvan University, Mr. Jagat Mohan Adhikari, Rector of the Tribhuvan University, Dr. Kamal Prakash Malla, and Registrar of the Tribhuvan University, Mr. Gopal Dhoj Shrestha.

The *Traivarnikas* (Brahmanas, Ksatriyas and Vaisyas) are instructed to take the holy fire named *Sabhya* and the three other fires called *Garhpatya Agni*, *Ahavaniya Agni* and *Daksina Agni*. They should perform *Agnihotra* every morning and evening as well as the *Yagas Paurnamasa* and *Darsa* in the *Purnima* and *Amavasya* (i. e. full moon and new moon). The *Paurnamasa Yaga* is mentioned the first among the *Srauta Yagas*. The performance of this *Yaga* lasts two days. But because of the limitation of time, only the main formalities were accomplished.

The Partners:

1. Brahman – Prof. Soma Nath Paudel, Balmiki Campus, Kathmandu.
2. Hotr – Mr. Jnan Chandra Acharya, a Sanskrit student in Diploma level.
3. Adhvaryu – Prof. Balmiki Paudel, Balmiki Campus, Kathmandu.
4. Yajamana – Prof. Damodar Koirala, Balmiki Campus, Kathmandu.
5. Agnidhra Mr. Dibya Chandra Acharya, a Sanskrit student in Purva Madhyama level.

Pandit Tirth Raj Acharya, a famous Agnihotri in Nepal, was collaborator in various activities of the *Suskesti* and Mr. Rishi Ram Pokhrel was the announcer.

Below the gist of the *Suskesti* is given in Sanskrit:

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पूर्णमासयागः (शुष्केष्टिरूपः)
यागोऽयं सर्वकामधुक्

प्रसङ्गः–

२०३५तमविक्रमसंवत्सरस्याऽऽश्विनमासस्यैकत्रिंशत्तमदिवसादारभ्य कार्तिकमासस्य पञ्चमदिवसपर्यन्तं संस्कृताध्ययनसंस्थानस्याऽऽयोजने प्रचलितायां संस्कृतविद्वद्गोष्ठ्यां समुपकल्पितेषु विविधकार्यक्रमेष्वन्यतमोऽयं शुष्केष्टिरूपः कार्यक्रमः ।

शुष्केष्टिपरिचयः–

वैदिकयज्ञक्रियाकलापस्य विधिवदध्ययनानन्तरं प्रयोगज्ञानाय शिष्यप्रशिक्षणार्थं तथा वैदिकयज्ञक्रियाकलापानां परिचयेप्सूनाञ्च कृत ऋतुकालादिनियमान् विधिविहिताग्निदीपनादिकांश्च कृत्यान् विहाय केवलं मन्त्रपाठहस्तक्रियाद्रव्यसंयोगमात्रं समधिकृत्य विहितो यागः शुष्केष्टिपदेन व्यवह्रियते । अत्र हि पूर्णमासेष्टेः कांश्चन प्रधानभूतानंशानधिकृत्येयं शुष्केष्टिः प्रस्तूयते ।

सम्बन्धः–

तत्र श्रौताग्निषु यियक्षुणा त्रैवर्णिकेन जातपुत्रः कृष्णकेशोऽग्नीनादधीतेति विधिचोदिते समये वसन्तादि ऋतुषु सभ्याग्निना सह गार्हपत्याहवनीयदक्षिणाग्निनामधेयास्त्रयोऽग्नयो यथाविधि ग्रहीतव्याः । तदारभ्य नैरन्तर्येण तेषां धारणञ्च विधेयम् । तत्र यावज्जीवं सायंप्रातरग्निहोत्राख्यं कर्म दर्शपूर्णमासादिपर्वसु दर्शेष्टिः पूर्णमासेष्टिश्चानुष्ठीयेते । तयोर्मध्ये सर्वासामिष्टीनां प्रकृतिभूतः श्रुतौ च प्राथम्येन समुपदिष्टः पूर्णमासयागः (स च यागो विविधैरङ्गकलापैः परिबृंहितो दिनद्वयसाध्यश्चास्ति) । अस्मिंश्च यागे पञ्चदशसामिधेन्यः (प्रवोवाजाहविष्मन्त आदयः) ।

पञ्चप्रयाजाः– समिधो यजति । तनूनपातं यजति । इडो यजति । बर्हिर्यजति । स्वाहाकारं यजति ।

त्रयोऽनुयाजाः– देवोर्बर्हिः । देवोनराशंसः । देवोऽग्निः ।

त्रयः प्रधानयागाः– आग्नेयोऽष्टाकपालः । अग्नीषोमीय उपांशुयागः । अग्नीषोमीय एकादशकपालोऽनुष्ठिताः ।

सामिधेनीभिर्ऋग्भिः प्रज्वलितेऽग्नौ प्रयाजादीन् यागाननुष्ठाय प्रधानयागार्थं महावेद्यामाहवनीयसन्निधौ यथास्थानं पुरोडाशपात्र्यां पुरोडाशद्रव्य ध्रुवाख्य स्रुचि घृतरूपं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

हविश्च सन्निधाय यागार्थं सन्नद्धेषु ब्रह्मादि ऋत्विक्षु प्रयोगः समारभ्यते।
प्रयोगः—

अध्वर्युः— होतारमभिलक्ष्य—

अग्नयेऽनुब्रू३हीति प्रैषमन्त्रमुच्चैरुच्चारयति । ततो होता देवताह्वानरूपां पुरोऽनुवाक्यां तारस्वेरण पठति ।

अस्मिन्नेवावसरेऽध्वर्युर्जुह्वामष्टाकपालेषु संस्कृतं पुरोडाशं चतुरवन्तं संगृह्योत्थायाऽऽग्नेयीं दिशं प्रयाति, तत्र यजति स्थाने तिष्ठन्—

"आ ३ श्रा ३ वय" इत्युच्चैराग्नीध्रं प्रेषयत्येवं प्रेषितोऽग्नीध्र— "अस्तु श्रौ ३ षट्" इति निगदमुच्चारयति ।

पुनरध्वर्युः— यजनीयदेवस्याग्नेर्नामोच्चारणपूर्वकम् "अग्नि यज" एवं रूपेण याज्यामन्त्रपाठार्थं होतारं संप्रेष्य होत्रा च याज्यामन्त्रान्ते "वौ ३ षट्" एवमुक्त एव जुह्वां गृहीतं हविरग्नौ प्रक्षिपत्यध्वर्युः ।

ततो नैर्ऋत्यकोणे स्थितौ यजमानो हुतस्य हविषः "इदमग्नये न मम" एवं रूपेण द्रव्यत्यागं विदधाति ।

अनया रीत्याऽऽश्रावणप्रत्याश्रावणपूर्वकमन्ये च यागाः समनुष्ठिताः । ब्रह्मा च सर्वमिदं कृत्यं सावधानेन निरीक्षमाण आस्ते कदाचिद् विधौ वैपरीत्ये जाते प्रायश्चित्तं विदधाति, ऋत्विजश्च सूचयति ।

अस्या आश्रावणप्रत्याश्रावणप्रक्रियायाः संग्राहकः श्लोकश्चतुर्भिश्च (आश्रावय) चतुर्भिश्च (अस्तु श्रौषट्) ।

द्वाभ्यां (यज) पञ्चभिरेव च । (ये यजामहे) हूयते च पुनर्द्वाभ्यां (वौषट्) स मे विष्णुः प्रसीदतु । इति ।

एवं प्रधानयागे समाप्ते सर्वैर्ऋत्विग्भिर्यजमानेन च हुतावशिष्टं हविः सोपह्वानं भक्ष्यते । अस्यैव कर्मणोऽन्यत्र च यजमानपञ्चमा इडां भक्षयन्तीति चर्चा दृश्यते ।

श्रीमद्भगवद्गीतायामिदमेव हुतावशेषं हविरभिलक्ष्य यज्ञशिष्टाशिनः सन्तो मुच्यन्ते सर्वकिल्बिषैरित्युक्तमनेनास्य हविषः पुण्यातिशयवत्वं सूचितम् ।

अन्ते च— सर्वैर्ऋत्विग्भिः संभूयाग्नीनां प्रदक्षिणपूर्वकं नमस्ते गार्हपत्याय, नमस्ते दक्षिणाग्नये ।

नम आहवनीयाय महावेद्यै नमो नम इति स्तवनं विधाय शान्तिकाध्यायपाठो जटादिविकृतीनां पाठश्चैकस्वरेण विहितः । इत्थं पूर्णमासयागस्य दिङ्मात्रमिह प्रदर्शित-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मितोऽधिकं जिज्ञासुभिर्विद्वद्भिः शतपथब्राह्मणस्य हविर्यज्ञकाण्डं विलोकनीयम् ।

अयं शुष्केष्टिरूपो यागः पूर्वोक्तसंस्कृतविद्वद्गोष्ठ्यां वेदशिक्षणसमितेः प्राध्यापकैश्छात्रैश्च संभूयानुष्ठितः ।

In the evening, His Excellency the Ambassador of the Federal Republic of Germany, Dr. Karl Maes, organised a reception to meet the participants of the Symposium.

Fourth Day

3rd Kartika, 2035 (20th October, 1978)

First Session **11.00 Hrs.– 12.45 Hrs.**

The day's proceedings were conducted under the chairmanship of Prof. Toya Nath Pandeya.

Dr. Harideva Mishra, Professor at the Sanskrit Instruction Committee at Multi–Purpose Campus, Kirtipur, Tribhuvan University, presented his lecture entitled "Sanskrit Sikshan and Anusandhan in Nepal". prepared by a group consisting of himself, Mr. Vidyanath Upadhyaya, and Mr. Vishnu Raj Atreya, lecturers at the Balmiki Campus.

After the presentation of the paper, Mr. Keshav Sharan thanked the speaker and the house was opened for discussion.

The discussion arising out of the questions from students, Dr. Adalbert Gail, Mr. Rameshwar Sharma and Dr. Michael Hahn, could not take place because of limitation of time.

It was tea time and the session was closed till the afternoon.

Fourth Day

Second Session **14.15 Hrs. – 16.00 Hrs.**

Prof. Dr. Michael Hahn was invited to present his lecture.

Prof. Dr. Hahn expressed his hope that his paper could at least rouse some interest from the participants because he had depended mainly on manuscripts from Nepal in the preparation of his paper. Dr. Hahn, who had earlier on 035.7.1 presented one of his papers, then presented his other paper entitled "Hari Bhatta and Gopa Dutta: two authors in the succession of Aryasura".

Mr. Keshav Sharan thanked Dr. Hahn for his lecture. The house was then opened for discussion.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

A lively discussion followed, with questions from Mr. Dinesh Raj Pant, Prof. Saraswati Prasad Ghimire, and Mr. Durga Prasad Dawadi.

After the discussion, Prof. Toya Nath Pandeya delivered his speech from the chair.

Prof. Pandeya thanked the speakers of the day, Dr. Mishra and Dr. Hahn. The text of his speech in Sanskrit is given below:

श्रीमन्तो जर्मनविद्वांस उपस्थिता विशिष्टविद्वांसश्चाद्यास्माकं जर्मनविद्वद्भिः सह मधुरसमागमस्य चतुर्थो दिवसोऽस्मिन् दिवसे डा० हरिदेवमिश्रमहोदयस्य नेपाले संस्कृताध्ययनमनुसन्धानं चेति नामकं तथा जर्मनविदुषः प्रा० डा० मिषायल हान महोदयस्य हरिभट्टो गोपदत्तश्चाऽऽर्यशूरपरम्परायां द्वौ ग्रन्थकाराविति नामकं च प्रवचनपत्रमस्माभिः श्रुतम् । तद्विषयमवलम्ब्य प्रश्नोत्तरकार्यक्रमश्च सुसंपन्नः । जर्मनविदुषामाधुनिकः प्रविधिरत्रत्यविदुषां प्रौढपाण्डित्येन सह समन्वितः स्यात्तदाऽवश्यमेवोभयोर्देशयोर्महाँल्लाभः स्यात् । आशासे च भविष्यत्येवं भविष्यति । अन्ते प्रवक्तृमहाभागौ सभाया मर्यादामवलम्ब्य विराजमानान् सभ्यान् साधुवादान् व्याहरामि । सभां चात्रैव विसृजामि ।

Mr. Keshav Sharan then reminded the participants about the public lecture by Prof. Dr. Bernhard Koelver at the Goethe Institute and about the reception.

Then the session concluded for the day.

Fifth Day

4th Kartika, 2035 (21st October, 1978)

First Session **11.00 Hrs. – 12.45 Hrs.**

The day's proceedings were conducted under the chairmanship of Dr. Oskar von Hinueber, Professor at the University of Mainz, West Germany.

Dr. Adalbert Gail, Professor at the University of Berlin, presented his paper on "Planets and Pseudo-planets in Sanskrit Literature and Art, with special reference to Nepal."

Mr. Keshav Sharan thanked Dr. Gail for his interesting lecture and the house was opened for discussion.

An interesting discussion followed with questions and comments from Mr. Dinesh Raj Pant, Mr. Hari Prasad Gautam, Prof. Saraswati Prasad Ghimire and Mr. Samba Raj Acharya.

After the discussion, the house was adjourned for tea break.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Second Session **14.15 Hrs. – 16.00 Hrs.**

Mr. Saraswati Prasad Ghimire, Reader at the Kirtipur Multi-purpose Campus, presented the paper entitled "Survey of the Problems Dealt with in Recent Research in the Field of Sanskrit in Nepal", prepared by a group consisting of Mr. Ghimire himself, Mr. Baburam Pokhrel and Mr. Durga Prasad Dawadi, lecturers at the Balmiki Campus.

Mr. Keshav Sharan thanked Mr. Ghimire for his lecture and opened the house for discussion.

Following questions and comments from Dr.A.Gail, Dr.Hahn and Dr.Mishra, an interesting discussion took place.

Then the chairman of the day, Dr. Oskar von Hinueber, delivered his speech. Following is the text of his speech:

As I have the privilege of acting as chairman today, it is a pleasure for me to thank both our speakers of today. This morning Dr. Gail has shown us the very interesting way how the evidence of ancient Sanskrit texts can be combined with the findings of the history, of art, of sculptures, as found in temples, specially here in Nepal, and thus gaining new data for the history of Astronomy. Professor Ghimire, in the afternoon, has given us another outline of Sanskrit studies here in Nepal, not only showing the problems involved, but at the same time showing what can and should be done in future. I think the very lively discussion here has shown sufficiently the high interest the audience took in these two topics. As it is the last day todav, where we have heard lectures, I should not only thank all of you, who have given a lecture here, or have taken part in the discussion, but I want to thank especially one gentleman, that is Mr. Khem Raj Keshav Sharan, standing beside me, who had taken upon himself the pain of translating from Sanskrit into English and from English into Sanskrit. So thank you all.

Mr. Keshav Sharan then made announcement about the Cultural Programme in Sanskrit that was to be held the same evening. He also informed the participants that the concluding session would start at 9 a. m. the next morning.

The session was then adjourned for the day.

In the evening, a Cultural Programme was organized.

Present on the occasion – Asst. Minister, etc.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Sixth Day

5th Kartika, 2035 (22nd October 1978)

Concluding Session **09.00 Hrs. – 11.00 Hrs.**

The session started with Vedic recitation by Prof. Soma Nath Paudel and Prof. Balmiki Paudel.

The chief guest at the ceremony was Honourable Chairman of the Rastriya Panchayat, Mr. Ram Hari Sharma, other guests being Honourable Assistant Minister for Education, Mr. Hiralal Vishwakarma, and Vice-Chancellor of the Tribhuvan University, Mr. Jagat Mohan Adhikari.

To conduct the activities of the august assembly, Mr. Keshav Sharan proposed Prof. Ambika Prasad Adhikari, the Dean of the Institute of Sanskrit Studies of TU, to preside as the Chairman.

Amidst clapping from all the participants, Prof. Adhikari took the chair of the session.

On the occasion, Mr. Chhabilal Pokhrel spoke on behalf of the Nepali participants. Following is the text of Mr. Pokhrel's speech in Sanskrit:

ॐ ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् । तेन त्यक्तेन भुंजीथा मा गृधः कस्य स्विद्धनम् ॥

श्रीमन्तः समादरणीया अध्यक्षमहोदयाः !

तथा प्रधानातिथयः सम्माननीया राष्ट्रियपञ्चायताध्यक्षमहोदयाः !

समभ्यागता विद्वांसो विदुष्यश्च ।

अत्र वक्तुमवसरप्रदानेन प्रोत्साहितोऽहमायोजकेभ्यो धन्यवादान्समर्पयन् वक्तुमारभमाणोऽस्मि । अत्र विद्वद्भिर्महता यत्नेन विचारपत्राणि सज्जीकृत्य प्रस्तुतानि ! तदवलोक्य तत्र तत्र विषये विचारविमर्शाश्च विहिताः ।

आदिकालादारभ्य संस्कृतपठनपाठनानुसन्धानादिषु कार्येषु संलग्नानस्मानेषा नेपाल-जर्मनविद्वद्गोष्ठी नवीनयापि दृष्ट्याऽनुसन्धानादिषु प्रेरयिष्यतीत्याशा विद्यते ।

अस्माकं वेदसमयविषये नानाविधेषु मतेषु सत्स्वप्यति प्राचीनो वेद इत्यत्र प्रायेण सर्वेषामैकमत्यं विद्यत एव । चिरन्तनोऽपि वेदः सर्वमानवसापेक्षो नवीनां स्फूर्तिं वितरति, तथा स्वभावेनैव व्यक्तिगतभोगेष्वाकृष्टान् सर्वान् मानवानुपदिशति, यच्छृण्वन्तु पुत्राः– विश्वेऽमृतस्य पुत्राः । मित्रस्य चक्षुषा सर्वाणि भूतानि समीक्षन्ताम्, मित्रस्य चक्षुषा समीक्षामहे, यत्र विश्वं भवत्येकनीडम्, कृण्वन्तो विश्वमार्यम्, एकं सद् विप्रा

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वहुधा वदन्ति, चरन् सन् मधु विन्दति, चरैव चरैवेत्यादिभिस्तत्र तत्रस्थिते- रसंख्यैर्मन्त्रैरुपदिशन्नुद्बोधयति ।

यजुर्वेदस्यान्तिमेन चत्वारिंशत्तमेनाध्यायेनैव गीतोक्तं कर्मज्ञानोपासनादिकं बीजभूतम् "ईशावास्यमिदं सर्वम्" "कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः" इत्यादिभिरुक्तम् । ऋग्वेदस्यान्तिमेन सूक्तेन च सर्वान् मनुष्यान्नुदिश्य युष्माकमेका समितिर्भवतु तद्वारासंघटितै- र्युष्माभिः परस्परं विचारस्याऽऽदानप्रदानाभ्यां सत्कर्मणा सर्वेषां मानवानामुन्नतये यतितव्यमित्यादिकं सङ्गच्छध्वं संवदध्वं समानो मन्त्रः समितिः समानीत्यादिभिर्मन्त्रै- रुपदिश्यते । अन्तिमेन च– समानमस्तु वो मनो यथा वः सुसहासतीति मन्त्रेण यथा युष्माकं सहास्तित्वं स्यात्तथा समानता वो विधेया इत्युक्तम् ।

तदनुसारेण पुराणेतिहासस्मृतिदर्शनादिषु च– सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः । सर्वे भद्राणि पश्यन्तु मा कश्चिद् दुःखभाग्भवेदित्यादिना सर्वेषां मानबानां सद्भावनाज्ञानाधायकः सत्यज्ञाननिधिर्वेदोऽनेकेषामाक्रमणकारिणां विध्वंसकानामाघातेभ्यो नानाविधैरुपायैरेतद् वैज्ञानिकयुगपर्यन्तं रक्षितः सन् सर्वेभ्यो ज्ञानपिपासुभ्यो मानवेभ्यो वितीर्यमाणो विद्यते ।

सर्वेभ्यो विद्वद्भ्यो विदुषीभ्यश्च धन्यवादान् समर्पयन् विरमामि ।

ॐ विश्वानि देव सवितर्दुरितानि परासुव । यद्भद्रं तन्न आसुव ।।

Then Dr. M. Hahn spoke on behalf of the participating German delegates. Following is the text of his speech:

Your Excellency, learned scholars, dear friends and colleagues, at this moment I feel inclined to begin my speech with a modification of the French saying "the king is dead, long live the king", a modification which in this case would sound:

naipalaka- jarmana- Samskrta-vidvad-gosthi samapta,

naipalaka- jarmana-samskrta-vidvad-gosthi cirayur bhavet.

The meaning of this saying is that although something very important and valuable is nearing its end just now this does not mean a definite end because what is ending now is only a part of a greater entity that should be continued without interruption. It might be too early to draw general conclusions about the possibilities and limitations of Nepal-German cooperation in the field of Sanskrit, but if we confine ourselves to this first symposium we cannot but say that it has become a success far beyond our most optimistic expectations. Due to the self denying and never-ending efforts of so many scholars and their helpers from the Nepali side

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

the whole programme of this conference as agreed between the two parties in the preparatory sessions was held according to schedule without any delay, without any change, not to speak of possible major disturbances. To organize a conference of this calibre with more than one hundred participants is always a very difficult task, but in this special case the existing problems sometimes seemed to be unsurmountable for the following reasons. The decisive period of the preparation of the symposium began only at the 1st of October when the new representative of the Nepal Research Centre took over his post. Unfortunately two days later the Dasain holidays began which lasted till the 15th of October, only two days before the conference was to be opened. Thus the major part of the preparation had to be done at a time when many offices were closed and most of the prospective helpers were on leave.

The second major obstacle to successful progress of the symposium was that some of the working papers to be read arrived only very late, for one reason or another. The work done by the translators from Sanskrit into English and from English into Sanskrit or Nepali had to be executed under extreme pressure of time. Yet all the eight working papers as well as public lectures from the German side were translated and mimeographed in time which was essential for the success of the meeting. Thus our most sincere thanks are due to those who sacrificed many hours of their sleep for translating, typing, and cyclo-styling the various contributions to the symposium. In this connection I should also like to repeat the thanks expressed by Dr. Oskar von Hinueber to Prof. Khem Raj Keshav Sharan for the excellent services rendered by him to all participants of the symposium by his quick and reliable translations from Sanskrit into English and *vice versa*.

As to the lectures themselves and to the vivid discussions which followed them, we should try to see them in the right light. The lectures were primarily meant to inform each other about the present state of Sanskrit studies in the respective countries and about the methods how these studies are carried out. Nobody can and will deny that there are some fundamental differences between your way and our way to deal with Sanskrit literature. Therefore, all we could hope to achieve during this symposium was the beginning of mutual understanding. For a full understanding of each other there is still a long way to go. This was shown quite obviously by our sometimes very long and emotional discussions. You certainly will remember that I myself put forward a great number of critical and– at least to your ears- even provocative questions. I took the right for asking these questions first from the fact that I was asked in a similar manner after my first lecture and second from the conviction that only the revelation of differing standpoints can lead to a higher synthesis for mutual benefit.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

While stating our different methods and views there is one thing we should never forget: it is always easy to point to the weakness of the other side— you may mention our very poor command of spoken Sanskrit and our defective knowledge with regard to the living culture of Hinduism and Buddhism; we could mention that you almost completely disregard 150 years of western scholarship in the field of Sanskrit studies. But it would be more useful and also more meritorious if we try to appreciate what has been achieved by the other side and what is worthwhile to be preserved or adopted. This of course presupposes that at least some scholars from both sides devote some time and effort to enter deeper into the other party's methods. If there is the sincere wish for such an exchange of views and a sincere belief that this might become fruitful-which would not be the case if one side is convinced that the other side will never understand their methods-then the frame-work for an exchange of publications and for an exchange of both scholars and students should be worked out in near future. The first steps in this diretion could be undertaken as early as to-day.

On behalf of the German scholars I should like to renew our heart-felt thanks to everybody – be it only by his very presence – who took part in making this first symposium of Nepali and Sanskrit scholars a success, above all to the Dean of the Institute of Sanskrit, Prof. Ambika Prasad Adhikari, who always in a very friendly and noble way took into consideration the wishes and suggestions from the German side. A better way of cooperation could not have been thought of. We have to thank once more to all the chairmen and to the readers of the working-papers. We were especially pleased about the interesting and informative programme that was offered to us besides the official programme: the *Sastrarthapradarsana*, the *Suskestipradarsana* and the beautiful Cultural Programme last night for which you had to work very hard. Your general hospitality and respect paid to us was so overwhelming that we shall never forget it; we pray for an opportunity to retaliate this hospitality to you one time in our country. We earnestly hope that differing opinions with regard to any single question will never affect the regard and sympathy for each other both as a scholar and as a person.

May this Symposium of Nepali and German Sanskrit scholars become the first of a long series and may it later be called the beginning of very fruitful cooperation, a co-operation which will benefit not only both sides but above all the common cause: the immortal heritage of Sanskrit culture.

Bhuyamso dhanyavadah

The Honourable Assistant Minister for Education, Mr. Hiralal Vishwakar-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ma, was then requested to make his speech. Following is the text of his spech:

आदरणीय सभापति महोदय,
सम्माननीय राष्ट्रिय पञ्चायतका अध्यक्षज्यू,
त्रि. वि. का उपकुलपति,
उपस्थित संस्कृतका विद्वान्,

आज यहाँहरूको समक्ष संस्कृतविद्वद्गोष्ठीको यो विसर्जनसमारोहमा केही शब्दहरू व्यक्त गर्न पाउँदा अत्यन्तै हर्ष लागेको छ । यसको गतिविधिहरूमा शुरूदेखि नै भाग लिने मेरो पनि प्रबल इच्छा थियो । म काठमाडौँमा नभएको अवस्था परेकोले मैले यसको उद्घाटनसमारोह र अन्य कतिपय यसका गतिविधिहरूमा सहभागी बन्न असमर्थ भएँ र त्यसको निमित्त म स्वयं नै दुःखी छु । आज हाम्रो देश जो हिन्दू धर्म र संस्कृतको पावनभूमि हो । संस्कृतमा मानिसहरूको आकर्षण र विश्वास निरन्तर बढ्दै गइरहेको छ र त्यस्तो मुलुकमा मित्रराष्ट्र जर्मनीका संस्कृतका विद्वान्हरू र हाम्रो राष्ट्रको संस्कृतका विद्वान्हरूको सामुन्ने गोष्ठी हुनु निश्चय पनि हामी सबैको निम्ति ज्यादै गौरव र खुशीको कुरो हुन गएको छ । हामीले हाम्रो मुलुकको परम्परा, दर्शन, उपनिषद्, गीता र परम्परा यावत् कुराहरूलाई हेर्ने हो भने संस्कृतले निरन्तर यसलाई प्रेरणा, गति, दिशा प्रदान गरेको स्पष्ट रूपले हामीले अनुभव गरेका छौँ । वास्तवमा हाम्रो मुलुकले यस संस्कृतको धाराबाट संस्कृतको प्रवाहबाट संस्कृतको चिन्तनबाट अलग राखेर आफ्नो बेग्लै अस्तित्व परिकल्पना गर्‍यौँ भने त्यो सम्भव होला भने जस्तो मलाई लाग्दैन । यसै हुनाले पनि यसको राष्ट्रिय महत्त्व र उपादेयता हाम्रो समाजमा ज्यादै स्पष्ट भएर आइराकेको छ । मलाई लाग्दछ, हाम्रा जर्मन विद्वान्हरू जो यहाँ पाल्नुभयो, यसले यसप्रति विशेष महत्त्व राखेको छ । राष्ट्रिय स्तरमा मात्र होइन, अन्तरराष्ट्रिय स्तरमा पनि प्रतिष्ठाशाली हुन थालेको छ भन्ने कुरा स्पष्ट रूपले हाम्रो अगाडि हुन गएको छ, वास्तवमा आज हामीले हेर्‍यौँ भनेदेखि धेरै मुलुकहरूमा जहाँ कतिपय यूरोपका देशहरूमा म भ्रमणमा जाँदा मैले पनि देखेँ, त्यहाँ पनि मानिसहरूले हाम्रो संस्कृत

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाङ्मयको अध्ययन गर्ने, चिन्तन गर्ने, मनन गर्ने, अनुसन्धान गर्ने र त्यसको निचोड निकालेर आजको समाजलाई पनि एउटा निर्दिष्ट दिशातर्फ लगेर संसारमा शान्तिको साम्राज्य कसरी स्थापना गर्न सकिन्छ, मानवसमाजमा सर्वोपरि हित कसरी गर्न सकिन्छ, मानवस्वतन्त्रता र प्रतिष्ठालाई अक्षुण्ण राखेर निरन्तर यो समाजलाई कसरी अग्रगामी वनाउन सकिन्छ भन्ने कुरामा निरन्तर त्यहाँ पनि मानिसहरू चिन्तनशील भएको पाइयो । यी सबै गतिविधिहरूबाट संसारमा निरन्तर रूपले बढ्दो आकर्षण आयो । संस्कृतप्रति जुन आकर्षण देखिएको छ, त्यसले गर्दा यसको अन्तरराष्ट्रिय चरित्र र स्वरूप पनि हाम्रो अगाडि स्पष्ट हुन गएको छ । हिजोसम्म हामीले संस्कृतलाई आफ्नै राष्ट्रिय महत्त्व र विशेषताले मात्रै हेरिराखेका थियौं, तर आज यसले एउटा अन्तरराष्ट्रिय महत्त्व र विशेषता पनि प्राप्त गरेको छ र त्यसको आकर्षण निरन्तर बढ्दै गएको छ । यसले पनि तपाईं हामी यस क्षेत्रमा काम गर्ने, यस क्षेत्रमा अभिरुचि राख्ने, यस क्षेत्रका विद्वद्वर्गहरूमा अझ वढी मात्रामा एउटा उत्साह र प्रेरणा प्रदान गरेको होला जस्तो मलाई लाग्छ। निश्चय पनि यो तपाईं हामी सबैले कदर गर्ने योग्य किसिमका कुराहरू आज हुन गएका छन् । हामीले पनि हाम्रै देशमा अहिले संस्कृतशिक्षालाई ज्यादै ठूलो महत्त्व प्रदान गरेका छौं । हुनत कतिपय क्षेत्रवाट यसको आलोचना पनि भयो । जति यसले प्रतिष्ठा पाउनुपर्थ्यो, जति महत्त्व पाउनुपर्थ्यो, जस्तो यसको स्थान हुनुपर्थ्यो, राष्ट्रिय क्षेत्रमा त्यो हुन सकेन भन्ने किसिमको गुनासो र चर्चा-परिचर्चाहरू पनि ठाउँठाउँमा सुन्ने अवसर पाइएको छ । परन्तु यस क्षेत्रको एउटा शिक्षामन्त्रीको नाताले म यहाँहरूलाई स्पष्ट विश्वास दिलाउन चाहन्छु कि अहिलेसम्म हामीले जे जति प्रयासहरू संस्कृतको विकासको निम्ति गरिराखेका छौं, जस्तो किसिमको एउटा योजनाबद्ध रूपमा यसलाई संचालन गर्ने र यसलाई अझ विकसित रूप दिने, यसलाई अझ आधुनिकीकरण गर्ने, यसलाई समाजोपयोगी व्यापक अवसरहरू प्रदान गर्ने किसिमका प्रयासहरू आफ्नै स्तरवाट गरिराखेका छौं । त्यसलाई हेर्दा मलाई लाग्दछ, श्री ५ को सरकार शिक्षामन्त्रालयले संस्कृतशिक्षामा संस्कृतभाषामा संस्कृतज्ञानलाई महत्त्व दिएको छैन भनेर भन्नु त्यति समयोचित होला जस्तो मलाई लाग्दैन । किनभने अहिले तपाईं हामी सबैलाई थाहा छ कि हामीले चौधै अञ्चलमा

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बडो योजनाबद्ध रूपमा संस्कृत माध्यमिक विद्यालयहरू संचालन गरेर जिल्लाहरूमा पनि आवश्यकता हेरी आयस्तालाई बढाउँदै लैजाने र देशमा संस्कृतअध्ययनसंस्थानले राम्रो किसिमले काम गरिरहेको छ र यसका अन्य कतिपय क्याम्पसहरू देखिएका पनि छन्। सबै कुराहरू हेर्दाखेरि हामीलाई स्पष्ट हुन्छ कि हामीले कसरी संस्कृतलाई महत्त्व दिएर गएका छौं। र यसलाई हाम्रै किसिमका समाजको उपयोगी तलैदेखि यसलाई माथि उठाएर लैजाने र समाजको सबैलाई यसमा व्यापक अवसर पाउने तथा कुनै जात जातिको पेवाको रूपमा मात्रै संस्कृतज्ञान र शिक्षा नभई रहोस् र समाजकै अभिन्न अङ्गको रूपमा, समाजका विचार र आकाङ्क्षाको प्रतीकको रूपमा यसले अरू विकसित चरित्र र रूप लिन सकोस् र यो सबैको निम्ति फलदायी पनि हुन सकोस् भन्ने व्यापक दृष्टिकोण राख्ने, व्यापक अवसर दिने र हिजोको यससम्बन्धी धारणामा एउटा व्यापक परिवर्तन र सुधार ल्याएर यसलाई नयाँ मोड दिने सम्बन्धमा पनि हाम्रा प्रयत्नहरू भइराखेका छन्। त्यस कुराबाट यहाँका उपस्थित सबै विद्वद्-दर्गहरू गुरुजनहरू अवगत नै हुनुहुन्छ। त्यसो हुनाले पनि म यहाँहरूको पनि धेरै समय लिन चाहन्नँ। यसको महत्त्वको एउटा संक्षिप्त प्रकाश मैले पारें। मलाई लाग्छ, हाम्रा जर्मन मित्रराष्ट्रका विद्वान्हरू तथा हाम्रा यहाँका विद्वान्हरूले पनि हाम्रा यावत् पक्षहरूमा पाइने जे जति छन्, वेदवेदान्त भए, धर्महरू भए, उपनिषद् भए, यसका विविध पहलुहरू, अनेक पक्षहरू जे जति छन्, त्यसमा निश्चय पनि विचार भएकै होला। हाम्रो अनुसन्धान भएकै होला। यसले अरू यसलाई गतिशील रूपमा स्वस्थ रूपमा अगाडि बढ्ने राम्रो किसिमको अरू त्यस्तो वातावरण अनुकूल पार्न तयार गरेको होला भन्ने मैले विश्वास लिएको छु। हामीले हाम्रा विचारहरूमा पनि अलिकति नयाँ धारणाहरू नल्याईकन अब संस्कृतलाई समाजको अहिलेको आवश्यकताअनुरूप, समाजको अहिलेको आकाङ्क्षाअनुरूप समाजको अभिन्न अङ्ग तुल्याउनमा र यसलाई सर्वोच्च स्थानमा पुऱ्याउनको निमित्त गाह्रो पर्छ। त्यसो हुनाले हाम्रा धारणा र विचारहरूमा पनि परिवर्तन गरेर यसमा पनि त्यस्तै किसिमका सुधार-हरूलाई प्रक्रियाहरूलाई अगाडि बढाउँदै हामीले जान सक्यौं भनेदेखि मलाई लाग्छ, निश्चित रूपले आजसम्म समाजमा यसको जस्तो सर्वोपरि स्थान रहेको छ र भोलि पनि गएर त्यो

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सर्वोपरि स्थान यथावत् रहेर निरन्तर यस क्षेत्रलाई सबैले प्रेरणा र निर्देशन दिने काम भइरहनेछ भन्ने कुरामा कुनै शङ्का छैन। यसो हुनाले त्यसतर्फ हाम्रो ध्यान जाओस् भन्ने कुराको आशा राख्दै अन्तमा हाम्रो गोष्ठीका आयोजकहरू यस गोष्ठीमा भाग लिने सहभागीहरू सबैलाई पनि हार्दिक धन्यवाद र कृतज्ञता ज्ञापन गर्दै मेरा आफ्ना केही शब्दहरू यहाँ समाप्त गर्दछु।

जय नेपाल, जय नरेश।

The chief guest of the day, Honourable Ram Hari Sharma, was then requested to deliver his speech. Following is the text of his speech:

अद्य नैपालकजर्मनसंस्कृतविद्वद्गोष्ठ्याः समापनसमारोह उपस्थातुं लब्धावसरोऽत्यन्तं प्रमुदितोऽस्मि। एतस्यावसरस्य प्रदान आयोजकान् धन्यान् वदन्नस्मिन् प्रसङ्गे कंचिद् विचारं प्रस्तोतुकामोऽस्मि।

अस्माकं संस्कृतेर्मूलं संस्कृतम्। तस्य मर्मज्ञानाय पठनपाठनपूर्वकमनुसन्धानकार्यक्रमप्रगतेरत्यन्तमावश्यकता वर्तते। संस्कृतवाङ्मयं देशभक्ते राजभक्तेः पितृभक्तगुरुभक्तेरप्यादर्शं शिक्षयति। रामायणं भ्रातृप्रेम्णो बन्धुत्वस्य राजभक्तेः प्रजावात्सल्यस्य च समुज्ज्वलं परिणामं प्रस्तौति। महाभारतं च बन्धुविग्रहस्य दुःखदं कर्तव्यपरिपालनस्य सुखदं चोदाहरणं दर्शयति। पौरस्त्यदर्शनानि राज्ञः सर्वोपरिनेतृत्वं राजसंस्थायाः सनातनत्वं च सूचयन्ति। प्राचीनैरर्वाचीनैश्च विश्वामित्रयाज्ञवल्क्यजनकजानकीबुद्धप्रभृतिभिरस्मत्पूर्वजैः प्रवर्तितैर्दर्शनैः परिष्कृताऽस्माकं संस्कृतिरस्मान् बिश्वात्मभावेन विश्वशान्त्यै बिश्वकल्याणाय च सदा प्रेरयन्तो वर्तते। एनादृशसंस्कृतिमूलाया राष्ट्रियताया उन्नयने परमसहायकस्य संस्कृतस्य विकासाय श्री ५ महाराजाधिराजस्य वीरेन्द्रवीरविक्रमशाहदेवस्य महती सदिच्छा वर्तते। तस्याः सफलीकरणाय त्रिभुवनविश्वविद्यालयस्य तत्परता संस्कृताध्ययनसंस्थानस्य सक्रियता श्री ५ राजकीयशासनस्य चिन्तनानि च नेपाले संस्कृतस्योज्ज्वलं भविष्यं सूचयन्ति।

अत्र च गोष्ठ्यां प्रस्तुतेषु कार्यपत्रेषु विदुषां प्राच्यविद्यापण्डितत्वमनुसन्धानोन्मुखा विचाराश्च प्रेरयन्ति। यन्नेपाले संस्कृतविद्याया उत्तरोत्तरं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

समुन्नयनाय राष्ट्रेण राष्ट्रवासिभिश्च फलावसायी प्रयत्नः कर्तव्य एवेति ।

संस्कृतवाङ्मयस्यानुसन्धाने क्रमिकीं सफलतां लब्धवतां जर्मन-मित्राणां नेपाले जायमाने संस्कृतस्य विकासाभियानेष्वभिरुचिं वीक्ष्य प्रसन्नहृदयः सौहार्दभरितान् धन्यवादानुपहरामि ।

अस्या गोष्ठ्याः सफलीकरणाय कृतप्रयत्नान् सहभागिनः सहयोगिनश्चा-भिनन्दयन् धन्यान् वदामि ।

एतस्या गोष्ठ्याः समुदर्कः संस्कृतविकासाय समर्थो भवेदिति शुभमाशासे । मित्रस्याहं चक्षुषा सर्वाणि भूतानि समीक्षे । मित्रस्य चक्षुषा समीक्षामहे ।

Thereafter, the chairman of the session, Prof. Ambika Prasad Adhikari, was requested to deliver the speech from the chair.

Following is the text of his speech:

सर्वैर्विदितचरमेव संस्कृतस्य विश्वविसृमरं गौरवम् । अस्य विकासायास्माभिः स्वकीयपद्धत्या विधीयमानेऽपि शिक्षणेऽनुशीलनेऽनुसन्धाने चाऽऽधुनिकप्रविधिनाऽप्यनुसन्धा-नादीन्यप्याऽऽवश्यकानीति प्रतीयतेऽधुनातनैः सर्वैर्विद्वद्भिः । किंचास्माभिः पूर्वतः प्रवर्त्यमाने संस्कृतविकासाभियाने नैपालकजर्मनसंस्कृतविद्वद्गोष्ठ्या मधुरः सरसश्च नवोऽध्यायः स्थापितः । विद्वद्भिरत्र सुविचिन्त्य हृदयेन विचाराः कार्यपत्रैः प्रस्तुताः । सहभागि-विद्वद्भिः कार्यपत्रेषु निष्पक्षतामाश्रित्य ससौहार्दं मतानि प्रकटितानि । कार्यक्रमेणानेन बहवो विषया ज्ञानपथमायाताः । प्रज्ञाया विकासे परिधिविस्तारचिन्तने च गोष्ठ्याऽनया श्लाघ्यः सहयोगः प्रत्तः इति मे विश्वासः ।

अपि च वयं नेपालवासिनः स्वीयां राष्ट्रियसंस्कृतिं हृदयेन संमानयामः । सर्वेषां धर्माणां सर्वासां च संस्कृतीनां वयं समादरं कुर्मः । स्वभावोऽयमस्माकं राष्ट्रियसंस्कृते-रभिन्नमङ्गम् । संस्कृतिमेनां तन्मूलां च संस्कृतविद्यां वर्धयितुं विकासयितुं वयमग्रेसराः स्मः । समयेऽस्मिन् सर्वैरप्यस्माभिः संस्कृतसेविभिः संस्कृतविद्यासागराज्ज्ञानविज्ञानरत्ना-न्युध्दृत्य तेषामालोकोऽभितो विश्वं प्रसारणीयः । अनादेः कालात् प्राच्यस्नेहपूरितोऽद्यत्वे प्रतीच्यस्नेहेनाप्यनुदीप्यमानः सोऽयं प्रज्ञारत्नदीपो देदीप्यमानो विश्वं तमसो ज्योतिर्गमयतु । असतः सद्गमयतु । मृत्योश्चामृतं गमयतु । अत्रैव संभूय प्रयासः सर्वैः कर्तव्यः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतं सर्वत्र संस्कृतमेव । नेदं देशभेदेन कालभेदेन वा भिद्यते विश्वजनीनं संस्कृतमिदं देशं कालं चात्येति। विश्वमानवानेकस्यां मालायां ग्रथ्नदिदं संस्कृताभिधं शाश्वतं सूत्रमत्रभवतो जर्मनसुहृदोऽस्मांश्च सदैव सङ्गमयति, संवादयति, प्रत्येकं मनांसि संबोधयति च।

संगच्छध्वं संवदध्वं संवो मनांसि जानतां, देवा भागं यथा पूर्वं संजानाना उपासते।

अत्यधिककार्यव्यस्ततायामप्यस्माकं विनम्रमनुरोधं स्वीकृत्य स्वकीयेन ज्ञान-गरिमगुरुणा विचारेणास्माननुगृहीतवद्भ्यः सम्माननीयेभ्यो राष्ट्रियपञ्चायता-ध्यक्षमहोदयेभ्यः श्रीमद्भ्यो रामहरिशर्ममहाभागेभ्यो माननीयेभ्यो महोदयेभ्यो गुरुवरेभ्यः सहकर्मभ्यः सहयोगिभ्यश्च सर्वेभ्यः सबहुमानं कृतज्ञतामुपहरामि।

ॐ स ह नाववतु स ह नौ भुनक्तु । सह वीर्यं करवावहै ।
तेजस्विनावधीतमस्तु मा विद्विषावहै ।

ॐ तत्सत् ।

Then Vice-Chancellor, Prof. Jagat Mohan Adhikari, presented gifts of respect to the German scholars amidst applause from the house. The gifts consisted of, among other things, woollen *Doshalla* (shawl) and *Bhadgaunle* cap of the Nepali tradition.

The Assistant Dean of Institute of Sanskrit Studies, Mr. Radha Krishna Adhikari, expressed his vote of thanks enumerating all those who had worked to make the symposium a success in the following words:

आदरणीयाः सभापतिमहाभागाः ! सम्माननीया राष्ट्रियपंचायताध्यक्षमहाभागाः ! समादरणीया उप-कुलपतयो जर्मनीदेशतः समागता विद्वांसोऽन्ये समादरणीया गुरवः सहभागिनश्छात्राश्च ।

अद्यास्माकं महान् प्रमोदस्यावसरो यदद्य नेपाले प्रथमेयं नैपालक-जर्मन-संस्कृतविद्वद्गोष्ठी सम्पन्ना। अस्यां च गोष्ठ्यां समागतैर्विद्वद्वरैः स्वं स्वमभिमतमनुल्ल-ङ्घितमर्यादपरिधिपुरःसरं प्रकटीकृतं तत्र च विचारविमर्शो जातः । सम्यक्तया सुसाधुतया सम्पन्नेयं गोष्ठीति मे प्रतिभाति । अत एवात्र गोष्ठ्यां स्वकीयं स्वकीय-ममूल्यमपि समयं प्रदाय बहुकालपर्यन्तं समुपस्थाय यैर्विद्वद्वरैण्यैर्विचारः प्रत्तः । विशेषतो जर्मनीदेशात् समागता ये विद्वांसस्ते धन्यवादार्हाः । यद्यपि सर्वैश्चैव कृतज्ञता प्रकटीकृता-स्मत्पूर्ववक्तृभिरपि धन्यवादज्ञापनं च विहितं तथाप्यस्मदध्ययनसंस्थानप्रतिनिधि-रूपेणाहं धन्यवादान् वितरन् कृतज्ञतां च व्यनज्मि । आदावस्माक राष्ट्रियपंचायताध्यक्ष-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

महाभागेभ्यो यैः कार्यान्तरव्यस्ततायां सत्यामपि समयं प्रदायास्माकमनुरोधमङ्गीकृत्यात्र प्रमुखातिथेरासनमलङ्कृतमिति शतशो धन्यवादान् वितरामि, कृतज्ञतां च व्यनज्मि। तथैव शिक्षासहायकमन्त्रिमहाभागेभ्योऽपि धन्यवादान् वितरामि कृतज्ञतां च व्यनज्मि। अस्माकमादरणीयैरुपकुलपतिमहाभागैरत्र समुपस्थायास्या गोष्ठ्याः शोभा संवर्द्धितेति तेभ्यो महाभागेभ्योऽपि धन्यवादान् वितरामि कृतज्ञतां च व्यनज्मि। सहैवास्माकं विद्वद्वरेण्येभ्यो यैरत्र भागो गृहीतो भूयो भूयो धन्यवादान् वितरामि। तथैव नाटकप्रदर्शनसम्बन्धिकार्ये धन्यवादार्हाः सहयोगिनः– राजकीयप्रज्ञाप्रतिष्ठानं, सांस्कृतिकसंस्थानं, श्रीरत्नराज्यलक्ष्मी विद्यापीठं, राष्ट्रियसंग्रहालयः, सनातनधर्मसेवासमितिः, प्रहरिप्रधानकार्यालयश्छात्रावासीयच्छात्रपरिवारोऽस्यैव वाल्मीकिविद्यापीठस्य छात्रपरिवारो नाटकप्रदर्शनोपसमिति-सदस्याः, सहैव नाटकाभिनेतारः सर्वे कलाकारा अन्ये सहयोगिनश्च ये सन्ति ते सर्वे धन्यवादार्हा इत्येवमभिधाय तेभ्यो धन्यवादान् वितीर्यात्रैव विरमामि।

By the order of the chairman, the session was declared concluded.

A working committe consisting of 16 members of both sides was formed. The committee met at 2 p. m. the same day at Balmiki Campus and having discussed the related matters passed a resolution for the development of Sanskrit and came to the conclusions with regard to future programmes.

Following is the English text of the resolution:

The working committe of the first Symposium of Nepali and German Sans-krit scholars organized on October 22nd, 1978, (2035-7-5) came to the following conclusions with regard to future programmes:

PREAMBLE

1. In the cultural heritage of Nepal, Sanskrit is the most important single element. In order to preserve this cultural heritage and in order to further the national identity of the Nepali people, an extension of Sanskrit studies is necessary.
   a) In order to effect this, Sanskrit should be taught from the fourth grade onwards in the field of general education continuing up to the Diploma level.
   b) Furthermore, education in *Karmakanda* and *Jyautisa* should be extended and formalized along the same principles as education in other subjects.

JOINT RESOLUTION

2. Both Nepali and German Sanskrit scholars are convinced of the necessity of an exchange between the traditional methods of Sanskrit studies used in Nepal and the western methods of research.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

a) This exchange of methods is most efficiently effected by an exchange of scholars, of students, and of books.

b) As a first step in this cooperation, a German visiting Professorship of Sanskrit should be established in Nepal in order to make Nepali Sanskritists familiar with western methods of Sanskrit studies so as to effect a reconciliation between traditional and modern methods. With the same aim in view a visiting professor of Sanskrit should come from Nepal to Germany. Such exchange should be established on student level as well.

3. After a preparatory period of exchange of research methods in the field of Sanskrit, joint ventures between Nepali and German scholars should be started. Possible fields of cooperation are:
   a) Study of Vedic rituals: comparison of Sanskrit texts and modern practice.
   b) Study of *Karmakanda* texts.
   c) Edition of Sanskrit texts concerning iconography.
   d) Edition of the various recensions of the *Svayambhupurana* and of other important Buddhist texts.
   e) Study of *Jyautisa* texts.
   f) Study of tantric texts and rituals.

4. As to the exchange of literature, German authorities should be asked to present to Nepal an essential collection of books and journals on Sanskrit and likewise Nepali publications on Sanskrit should be sent to Germany.

Kathmandu, 24. 10. 1978 (2035-7-7)

WORKING COMMITTEE

The working committee met in the afternoon of the last day. It was attended by the following:

1. Mr. Ambika Prasad Adhikari, Dean, Institute of Sanskrit Studies.
2. Mr. Toya Nath Pandeya, Asst. Dean, Institute of Sanskrit Studies.
3. Mr. Radha Krishna Adhikari, Asst. Dean, Institute of Sanskrit Studies
4. Mr. Siddhi Nath Gautam, Chief of Janata Campus, Dang
5. Mr. Bala Krishna Upadhyay, Chief of Yagnavalkya Lakshmi Narayan Campus Matihani.
6. Mr. Tara P. Sharma, Chief of Pindeshwar Campus, Dharan
7. Mr. Loka Nath Dhakal
8. Dr. Haridev Mishra
9. Mr. Buddhi Sagar Parajuli

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

10. Mr. Khema Raj Keshav Sharan
11. Mr. Saraswati Prasad Ghimire
12. Mr. Vidya Nath Upadhyay
13. Dr. Michael Hahn
14. Dr. Adalbert Gail
15. Dr. Oskar von Hinueber
16. Dr. Bernhard Koelver

The working committee discussed matters relating to mutual cooperation in the development of Sanskrit in Nepal. The working committee then unanimously passed a resolution. The participating Nepali members of the committee authorised the following delegates to sign the resolution on behalf of the Nepali participants:

1. Mr. Ambika Prasad Adhikari
2. Mr. Toya Nath Pandeya
3. Mr. Saraswati Prasad Ghimire
4. Mr. Vidya Nath Upadhyaya
5. Mr. Khem Raj Keshav Sharan

The resolution was drafted both in English and Sanskrit and was signed by the above mentioned Nepali delegates and the three German delegates, Dr. M. Hahn, Dr. Koelver, and Dr. A. Gail.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपालराष्ट्रे संस्कृताध्ययनस्य स्थितिः

प्रस्तोतार :

तोयनाथपाण्डेयः (संयोजकः)
गोपालनिधितिवारी (सदस्यः)
देवराजपौडेलः (सदस्यः)

परिचयः

हिमालयान्निःसरन्तीनां कृष्णाकौशिकीप्रभृतीनां तरङ्गिणीनां परमपवित्रैर्जलैराप्यायिते नयनाभिरामे, विद्याधीशेन गिरीशेन सर्वविद्यामय्या स्वया शान्तया तन्वा सर्वदा कृतपरिरक्षणे श्री ५ वीरेन्द्रवीरविक्रमशाहदेवपरिपालितेऽस्मिन् हिन्दुराष्ट्रे नेपालाधिराज्ये संस्कृतवाङ्मयस्याऽध्ययनस्य स्थितिः कीदृशी चेति विषयोऽस्यां नेपालजर्मनयोः सर्वप्रथमं जायमानायां संस्कृतगोष्ठ्यां प्रस्तूयते ।

प्राक्कथनम्

मन्त्रद्रष्टॄणां याज्ञवल्क्यविश्वामित्रादीनां नेपालवासिनां समयादेव नेपाले वेदविद्याध्ययनस्य सुदृढा स्थितिरासीत् । तस्मिन् समये लौकिकसंस्कृते निर्मितानां याज्ञवल्क्यस्मृत्यादीनां व्यवहारग्रन्थानां च दर्शनाद् राष्ट्रेऽस्मिन् संस्कृताध्ययनस्य स्थितिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सुरम्येति निश्चीयते। सुरभारतीपरिशीलनस्थितिः प्राचीनसमयादद्यपर्यन्तं विविधरूपाऽपि कदाप्यत्र विच्छिन्नतां न प्राप्तेति तु निश्चप्रचमेव वर्तते । संस्कृताध्ययनस्य स्थितिः स्थानविशेषानुसारेण गुरुकुलपरम्परया तथा गुरोर्वैयक्तिकपरिपाट्या च संभूतेति प्रतिभाति । वंशपरंपरया च विविधविषयाः पुत्रपौत्रादिभिः पितृपितामहादिभ्यः समधीता इति ज्ञायते। नेपाले प्राचीनकाले संस्कृताध्ययनं मुख्यरूपेण प्रचलितमिति तथाऽऽधुनिकसमयेऽपि नवीनरूपेण प्रचलदस्तीति तस्य स्थितिः कार्यपत्रेऽस्मिन् दर्श्यते।

नेपाले संस्कृताध्ययनस्थितेः प्राचीना पृष्ठभूमिः

वैदिकं लौकिकं च द्विविधमपि संस्कृतवाङ्मयमेव नैपालकानां शिक्षितानां प्राचीनसमये विद्यास्पदीभूतमासीत्। कतिपये राजानो विद्वांसश्च संस्कृताध्ययनादेव प्रख्यातकवयो मनीषिणस्तथा ग्रन्थकाराश्चाऽभूवन् । पश्चादपि किरातलिच्छविमल्लसमयेषु संस्कृताध्ययनस्य स्थितिरुत्तरोत्तराभिवृद्धिं प्राप्ता। उपलब्धानां किरातकालिकशिवलिङ्गानां वैदिकपद्धत्याधारे पूजासंचालनं तथा लिच्छविकालिकराजवंशपरिचायकादीनां बुद्धकीर्त्यादीनां संस्कृतपद्यादीनामाधारे किरातलिच्छविकालिकसंस्कृताध्ययनस्थितिः सुरम्येति दर्शयितुं शक्यते। चीनयात्रिणो युवान्च्वाङ्गस्योल्लेखानुसारं नेपाले व्याकरणविषयकग्रन्थस्य रचनया व्याकरणपद्धत्यनुसारं संस्कृतस्याऽध्ययनस्य रुचिरासीदिति तात्कालिका स्थितिर्ज्ञायते । प्रौढपाण्डित्यसंवर्धनात्मिकाऽध्ययनस्थितिरासीदिति हाँडीग्रामनाम्नि स्थाने लिच्छविवंश्यभूपालवसन्तदेवसमकालिकपण्डितानुपरमनिर्मितो व्यासस्तुतिरूपः शिलालेखः प्रमाणयति। पुनश्चाऽद्य शंकराचार्यात् पूर्वमत्र वेदान्तदर्शनाध्ययनस्य स्थितेरपि पुष्टिं करोति। चन्द्रगोमिना चान्द्रव्याकरणस्य निर्माणं लिच्छविशासनकालेऽत्रैव विहितमिति तथ्ये व्याकरणाध्ययनस्य प्राधान्यमपि सूचयति। लिच्छविवंश्यैः राजभिः स्वस्य राष्ट्रवासिनां च हिताय विहितानां मन्दिरनिर्माणदेवतास्थापनसेतुनिर्माणादीनां तथा विशेषज्ञादीनां च संसूचनाः परिमृष्टायां संस्कृतभाषायां दत्ता इत्येतावता तस्मिन् समये संस्कृताध्ययनस्य स्थितिः सार्वजनिकीति ज्ञायते। अधुना लिच्छविकालिका नवत्यधिकशत(१९०)मभिलेखा उपलभ्यन्ते संस्कृतभाषायां गद्यपद्यमय्यां समुत्कीर्णाः[1] । लिच्छविकालिकी राजभाषा संस्कृतभाषैवासीत्[2] ।

युवान्च्वाङ्गाख्येन चीनयात्रिणा स्वकीये यात्राविवरणाख्ये पुस्तके समुल्लिखितं

१. एतेषां संकलनं व्याख्यानं च त्रिभुवनविश्वविद्यालयस्योपप्राध्यापकेन श्रीधनवज्रवज्राचार्येण विहितस्तेनैव विश्वविद्यालयेन प्रकाशितं च ।

२. "लिच्छविकालका अभिलेख" पृ. ४६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विद्यते[3] – पौरस्त्यामार्यसंस्कृतिं सम्यग् बुभुत्सुभिर्वैदेशिकैः सर्वप्रथमं संस्कृतभाषाऽध्येतव्येति यतो हि संस्कृतभाषाज्ञानमन्तरेण पौरस्त्यसंस्कृतेः सम्यग्बोधो नैव शक्यसंपादः। तत एवेदमपि ज्ञायते यत् संस्कृतमधीयानेन च प्रथमं तावत् पाणिनीयमष्टाध्यायी-व्याकरणं सम्यगध्येतव्यमभिधानकोशश्चेति। तदनु ग्रन्थान्तराध्ययने मार्गः प्रशस्तो भवति। ततः शेषैः पञ्चभिर्वेदाङ्गैः स्मृत्याऽऽगमेन धर्मशास्त्रेण रामायणमहाभारताभ्यां पुराणैश्च सार्धं वैदिकवाङ्मये प्रवेष्टव्यमिति। अस्यां प्रणाल्यां संस्कृताध्ययनं ग्रन्थानां शुद्धस्वरोच्चारणपूर्वकं तथा कण्ठस्थीकरणपूर्वकं च प्राचलदिति ज्ञायते।

त्रयोदश्याः शताब्द्या मध्यकालतो मल्लवंश्यानां राज्ञां शासनेऽपि संस्कृतवाङ्मय-शिक्षैव प्रधानरूपेण प्रचलिता। तदानीन्तनसंस्कृताध्ययनस्थितिश्च प्रौढाऽऽसीत्। यतो हि नैपालाः पण्डितास्तदा भारतीये विक्रमशीलविश्वविद्यालयादिषु तन्त्रशास्त्रादीनां प्राध्यापका अभूवन् तथा बौद्धधर्मशाखायास्तत्र तत्र प्रचारे महान्तं सहयोगमकुर्वन्[4]। मल्लकालिकानां संस्कृतनाटकादीनां[5] च सत्तया संस्कृतवाङ्मयस्याऽध्ययनपरंपरा ऽविच्छिन्ना प्राचलदिति निश्चीयते।

नवीनशिक्षापद्धतिसंचालनतः पूर्ववर्तिनी संस्कृताध्ययनस्थितिः

पूर्वसमयतोऽनिवार्यरूपेण प्रचलिता संस्कृतशिक्षा पञ्चविंशत्यधिकाष्टादशशततम-(१८२५)वैक्रमाब्दतोऽपि शाहराज्यसमयप्रारम्भतो मुख्यविद्यारूपेण नेपालेऽभिवृद्धिं प्राप्ता। गृहे गृहे मठे मठे मन्दिरे मन्दिरे विहारादिषु तीर्थस्थले सार्वजनिकधर्मपत्तने पर्णकुट्यां वृक्षाधोभागे महाचत्वरे ग्रामादिषु च संस्कृतस्यैव पठनपाठनादिकं स्वतन्त्ररूपेण पुनः कुत्रचित् सर्वकारसाहाय्येन च संरक्षां प्राप। गृहादिषु पण्डितेभ्य आश्रयं दत्त्वा स्वपुत्रांस्तथा स्थानीयबालकांश्च पाठयित्वा संस्कृतवाङ्मयसंरक्षापूर्वकं स्वसंस्कृति-परिपालनं तथा वैदुष्याभिवर्धनं च विधाय तदानीन्तनसमाजस्य संपूर्णावश्यककार्यं संपादयन्तो बहवः सज्जनाः प्रशंस्या अभूवन्। तत्र वेदव्याकरणज्यौतिषसाहित्य-न्यायादीनामध्ययनाध्यापनादि उच्चतररूपेणाऽभूत्। दशाधिकद्विसहस्रमित(२०१०) वैक्रमाब्दपर्यन्तं संस्कृतपाठशाला अपि त्रयस्त्रिंशदधिकद्विशत (२३३) संख्यापर्यन्तं

---

३. नेपाल राष्ट्रियपुस्तकालये पुस्तकं पुरा विलोकितं परमिदानीं केवलस्मृत्या लिखितम्।

४. "नेपाल उपत्यकाको मध्यकालीन इतिहास" २० सौं अध्याय

५. पूर्णिमा ३६ पूर्णाङ्क पृ. २९० इत्यस्य सारांशः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्राप्ताः । संस्कृतमहाविद्यालयाश्च पञ्च संजाताः । तेष्वष्टाधिकद्विसहस्रमित (२०२८)- वैक्रमाब्दे श्री ५ त्रिभुवनवीरविक्रमशाहदेवकरकमलतो द्वौ संस्कृतमहाविद्यालयौ क्रमशो धराने काष्ठमण्डपे चोद्घाटितौ । तस्मिन्नेव वर्षे दाङप्रदेशे जनतासंस्कृतमहाविद्यालय उद्घाटितो जनताप्रयासेन । नेपालाधिराज्ये सर्वत्र संस्कृताध्ययनस्यैव प्राधान्यमासीत् । अक्षरारम्भत एव क्रमशः संस्कृतसरलशब्दज्ञानं संस्कृतपरिचयनामकपुस्तकादितः कारितम् । चाणक्यनीत्यादिपठनं सप्तशतीपठनं तथा संस्कारानन्तरं वेदाध्ययनं च विस्तृतरूपेण प्रचलितानि । समाजस्य प्रायः संपूर्णाऽऽवश्यकता संस्कृतभाषयैव परिपूरिता ।

धर्मक्षेत्रेऽर्थक्षेत्रे, कामक्षेत्रे, काव्यनाटकादिक्षेत्रे, न्यायक्षेत्रे, स्वास्थ्यक्षेत्रे, मोक्षक्षेत्रे च सर्वक्षेत्रेषु संस्कृतविद्ययैवाऽवश्यकता परिपूरिता । स्वयं नेपालस्य शाहवंशजा राजानोऽपि संस्कृतप्रिया भूत्वा संस्कृतग्रन्थसंग्रहं तत्प्रकाशनं पण्डितेभ्य आश्रयदानं च विधाय संस्कृताध्ययनस्य प्रौढरूपेण विकासे प्राप्तख्यातयः सन्ति । एतत्कालिकप्रख्यात-पण्डितानां तथा सुविख्यातग्रन्थानां परिज्ञानं राष्ट्रियाभिलेखालयादिस्थितग्रन्थादीना-मध्ययनतो भवति । अधुनाऽपि वहवो विद्वांसः संस्कृतप्राणाः प्रौढग्रन्थकाराः संस्कृतसंरक्षणे दत्तचित्ता दृश्यन्ते । नेपालस्य प्रकाण्डपण्डिता भारतेऽपि संस्कृतं प्रसारयितुं पाठयितुं च गतवन्तस्तेषां मध्ये केषांचिन्नामानि प्रस्तूयन्ते – व्याकरणादिशास्त्रनिष्णातः श्रीचिरंजीवि-पाण्डेयः, न्यायादिशास्त्रधुरन्धरौ श्रीनीलदेवश्रीवाचस्पतिपन्तौ, नव्यन्यायादिशास्त्रनिष्णाताः श्रीपद्मप्रसादमहोदया, विविधशास्त्रपारंगता डा० श्रीगोविन्दसुवेदिनः, श्रीवेदानन्दमहोदयाः, श्रीशेषराजमहोदया इत्यादयो वहवो नैपालाः संस्कृतविद्वांसो भारते वाराणसीहरिद्वार-लक्ष्मणपुरादिषु संस्कृतं प्रचारितवन्तः । भारतस्य वाराणस्यामग्रगण्यनैपालपण्डितश्री-नीलदेवस्यान्तेवासिनो महामहोपाध्यायपदव्यलंकृताः श्रीसीतारामशास्त्री, श्रीचित्रधर झा, श्रीसुब्रह्मण्यशास्त्री च क्रमशो न्याये मीमासायां वेदान्ते प्रख्याताः संजाता इति सर्वैरपि विदितमेवास्ति । श्रीपद्मप्रसादस्य च वहवः शिष्या भारते विभिन्नप्रदेशेषु प्राध्यापकास्तथा संस्कृतस्य प्रचारकाः सन्ति ।

नेपाले संस्कृतवाङ्मयस्य प्राधान्यं तथा नवीनविषयाणां चाऽप्राधान्यं विधाय पाठन-प्रक्रिया प्रचलिता । मुख्यतो वेदव्याकरणज्योतिषसाहित्यन्यायादीनां पाठनपूर्वकं विविध-संस्कृतशास्त्रशाखासु विद्यार्थिनोऽध्ययने प्रेरिताः । अध्ययनस्य स्थितिर्ग्रन्थकण्ठस्थी-करणयुताऽऽसीत् । इत्थं नवीनशिक्षापद्धतिसंचालनतः पूर्वं संस्कृतवाङ्मयस्याऽध्ययना-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ध्यापनादिकं ग्रन्थसम्पादनादिकं संस्कृतपुस्तकसंरक्षणं संस्कृतक्षेत्रे छात्रवृत्तिप्रदानादिकं चाखण्डितरूपेण विकासपथं प्राप्तानीति तस्यैव फलस्वरूपतोऽधुनाऽपि संस्कृतशिक्षा वक्ष्यमाणप्रकारेण नवीनशिक्षापद्धत्यनुसारमुत्तरोत्तरं नवीनरूपतां भजन्त्यस्ति ।

वर्तमानकालिकनवीनशिक्षापद्धत्यनुसारं सञ्चाल्यमानस्य संस्कृताध्ययनस्य स्थितिः

वस्तुतोऽनन्तकालात् स्थितेन संस्कृतवाङ्मयेन विश्वस्मिन् सर्वज्येष्ठता प्राप्तेति सर्वसम्मतमेव । नेपालपालेभ्यः संस्कृतवाङ्मयेन प्राप्तं संरक्षणमपि सर्वैर्विदितमेवास्ति ।

षडधिकैकोनविंशतिशततमे (१९०६) वैक्रमाब्दे नेपाल आङ्लशिक्षायाः प्रवेशोऽपि संजातः । तत आरम्याङ्लसंस्कृतशिक्षाद्वयं प्रचलितम् । राष्ट्रियशिक्षापद्धतेर्योजनायाः कार्यान्वयनात् पूर्वं संस्कृताध्ययनस्य स्थितिरीदृश्येवासीत् । परं राष्ट्रस्य समस्तप्रजानां समसमस्यायाः समाधानार्थं कस्याश्चित् प्रगतेरप्यावश्यकता संजाता । अस्मिन्नेव विचारे राष्ट्रियावश्यकतायाः परिपूर्तये सेवावृत्तावाधारितां शिक्षां हतोत्साहां कृत्वा सज्ज्ञानयुक्तायाः स्वावलम्बिन्या व्यावसायिक्याः शिक्षाया अपि व्यवस्था कर्तव्याऽऽसीत् । अष्टाविंशत्यधिकद्विसहस्र (२०२८) वैक्रमाब्दे राष्ट्रियशिक्षापद्धतेर्योजना निर्मिता ।

इमां योजनां सफलीभूतां कर्तुं सर्वशिक्षकशिक्षार्थिनां निरन्तरप्रयासोऽपरिहार्यः संजातः । राष्ट्रियशिक्षापद्धत्यनुसारं प्रथमकक्षातस्तृतीयकक्षापर्यन्तं प्राथमिकविद्यालयस्य, चतुर्थकक्षातः सप्तमकक्षापर्यन्तं निम्नमाध्यमिकविद्यालयस्य व्यवस्था वर्तते । सप्तमकक्षापर्यन्तं पाठचक्रमः प्रायः समान एव । चतुर्थकक्षात आङ्लभाषाशिक्षणस्यानिवार्यता वर्तते । संस्कृतभाषाशिक्षणस्य सुव्यवस्था नास्ति । अष्टमकक्षातो दशमकक्षापर्यन्तं साधारणमाध्यमिकविद्यालयो व्यावसायिकमाध्यमिकविद्यालयस्तथा संस्कृतमाध्यमिकविद्यालयश्च सन्ति । संस्कृतमाध्यमिककक्षात एव सुचारुरूपेण संस्कृतशिक्षणं प्रारभ्यते । तत्र विज्ञानाङ्लभाषादिपाठनं त्वन्यमाध्यमिकविद्यालय इव वर्तते । मूलविषये वेद–व्याकरण–ज्यौतिष–साहित्य–न्यायशास्त्राणीति पञ्च विषया अध्याप्यन्ते । परं सर्वेषु संस्कृतमाध्यमिकविद्यालयेषु पञ्च पूर्वोक्तशास्त्रीयविषया अनिवार्यरूपेण नाऽध्याप्यन्ते । शिक्षकादीनामभावादधिकेषु ग्रामस्थितेषु तेषु शास्त्रीया द्वित्रविषया एव पाठ्यन्ते । परमन्येषु संस्कृतमाध्यमिकविद्यालयेषु शास्त्रीयाः पञ्च विषया एव पाठ्यन्ते । पूर्वमत्रत्यैः संस्कृतप्रेमिभिर्यत्र यत्र संस्कृतपाठशालाः स्थापितास्तत्र तत्र छात्राणां कृत आवासभोजनादिव्यवस्थाऽपि विहिता । संस्कृतमाध्यमिकविद्यालयेषु यत्किंचिद्रूपेण छात्रवृत्तेर्वा निःशुल्कभोजनादिसहितछात्रावासस्य

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यवस्था विद्यते । अत्रापि राजधान्यां शाहवंशजभूपालैः संस्थापिते संस्कृतच्छात्रावासे षडधिकैकशतसंख्यकाश्छात्रा भोजनावासपरिधानादिकं निःशुल्कं लभन्ते । सायं प्रातश्छात्राणां कृते पाठाभ्याससंचालनाय द्वयोः शिक्षकयोर्नियुक्तिरस्ति । इदानीं त्रिभुवनविश्वविद्यालयेन संस्कृतविद्यापीठेषु (क्याम्पसेषु) प्रतिच्छात्रं पञ्चविंशत्यधिकैकशतरूप्यकाणां मासिकच्छात्रवृत्तिः स्वीकृता । तादृशीषु छात्रवृत्तिषु वाल्मीकिविद्यापीठे (क्याम्पसे) सप्ततिसङ्ख्यापरिमिता, जनताविद्यापीठे (क्याम्पसे) पञ्चाशत्संख्यापरिमिता, पिण्डेश्वरविद्यापीठे (क्याम्पसे) षष्टिसंख्यापरिमिता, याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठे (क्याम्पसे) दशसंख्यापरिमितेति संकलनया दशोनशतद्वयमिताश्छात्रवृत्तयः सन्ति । याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठे चतुःपञ्चाशच्छात्राणां कृते निःशुल्कभोजनावासव्यवस्था च गुठीसंस्थानाख्यया संस्थानया विहिता वर्तते । राष्ट्रियशिक्षापद्धतेर्योजनायां संस्कृताध्ययनसंस्थानस्य स्थानं परिगणितानामुच्चाध्ययनसंस्थानानां पङ्क्तौ वर्तते । तत्र प्रमाणपत्र-स्नातक-स्नातकोत्तरस्तरानुसन्धानपर्यन्तं संस्कृताध्ययनाध्यापनानुसन्धानस्थितिः सुवद्धमूला वर्तते । इमां नवीनपद्धतिं संस्कृताध्ययने संचाल्य राष्ट्रियतायाः सच्चरित्रस्य दक्षजनशक्तेश्च संरक्षणं विहितमस्ति । इदं संस्कृताध्ययनसंस्थानं प्रमाणपत्रस्तरतोऽनुसन्धानस्तरपर्यन्तं संस्कृताध्ययनसंचालनार्थं त्रिभुवनविश्वविद्यालयेन प्राप्ताधिकारं विहितं वर्तते । त्रिभुवनविश्वविद्यालयस्य कुलपतिपदे विराजमानात् श्री५महाराजाधिराजवीरेन्द्रवीरविक्रमशाहदेवात् त्रिंशदधिकद्विसहस्रमितवैक्रमाब्दस्य (२०३०) ज्येष्ठमासे संस्कृताध्ययनसंस्थानस्याध्यक्ष(डीन)स्य नियुक्तिर्विहिता । तदनन्तरं नवीनसत्रप्रणाल्यनुसारं पाठ्यक्रमोऽत्रत्यैर्विद्वद्भिः पाठविवरणसहितो निर्मितः ।

त्रिंशदधिकद्विसहस्रमितवैक्रमाब्दस्या(२०३०)षाढमासान्तं यावद् दाङ–धरान–मटिहानी–काष्ठमण्डपेषु क्रमशो जनताविद्यापीठं (क्याम्पस), पिण्डेश्वरविद्यापीठं (क्याम्पस), याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठं (क्याम्पस) तथा वाल्मीकिविद्यापीठं (क्याम्पस) चेति चत्वारि विद्यापीठानि संजातानि ।

काष्ठमण्डपे नवीनप्रणाल्यनुसारं पाठनव्यवस्था पूर्वं रामशाह(पुतलीसडक)-स्थितस्य वाल्मीकिसंस्कृतमहाविद्यालयस्य पुराणभवने कृता । तत्र नवीनपद्धत्यनुसारं प्रमाणपत्रस्नातकस्तरयोः प्राचीनपद्धत्यनुसारमुत्तरमध्यमशास्त्रिस्तरयोस्तदानीं प्रकारद्वयेन पाठनव्यवस्था जाता । पूर्वमध्यमपरीक्षोत्तीर्णाविद्यार्थिनः प्रमाणपत्रस्तरस्य प्रथमसत्रे प्रविष्टाः । उत्तरमध्यमपरीक्षोत्तीर्णाश्छात्राः स्नातकस्तरस्य प्रथमसत्रे प्रविष्टाः । तस्मि-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

न्नेव वर्षे राष्ट्रनायकैः स्वर्गीयश्री५महाराजाधिराजमहेन्द्रवीरविक्रमशाहदेवैः संस्कृतपाठनाय विनिर्मिते प्रदर्शनीमार्गस्थिते नवीने भवने वाल्मीकिविद्यापीठं (क्याम्पस) स्थापितम् । संस्कृताध्ययनसंस्थानाध्यक्ष(डीन)स्य प्रधानकार्यालयोऽप्यत्रैव स्थापितः। पुनश्चात्रैव कीर्तिपुरस्थाचार्यविभागाः सर्वे समाविष्टाः । राष्ट्रियशिक्षापद्धतेर्योजनानुसारमत्र प्रमाणपत्रस्तरे चत्वारि पञ्चमासात्मकानि सत्राणि, स्नातकस्तरेऽपि तादृशान्येव चत्वारि सत्राणि स्नातकोत्तरस्तरे तु तादृशान्येव षट् सत्राणि सन्ति । पाठचक्रमो यथासंभवं नेपालाभिमुखीकृतः। अत्र चान्यसंस्थानच्छात्रेभ्यः संस्कृतसंस्थानादुत्पन्नाश्छात्रा न न्यूना भवेयुरिति प्रयासः संविधीयमानो वर्तते ।

सर्वविधसंस्कृतशास्त्राणां संरक्षायै वेदव्याकरणज्यौतिषन्यायसाहित्यदर्शनवेदान्तमीमांसाधर्मशास्त्रेतिहासपुराणादीनामध्यापनमत्र विधीयते । एकत्रिंशदधिकद्विसहस्रवैक्रमाब्दस्य श्रावणमासस्य प्रथमदिवसात् (२०३१।४।१) संस्कृताध्ययनसंस्थानस्याध्यक्ष(डीन)स्य प्रधानकार्यालयस्तु नेपालस्य सुदूरपश्चिमाञ्चलविकासकेन्द्रान्तर्गतरापत्यञ्चलस्थितदाङप्रदेशस्य बेलकुण्डीस्थाने स्वकीयभवने वर्तते। इदानीं नेपालस्य संस्कृताध्ययनस्य स्थितेर्बोधार्थं संस्कृताध्ययनस्थानानि प्रख्यातानि निर्दिश्यन्ते ।

संस्कृताध्ययनसंस्थानम्

१	२	३	४
जनताविद्यापीठम्	वाल्मीकिविद्यापीठम्	याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठम्	पिण्डेश्वरविद्यापीठम्

पूर्वोक्तविद्यापीठपरिपोषकच्छात्रस्रोतोरूपसंस्कृतमाध्यमिकविद्यालयाः–

१. प्यूठानप्रदेशस्य स्वर्गद्वारीस्थो बालसंस्कृतमाध्यमिकविद्यालयः
२. कपिलवस्तुप्रदेशस्य तौलेश्वरनाथसंस्कृतमाध्यमिकविद्यालयः
३. रुपन्देहीप्रदेशस्य मणिग्रामस्थो गीर्वाणसरस्वतीसंस्कृतमाध्यमिकविद्यालयः
४. गुल्मीप्रदेशस्य रिडीस्थः संस्कृतमाध्यमिकविद्यालयः
५. अर्घाखाँचीप्रदेशस्य खिदिमस्थः हरिहरसंस्कृतमाध्यमिकविद्यालयः
६. पाल्पाप्रदेशस्य तानसेननगरपञ्चायतस्था देववाणीप्रधानपाठशाला
७. पाल्पाप्रदेशस्याऽर्चलेस्थो वेदवेदाङ्गसंस्कृतमाध्यमिकविद्यालयः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

८. कास्कीप्रदेशस्य भीमकालीपाटनस्थः संस्कृतमाध्यमिकविद्यालयः
९. लमजुङ्प्रदेशस्य धुसेनीस्थः पाणिनि संस्कृतमाध्यमिकविद्यालयः
१०. बाराप्रदेशस्य भवानीपुरस्थः सिद्धेश्वरसंस्कृतमाध्यमिकविद्यालयः
११. धनुषाप्रदेशस्य जनकपुरज्ञानकूपस्था संस्कृतप्रधानपाठशाला
१२. भोजपुरप्रदेशस्य दिङलावजारस्थः षडानन्दसंस्कृतमाध्यमिकविद्यालयः
१३. ताप्लेजुङप्रदेशस्य फुङ्गलिङ्गस्थो वालसुवोधिनीसंस्कृतमाध्यमिकविद्यालयः

निकटस्थितविद्यापीठसंचालितसंस्कृतमाध्यमिकविद्यालयाः

१४. दाङप्रदेशस्थो जनतासंस्कृतमाध्यमिकविद्यालयः
१५. काष्ठमण्डपस्थः संस्कृतप्रधानमाध्यमिकविद्यालयः
१६. महोत्तरीप्रदेशस्थो राजकीयसंस्कृतमाध्यमिकविद्यालयः
१७. धरानप्रदेशस्थश्चन्द्रसंस्कृतमाध्यमिकविद्यालयः

त्रिंशदधिकद्विसहस्रवैक्रमाब्दस्य (२०३०) श्रावणमासादधोलिखितविषयाः पाठ्यक्रमे स्वीकृता आसन् ।

प्रमाणपत्रस्तरे	स्नातकस्तरे	स्नातकोत्तरस्तरे
१. वेदः	१. शुक्लयजुर्वेदः	एत एव त्रयोदश विषयाः
२. व्याकरणम्	२. नव्यव्याकरणम्	
मूलक्षेत्रे ३. न्यायः	३. प्राचीनव्याकरणम्	
४. ज्यौतिषम्	४. सिद्धान्तज्यौतिषम्	
५. साहित्यम्	५. फलितज्यौतिषम्	
	६. नव्यन्यायः	
	७. प्राचीनन्यायः	
	८. दर्शनम्	
	९. शाङ्करवेदान्तः	
	१०. पूर्वमीमांसा	
	११. धर्मशास्त्रम्	
	१२. साहित्यम्	
	१३. इतिहासपुराणम्	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहायक (क) क्षेत्रे– वेदादयः पञ्च सहायकविषयाः ।	संस्कृतरचना	शुक्लयजुर्वेदादयस्त्रयोदश सहायकविषयाः
सहायक (ख) क्षेत्रे १. नेपाली २. राजशास्त्रम् ३. अर्थशास्त्रम्	प्रमाणपत्रवत्	
अनिवार्यक्षेत्रे १. संस्कृतरचना २. नेपालीरचना ३. आङ्लभाषारचना ४. नेपालपरिचयः ५. वैकल्पिकसंस्कृतरचना	नेपालपरिचयं विहाय प्रमाणपत्रवत्	
ऐच्छिकक्षेत्रे– पूर्वावश्यकरूपे आङ्लभाषारचना वा ऐच्छिकवैकल्पिकसंस्कृतरचना		

द्वात्रिंशदधिकद्विसहस्र (२०३२) मितवैक्रमाब्दस्य श्रावणस्य प्रथमदिनादधोलिखितविषयाः पाठचक्रमे स्वीकृताः ।

अधस्तना विषयाः स्वीकृताः सन्ति जनताविद्यापीठे (क्याम्पसे) । तत्र शिक्षकाः १२ सन्ति ।

	प्रमाणपत्रस्तरे	स्नातकस्तरे	स्नातकोत्तरस्तरे
मूलक्षेत्रे	१. व्याकरणम् २. साहित्यम् ३. न्यायः	१. व्याकरणम् २. साहित्यम् ३. न्यायः	१. साहित्यम्
मूल (ख) क्षेत्रे	१, संस्कृतरचना	१. संस्कृतरचना	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सहायकक्षेत्रे	१. राजशास्त्रम् २. नेपाली	१. राजशास्त्रम् २. नेपाली	१. शास्त्रीयसहायकविषयाः २. अनुसन्धानपद्धतिः ३. शोधप्रबन्धः ४. स्वशास्त्रीयेतिहासः
अनिवार्यक्षेत्रे	१. नेपाली २. आङ्लभाषा वा वैकल्पिकसंस्कृत-रचना ३. नेपालपरिचयः	१. नेपाली २. आङ्लभाषा वा वैकल्पिकसंस्कृत-रचना	

अधस्तना विषया वाल्मीकिविद्यापीठे स्वीकृताः । अत्र शिक्षकाः ४२ सन्ति ।

	प्रमाणपत्रस्तरे	स्नातकस्तरे	स्नातकोत्तरस्तरे
मूलक्षेत्रे	१. वेदः २. व्याकरणम् ३. न्यायः ४. ज्यौतिषम् ५. साहित्यम् ६. इतिहासपुराणम्	पूर्वोक्तास्त्रयोदश विषयाः	पूर्वोक्तास्त्रयोदश विषयाः
सहायकक्षेत्रे	१. नेपाली २. अर्थशास्त्रम् ३. राजशास्त्रम्	१. नेपाली २. अर्थशास्त्रम् ३. राजशास्त्रम्	पूर्वोक्ताश्चत्वारो विषयाः
अनिवार्यक्षेत्रे	पूर्वोक्तास्त्रयो विषयाः	पूर्वोक्तौ द्वौ विषयौ	
मूल (ख) क्षेत्रे	१. संस्कृतरचना	१. संस्कृतरचना	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधस्तना विषयाः पिण्डेश्वरविद्यापीठे स्वीकृताः । तत्र शिक्षकाः ९ सन्ति ।

	प्रमाणपत्रस्तरे	स्नातकस्तरे	
मूलक्षेत्रे	१. व्याकरणम् २. साहित्यम् ३. न्यायः	१. व्याकरणम् २. साहित्यम् ३. न्यायः	प्रमाणपत्रस्नातक-स्तरावेव स्वीकृतौ ।
मूल (ख) क्षेत्रे	१. अर्थशास्त्रम् २. नेपाली	१. अर्थशास्त्रम् २. नेपाली	
अनिवार्यक्षेत्रे	पूर्वोक्तास्त्रयो विषयाः	पूर्वोक्तौ द्वौ विषयौ	

अधस्तना विषया याज्ञवल्क्यलक्ष्मीनारायणविद्यापीठे स्वीकृताः । तत्र शिक्षकाः १७ सन्ति ।

	प्रमाणपत्रस्तरे	स्नातकस्तरे	
मूलक्षेत्रे	१. वेदः २. व्याकरणम् ३. न्यायः ४. ज्यौतिषम् ५. साहित्यम्	१. शुक्लयजुर्वेदः २. व्याकरणम् ३. न्यायः ४. ज्यौतिषम् ५. साहित्यम् ६. दर्शनम्	प्रमाणपत्रस्नातक-स्तरावेव स्वीकृतौ ।
मूल (ख) क्षेत्रे	१. संस्कृतरचना	१. संस्कृतरचना	
सहायकक्षेत्रे	१. राजशास्त्रम् २. नेपाली ३. हिन्दी	१. राजशास्त्रम् २. नेपाली ३. हिन्दी	
अनिवार्यक्षेत्रे	पूर्वोक्तास्त्रयो विषयाः	पूर्वोक्तौ द्वौ विषयौ	

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अधुना सर्वविद्यापीठेष्वतिरिक्तक्रियाकलापान्तर्गतविविधकार्यसमारोहादयो भवन्ति। यथा– साहित्यप्रतियोगिता, वादविवादप्रतियोगिता, सांस्कृतिककार्यसमारोहः, कृष्णाष्टमीरामनवम्यादिसमारोहाः, सामाजिकसेवासमारोहा इत्यादयः। त्रिभुवनविश्वविद्यालयराष्ट्रियविकाससेवानियमानुसारं स्नातकोत्तरप्रथमसत्रोत्तीर्णानां छात्राणां ग्रामे ग्रामे सेवानुसन्धानादिकार्ये प्रेषणे व्यवस्था वर्तते। सर्वपीठेषु पुस्तकालया अपि सन्ति। जनताविद्यापीठपुस्तकालये पुस्तकसंख्या ३१०४ पत्रपत्रिकासंख्या १३ त्रयोदश सन्ति। वाल्मीकिविद्यापीठपुस्तकालये त्रिसप्तत्यधिकैकषष्टिशत (६१७३) संख्यकानि पुस्तकानि सन्ति, त्रिंशत्संख्यकाः पत्रपत्रिकाः सन्ति। वाल्मीकिविद्यापीठतः संस्कृते सामयिक्येका हैमवतीनाम्नी तथा नेपालभाषायामेका पत्रिका मर्यादानाम्नी च प्रकाश्यते। इत्थमेवान्यविद्यापीठेष्वपि संस्कृतपुस्तकालयादितश्छात्रा ज्ञानवृद्धिं कुर्वन्ति, पत्रिकाप्रकाशनतः स्वकीयप्रतिभां वर्धयन्ति। सर्वविद्यापीठेषु योजनाचर्चापीठानां स्थापनाऽपि कृता वर्तते। अतो देशविकासे योजनाकार्येऽपि शैक्षिकक्षेत्रतः सहयोगो लप्स्यत इति निश्चयो वर्तते।

इह प्राचीनपरीक्षाप्रणाल्याः संक्षिप्तं स्वरूपं प्रस्तूयते।

काष्ठमण्डपस्थसंस्कृतप्रधानपाठशालायाश्छात्राणां परीक्षाः षट्पञ्चाशदधिकैकोनविंशतिशततम (१९५६) वैक्रमाब्दादारभ्य भारतस्थवाराणसेयतात्कालिकक्विन्सकलेजत (इदानीं तस्य नाम वाराणसेयसंपूर्णानन्दसंस्कृतविश्वविद्यालयो वर्तते) संजाताः। ततः क्रमशो न्याय–व्याकरण–ज्यौतिष–साङ्ख्य–धर्मशास्त्र–साहित्य–वेद–मीमांसादिविषयाणां मध्यमशास्त्रिपरीक्षासूपाध्यायाचार्यादिपरीक्षासु छात्रा उत्तीर्णाः। अष्टाधिकद्विसहस्र- (२००८) मितवैक्रमाब्दे काष्ठमण्डप एव वाराणसेयपरीक्षाकेन्द्रं संजातम्। मध्ये वर्षत्रये नेपालस्यैव स्वतन्त्रपरीक्षाः संजाताः। त्रिभुवनविश्वविद्यालयस्य स्थापनानन्तरं त्रिभुवनविश्वविद्यालयेनैव अष्टादशाधिकद्विसहस्रमित (२०१८) वैक्रमाब्दत आरभ्य परीक्षाः परिचालिताः। दाङ–धरान–जनकपुर–मटिहानीमहाविद्यालयानामपि तादृश्येव स्थितिः।

नवीनशिक्षाप्रणाली

वर्तमानशिक्षापद्धत्यनुसारं प्रत्येकसत्रावधौ त्रिरान्तरिकमूल्याङ्कनं भवति। आन्तरिकमूल्याङ्कने विषयानुसारं लेखात्मिका मौखिकी च परीक्षा भवति। सत्रान्ते प्रत्येकपाठ्यांशस्य समस्तप्रकरणानां लेखात्मिका परीक्षा भवति। प्रत्येकस्तरे समस्तसत्रान्तपरीक्षासूत्तीर्णतानन्तरं त्रिभुवनविश्वविद्यालयपरीक्षामहाशाखया संचालितायां बोधपरीक्षाया-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मुत्तीर्णतानन्तरं तत्स्तरीयपरीक्षोत्तीर्णता मन्यते, तत उपरितनस्तरप्रवेशार्थं प्रवेश-परीक्षाया व्यवस्था प्रत्येकविद्यापीठे वर्तते । तत्परीक्षोत्तीर्णतानन्तरं तत्स्तरे पठितुं शक्यते । प्रत्येकविद्यापीठे प्रमाणपत्रस्तरे पठितुं विद्यापीठीयप्रवेशपरीक्षा देया पूर्वमध्यम-परीक्षोत्तीर्णैर्वा तत्समपरीक्षोत्तीर्णैश्छात्रैश्च । तत्प्रवेशपरीक्षोत्तीर्णतानन्तरं विद्यापीठे पठितुं शक्यते । अनया रीत्या प्रवेशपरीक्षाया आन्तरिकमूल्याङ्कनपरीक्षायाः सत्रान्तपरीक्षा-यास्तथा बोधपरीक्षायाश्च व्यवस्था विद्यते । पुनश्चोत्तरमध्यमशास्त्र्याचार्यपरीक्षाः प्राचीनसंशोधितपाठ्यक्रमानुसारं त्रिभुवनविश्वविद्यालयपरीक्षामहाशाखातः स्वतन्त्र-रूपेण (व्यक्तिगतरूपेण) परिचाल्यमाना विद्यन्ते । एवं प्रमाणपत्र–स्नातक–स्नातकोत्तर-स्तरपरीक्षाश्च नवीनपाठ्यक्रमानुसारं त्रिभुवनविश्वविद्यालयपरीक्षामहाशाखात एव स्वतन्त्ररूपेणाऽपि (व्यक्तिगतरूपेणाऽपि) परिचाल्यमाना विद्यन्ते ।

उपसंहारः

इत्थमैतिहासिकपृष्ठभूम्यां नेपालदेशे संस्कृतभाषा राजभाषा राजप्रियभाषा चासीत् । दशदशकवर्षेभ्य इतरत्र क्रमशः संस्कृतभाषां प्रति श्रद्धा क्षीणेव जाता । तत्रादौ नवीनायाः शिक्षाप्रणाल्या नियमेन संस्कृतमाध्यमिकविद्यालयानां विलयेन सह संस्कृत-शिक्षायामपि शुल्कव्यवस्था जाता । एतया संस्कृतच्छात्राणामौत्सुक्यमुत्साहादिकं च क्षतं पुनस्ततः प्रभृति प्रतिदिनं संस्कृतस्य ह्रासमपि विचार्य संस्कृतस्योन्नत्यै राष्ट्रिय-शिक्षासमित्या त्रयस्त्रिंशदधिकद्विसहस्र (२०३३) मितवैक्रमाब्दस्य भाद्रमासस्य षष्ठदिवसे संस्कृतशिक्षा निःशुल्केति घोषितम् । नेपालाधिराज्ये पञ्चाधिकपञ्चशतं माध्य-मिकविद्यालयाः सन्ति । तेषु सप्तदश (१७) एव संस्कृतमाध्यमिकविद्यालया विद्यन्ते ।

आशा च वर्तते संस्कृतस्य निखिलज्ञानविज्ञाननिधेरुत्थाने सर्वेषां संस्कृतमर्म-ज्ञानां सहयोगो वर्धिष्यत एव । वर्तमानसमये संस्कृताध्ययनस्य विकासार्थमितोऽप्यधिक-तरः प्रगतिशीलो मार्गः संस्कृतगौरवसंरक्षणोदर्कोऽन्वेषणपरम्परापूर्वकोऽविच्छिन्नरूप एवावश्यको वर्तते ।

अन्त इदमेव विज्ञाप्यते यदस्मिन्नवीनयुगे युगानुकूलं विविधज्ञानराशिभूतस्य संस्कृतस्याध्ययनस्य संरक्षणं भवेदिति प्रतिदिनं सर्वैः संस्कृतानुरागिभिर्नूत्ना नूत्ना परियोजनाः परिकल्प्यमाना वर्तन्ते । वर्तमानसमय एतत्कार्यपत्रोल्लिखितरूपेणैव नेपाले संस्कृताध्ययनस्य स्थितिरस्तीति विज्ञाप्यते इति शम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्दर्भ-सूची

१. लिच्छविकालका अभिलेख– श्रीधनवज्र वज्राचार्य
२. नेपाल उपत्यकाको मध्यकालीन इतिहास– श्रीसूर्यविक्रम ज्ञवाली
३. बंगालका इतिहासको शैक्षिक इतिहास
४. नेपालको ऐतिहासिक विवेचना
५. युवान्च्वाङको यात्राविवरण
६. कन्स्टिच्यूशन अफ् नेपलीज् स्टडीज्
७. पूर्णिमा– संशोधन-मण्डल
८. संस्कृत–संस्कृति– नेपाल संस्कृत परिषद्
९. संस्कृत साहित्यका इतिहास– श्रीवरदराजाचार्य
१०. अभिलेखसंग्रह– संशोधन-मण्डल
११. विकासचर्चा (सामयिक प्रकाशन २०३४ वर्ष २ अङ्क २)
१२. मर्यादा (पत्रिका २०३३ गुरुपूर्णिमा)
१३. नेपाल अधिराज्यको शैक्षिक डाइरेक्टरी– श्री ५ को सरकार शिक्षामन्त्रालय।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Sanskrit and Buddhist Studies in the Federal Republic of Germany

- Michael Hahn

Dear eolleagues !

The present symposium of Nepalese and German Sanskrit scholars has as its fundamental aim the establishment of good and permanent relations, personal as well as scientific, between Sanskritists from both countries. Despite the fact that Nepal and the Federal Republic of Germany (FRG) are situated on different continents, separated from each other by thousands of miles, and differ in their history, economy, culture and politics, they nevertheless are linked closely by the common interest in, and love for, the heritage of Sanskrit culture in all its aspects.

One fundamental presupposition for co-operation between two partners is mutual understanding which includes not only knowledge and appreciation of what the other is doing in the common field of interest, but also a knowledge of the origin of the present state of affairs.

For the reason my esteemed and learned colleague Prof. Toya Nath Pandeya, Assistant Dean of the Sanskrit Institute, has, in his enlightening speech, informed us about the present condition of Sanskrit studies in your country, and now it is my turn to tell you about the present state of Sanskrit and Buddhist studies in the Federal Republic of Germany.

First of all, I would like to settle a question of terminology. In Germany a scholar dealing with any subject related to Hindu or Buddhist culture is generally known as an "Indologist" and the field of research work he deals with is called "Indology" or "Indian Studies". The term 'Indology' might cause some misunder-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

standing or even displeasure if it is not properly explained. Indology or Indian studies, as understood in Europe, comprises research work on every aspect of the languages, literature, religion, philosophy, history, history of art etc. of the whole range of Indian or Hindu civilization, disregarding the political boundaries of the more recent history. Thus not only countries like Nepal, Sri Lanka, Pakistan and Bangladesh fall under this definition but also some other countries outside the Indian subcontinent like Tibet, Central Asia, Burma, Thailand, Indo-China, etc. because they were – at least for certain periods – subjected to the impact of Hindu civilization. Therefore I should like to ask you to understand the terms 'Indology' or 'Indian studies', whenever I will use them, in accordance with the above explanation.

It goes without saying that among the different branches of Indian studies the Sanskrit language held and still holds the foremost position. No German student took and takes his degrees in Indian studies without a sound knowledge of the Sanskrit language, no matter which field of research he specializes in.

Before dealing with the most recent period of Sanskrit and Buddhist studies in the Federal Republic of Germany I should like to start with a few remarks on the historical development which led to the present state of affairs.

Indian and Buddhist studies founded in Bonn as early as 1818 suffered heavy losses from the second world war and its aftermath. Two of the oldest universities, Koenigsberg and Breslau, with a long tradition, were lost because the eastern parts of Germany were annexed by Russia and Poland. Many Indologists were killed in action or were brutally murdered by the National Socialists. Many institutes and their libraries suffered destruction from air-raids. After the war the remaining institutes belonged to two different territories which organized themselves into two new states, namely the Federal Republic of Germany and the German Democratic Republic. In the German Democratic Republic, Indian studies were centered in East Berlin, and three former centres of Sanskrit studies, namely Greifswald, Halle and Leipzig, lost the importance they had maintained for so many years.

In the territory of the Federal Republic of Germany only seven Sanskrit departments existed in 1949, the teaching staff of which as a rule consisted of a single professor. At that time hardly more than ten scholars had a full-time job in the field of Indology. Now, 28 years later, the situation has changed considerably. Instead of seven departments of Sanskrit Studies there are now 14. They are spread all over the country, from Kiel in the north to Muenchen and Freiburg in the south. The names of these universities are: Berlin, Bochum, Bonn, Freiburg, Goettingen,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Hamburg, Heidelberg. Kiel, Koeln, Mainz, Marburg, Muenchen, Muenster and Tuebingen.

There are five more universities which offer courses of Sanskrit for beginners as well as for advanced students as a part of Indo-European studies or of General Linguistics: the universities of Erlangen, Frankfurt, Regensburg, Saarbruecken and Wuerzburg. Finally it should be mentioned that the departments of Indo-European Linguistics at Berlin and Muenster and the Department for Iranian Studies at the university of Hamburg are directed by trained Indologists, who still carry out a lot of research work in the field of Sanskrit studies. When listening to these and the following figures you should bear in mind that they refer to state universities only. There are neither colleges nor private universities in the Federal Republic of Germany, as we find in the USA and Japan.

The number of scholars teaching at one department varies from one to eight. As a rule, the teaching staff consists of four people: one full professor who is the head of the department, one reader or associate professor (generally with tenure), one lecturer or assistant professor whose term of office does not exceed six years, and one teacher for modern Indian languages, usually a native of India with a university degree in Sanskrit studies either from an Indian or a European university. At present, there are altogether about 70 full-time posts for Indologists in West Germany which include:

(a) about 25 full professors and associate professors all of whom had to pass the Ph. D. and the D. Litt. examination;

(b) about 25 readers, lecturers and teachers of modern Indian languages all of whom had to pass the Ph. D. examination;

(c) about 20 trained Indologists who are employed at some of the major libraries, museums or special research units (M. A. or Ph. D.)

As the total number of Indologists trained after 1949 is considerably higher than 70, many of them had to go abroad or to find an occupation different from Indology. Some of the more known German scholars who had left Germany are:

Peter GAEFFKE,	teaching	Hindi at Philadelphia, USA
Herbert GUENTHER,	,,	Tibetan at Saskatoon, Canada
Wilhelm HALBFASS,	,,	Indian philosophy at Philadelphia, U S A
Helmut HOFFMANN,	,,	Tibetan and Buddhist philosophy at Bloomington, USA

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Helmut SCHARFE,	,,	Indology and Indo-European at Los Angeles, USA
Hanns-Peter SCHMIDT,	,,	Indology and Old-Persian Art at Los Angeles, USA
Tilmann VETTER,	,,	Indian and Buddhist Philosophy at Leiden, Netherlands

Nowadays the losses caused by the war have not only been compensated but there are considerably more scholars teaching Sanskrit in the Federal Republic of Germany than there were in pre-war Germany, a country of twice its size. Parallel to the efforts to create new teaching posts and new departments a vast amount of money has been spent for the purpose of rebuilding and enlarging the existing libraries. In Germany it is a custom for each department for Sanskrit studies to have its own library apart from the main collections of the university library. Twenty years ago these so-called department libraries used to have no more than 3000–4000 books. Nowadays there are over 10,000 Indological items in most departments. In Berlin, Goettingen and Hamburg there are even more than 20,000 volumes. The financial resources of a single department nevertheless are limited. So there are only three places in the West Germany with rather large funds for Indological books-the state labraries of West Berlin and Muenchen and the university library of Tuebingen. Only these three libraries can compete with the large collections of London (School of Oriental and African Studies) or Paris (Bibliotheque National).

Two factors were responsible for the positive development described above. The first is the quick economic recovery after the last war which fortunately contributed to the development of sciences too. The second is in 1960/1 that the so-called Council of Sciences, which is the highest planning body in relation to sciences in West Germany, strongly recommended that every German university should be equipped with at least four chairs or departments of Oriental studies, one of them being a chair of Sanskrit studies. Till 1966, these recommendations were followed to a certain extent. Thereafter, the subjects with large numbers of students were again given the pride of place.

Lack of time does not allow me to describe the 14 independent departments of Hindu and Buddhist studies in detail. Therefore I should like to outline briefly the more prevailing tendencies among the great variety of subjects and topics being studied in my country.

Vedic studies – once a domain of German scholarship and represented by such illustrious names as ROTH, GRASSMANN, WEBER, PISCHEL, GELDNER, VON SCHROEDER, AUFRECHT, OLDENBERG, HILLEBRANDT, LUEDERS,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

and THIEME – are nowadays pursued mainly at the university of Erlangen by Dr. Karl HOFFMANN and his pupils. Dr. HOFFMANN wrote an important monograph on the injunctive in Vedic literature some 20 years ago (it was published only 10 years ago) and subseqently has published a number of articles on the *Brahmanas*, mainly the *Jaiminiya-Brahmana*. His pupil Dr. (Mrs.) NARTEN is interested mainly in linguistics and semantical problems of Vedic texts. Among her publications the book on the sibilant aroists deserves special mention. Another pupil of Dr. HOFFMANN is Dr. WITZEL who worked in Nepal for more than five years. He has written a thesis on the *Katha-Aranyaka* which he intends to publish in Nepal.

At the university of Marburg Dr. RAU has devoted a considerable part of his scholarly energy to Vedic subjects. His book on State and society as described in the *Barhanas* was welcomed by every student of Vedic culture as were his more recent studies on the material culture of the Vedic people. In 1975, Dr. RAU delivered a lecture to the participants of the 19th German Oriental Conference on the possibilities and limitations of Vedic archaeology. This lecture very clearly indicated to what extent help can be expected from archaeology and its latest methods (carbon dating etc.) in resolving the difficult problem of Vedic chronology.

Theses on Vedic subjects are also written from time to time under the guidance of Prof. Dr. U. SCHNEIDER, University of Freiburg, and Prof. Dr. A. WEZLER, University of Hamburg.

Vedic studies in the Federal Republic of Germany are characterized by the comparative and historical approach. This means that less weight is given to the later commentaries (e. g. that of Sayaṇa) and the actual performance of the Vedic rites in India and Nepal than to comparative Indo-European linguistics and history of religion, especially for periods contemporary to Vedic culture. Dr. HOFFMANN and his pupils, e. g., very often refer to parallels in old Persian literature and in the Avesta.

It cannot be denied that external data provided by Indo-European linguistics and by comparative history of religion seldom offer a solution to problems which cannot be solved by referring to the Vedic texts themselves only. Yet the later literature and, above all, the living tradition in your country should not be neglected at all. This has been realized by scholars like Dr. HOFFMANN and Dr. WITZEL, who had the privilege of filming many Vedic rites and offerings here

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

in Nepal. They will be properly studied and evaluated in the near future so that Western scholarship may be combined with Nepalese tradition.

The *Upanisads* have always attracted both scholars and the more educated among the non-scholars. This is evidenced by the great number of German translations of more than 60 different *Upanisads*. In this context, I should again mention Dr. Wilhelm RAU from Marburg, who published up-to-date translations of the shorter among the older *Upanisads* and who devoted some of his learned papers to a critical estimation of Sankara's rank as a commentator of the *Brhadaranyaka-upanisad*. Occasional remarks on single crucial problems of the *Upanisads* can be found in the writings of most of the German Sanskritists, but only recently Dr. E. HANEFELD wrote a comprehensive study of the main tenets of the older *Upanisads* which previously were most authentically described by the late Dr. E. FRAUWALLNER in his short but excellent history of Indian philosophy.

The epic literature, as we call it– i. e. *Mahabharata, Ramayana* and the *Puranas*- has not yet been given the attention it deserves. Although the critical editions of both the *Mahabharata* and the *Ramayana* were completed many years ago, only two major studies which are based on them, are known to me. Dr. SRINIVASAN of the University of Hamburg analyzed the Vali-Sugriva story of the *Kiskindhakanda* of the *Ramayana*, and Dr. G. V. SIMSON, University of Goettingen (now Oslo), critically studied the descriptions of the *Mahabharata*. The latter scholar also has published a very important article on the interpolation of the *Bhagavadgita* into the *Mahabharata*.

Fortunately, the *Puranas* have not been neglected to that extent. The methods and standards of textual criticism and history of ideas established by the late Prof. Dr. W. KIRFEL and his pupils are at present maintained by the professors Dr. P. HACKER and Dr. K. RUEPING, both from the University of Muenster, and by Dr. A. GAIL, University of Berlin, who will deliver his lecture on Planets and Pseudo-Planets in Sanskrit Literature and Art on Saturday.

In the field of ornate poetry, drama and narrative literature, a heavy preponderance is given to Buddhist literature. The only noteworthy exception is the study of Dr. R. GEIB, University of Freiburg, on the *Pancatantra* in which he severely criticizes EDGERTON's reconstruction of that text. The late Dr. ALSDORF, Hamburg, and Dr. D. SCHLINGLOFF, Muenchen, have contributed a great number of articles dealing with various Buddhist *Jataka* stories and their development. Dr. M. HAHN, Bonn, discovered and published some of the legends of the hitherto unknown *Haribhatta–Jatakamala*. The drama *Lokanandanataka*,written by the famous

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Buddhist Grammarian Candragomin, was also published by him on the basis of its Tibetan translation. The original Sanskrit text seems to be lost, but there is a slight possibility that it might have survived in a private manuscript collection in your country because it has been translated into Tibetan in this very city of Kathmandu in 1320 A. D.

Among the so-called technical sciences, grammar (Vyakarana) should be mentioned first. There are three scholars dealing with native grammar, the Professors Dr. P. THIEME, Tuebingen, Dr. R. BIRWE, Koeln, and Dr. A. WEZLER, who visited this country several times. German *Vaiyakaranas* nowadays try to follow the lines of the well-known German scholar Dr. F. KIELHORN, editor of the *Mahabhasya*. Dr. WEZLER recently published two intricate studies of some of Panini's rules on the basis of the comments made by later grammarians up to Nagojibhaṭta.

Other technical sciences studied these days are lexicography *(Kosa)*, metrics *(Chandahsastra)* erotics *(Kamasastra)*, medicine *(Ayurveda)*, iconography *(Silpasastra)* and the art of politics *(Arthasastra)*. *Ayurveda* is mainly studied in connection with Tibetan medicine. Unfortunately there is no specialist in astronomy *(Jyotisa)* and mathematics in spite of their importance. It may be stressed that generally in the field of the above-mentioned *Sastras*, German scholars most closely follow the methods developed by native pandits.

Various aspects of the religious systems of Hinduism have been investigated by different authors during the past years. Dr. J. SPROCKHOFF published a voluminous study of *Sannyasa*, the fourth Asrama of the Hindu way of life; Dr. von STIETENCRON, apart from other studies, dealt with the goddesses Ganga and Yamuna and their representations on Hindu temples. Dr. U. SCHNEIDER and his pupils Dr. KULKE, Dr. GEIB, Dr. TRIPATHI and others co-operated in a large-scale project concerning the impact of Hindu tradition on the present development of India as illustrated by religious traditions of Puri in Orissa. Dr. G. SONTHEIMER, Heidelberg, is a specialist on the local deities of tribal India – no exhaustive list of their studies can be given here. The common denominator of most of these studies lies in their basement on fieldwork. Thanks to generous grants from the German Research Organisations, German Sanskritists can afford to visit India and her neighbours in order to study the phenomena they are interested in *in situ*, e.g. in their genuine environment. This is quite different from the conditions in pre-war Germany, when scholars were mostly confined to their study-rooms.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Research work in the field of Hindu philosophy nowadays includes *Vedanta*, especially Sankara (Prof. HACKER and Dr. RUEPING), Nyaya (Dr. A. WEZLER) and philosophy of grammar (Dr. RAU from Marburg has recently published the first critical edition of Bhartrhari's *Vakyapadiya)*.

The Jaina religious system has always attracted German Sanskritists. A tradition of studies in this respect which goes back to A. WEBER, H. JACOBI, E. LEUMANN, W. SCHUBRING and the late Dr. L. ALSDORF is now upheld by Dr. K. BRUHN, Berlin, and Dr. Mrs. A. METTE in Muenchen. The general importance of Jaina studies lies in the fact that both the canonical and post-canonical Jaina literature contains valuable information regarding Hindu and Buddhist philosophy as well.

The study of Buddhist literature, philosphy and religion shows a steadily incr sing tendency as to the number of students and scholars devoted to it. There was already a split-up in several branches; *Theravada*-Buddhism and Pali philology (Dr. H. BECHERT and Dr. O. V. HINUEBER), *Sarvastivada* and other *Hinayana* schools (Dr. E. WALDSCHMIDT and his numerous pupils), Mahayana Buddhism and Buddhist philosophy (Dr. L. SCHMITHAUSEN and his pupils; Dr. O. v. HINUEBER, Dr. D. SCHLINGLOFF), Tibetan Buddhism, secular literature written by Buddhists like Asvaghosa, Aryasura, Kumaralata, Matrceta, Haribhatta and many other authors, Buddhist art.

इत्यादिभिर्ब्रह्मसूत्रोक्तिभिः स पूर्वेषामपि गुरुः कालेनानवच्छेदादित्यादिभिर्योगादि-दर्शनसूत्रोद्घोषैश्च सर्वविद्यागुरुत्वेन सम्मतः सर्वज्ञः परमात्मैव वेदादीनामखिलशास्त्राणां मूलमिति निश्चीयत आर्षपरम्परया। ते च परमात्मनो निःश्वासभूता वेदाः संस्कृतभाषाया मूलमिति तच्छिक्षणमपि तत एव प्रारब्धं मन्यते विद्वदग्रेसरैः। अत एवास्मिन् कार्यपत्रे संस्कृतशिक्षणस्य प्रारम्भो वेदत एव निर्दिष्टो वर्तते। कार्यपत्रेऽस्मिन् संस्कृतशिक्षणपरम्परायाः क्रमागतस्वरूपपरिचयाय समये समये संजातानां पाठ्यविषयसम्बद्धानामध्ययनपरिपाटी-सम्बद्धानां च परिवर्तनानां स्पष्टतया प्रदर्शनाय यः कालविभागो विहितः स न सामान्यैति-हासिककालविभागानुसारी। विशेषतः संस्कृतशिक्षणपरम्परास्वरूपैककेन्द्रितस्यास्य कार्यपत्रस्य वर्ण्यविषयानुकूल्येनैवात्र विशिष्टः कालविभागो विहितो वर्तते। अतोऽत्र प्रयुक्तानां प्राथमिककालो माध्यमिककाल आधुनिककाल इत्यादिपदानां स्वविषयानुगामी विशिष्ट एवार्थोऽवगमनायः।

शिक्षणपरिभाषा

शिक्षणशब्दः केवलाण्ण्यन्ताच्च विद्योपादानार्थकात् शिक्षधातोः करणे ल्युट्प्रत्यय-विधानेन संपद्यते। अतोऽन्तर्भावितण्यर्थत्वेनानन्तर्भावितण्यर्थत्वेन च शिक्षणशब्दस्यार्थो द्विधा भवति। शिष्यकर्तृको गुरुगतविद्याग्रहणानुकूलो व्यापारः प्रथमः। गुरुकर्तृकः शिष्येभ्यो विद्यावितरणानुकूलो व्यापारश्च द्वितोयः। शिष्यकर्तृकं गुरुकर्तृकं चेदम्। शिक्षणं प्रत्येकं त्रिधा विभक्तं भवति कायिकवाचिकमानसिकभेदेन।

शिष्यपक्षे—१. कायिकम्—गुरोरभिवादनं, तदनुज्ञया निर्दिष्टासन उपवेशनं, देवतानमस्कारः, शिरःकम्पादीतरव्यापारपरिवर्जनपुरःसरं स्थिरासनबन्धनं, गुरुवदनविलोकन-पूर्वकं पाठश्रवणं चेत्यादि।

२. वाचिकम्—गुरुमुखोच्चारणानूच्चारणं, प्रश्नोपस्थापनं, पाठाभ्यासश्चेत्यादि।

३. मानसिकम्— जिज्ञासा, मानसमैकाग्र्यं, ग्रहणधारणे[1], पूर्वापरानुसन्धानं चेत्यादि।

गुरुपक्षे— १. कायिकम्—उपदेशोपयोगिकराङ्गुलिचालनादि, नेत्रभ्रूकुटीसङ्केतादि, निदर्शनार्थं

१. (क) ऋग्वेदः ८।१०।१००।११

(ख) इदमेवाध्ययनमुक्तम्।

जैमिनीयन्यायमाला १।१।१ टिप्पणी

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

बाह्यवस्तूपादानं, छात्रचेष्टादिविलोकनं, शीघ्रबोधानुकूलाभिनयादिप्रदर्शनं चेत्यादि ।

२. वाचिकम्– [२]शिष्योच्चारणानुकूलोच्चारणं, प्रासङ्गिककथादिकथनं, विविध-प्रश्नाद्युपस्थापनं, शिष्याणां मानसनैर्मल्योत्पादकोपदेशदानं, शुभाशंसनं, यथोपयोगं तर्जनं चेत्यादि ।

३. मानसिकम्– छात्राणां हितचिन्तनं, वोधाबोधविचारः, शीघ्रबोधोत्पादनाय नैरन्तर्येणावधानप्रदानं चेत्यादि । तदित्थमर्थद्वयगुम्फितो गुरुशिष्योभयगतः शिक्षा-दानग्रहणानुकूलो व्यापारः शिक्षणशब्दव्यपदेश्यो भवतीति संस्कृतशिक्षणपरम्परा-प्रसिद्धमेतत् ।

१. प्राथमिककालः

(क) वेदोक्तं संस्कृतशिक्षणम्

[३]मन्त्रब्राह्मणयोर्वेदनामधेयमित्युक्तिमनुसृत्य मन्त्रब्राह्मणतदन्तर्गतारण्यकोपनिषद्-व्याप्तिनं सर्वमेव विषयमधिकृत्य तन्निरूपितं शिक्षणं संक्षेपेणेह विविच्यते–

उद्देश्यदृष्ट्या वेदोक्तशिक्षणपद्धतिरात्मज्ञानोन्मुख्यवर्तत । व्यावहारिककौशलार्जनमपि शिक्षाया अपरमुद्देश्यमासीत् । तदित्थमात्ममूलकत्वेन व्यवहारमूलकत्वेन च विद्यायाः पराऽपरा चेति विभागद्वयमासीत् ।[४] ऋग्वेदादीनां पञ्चदशानामध्ययनीयविषयाणामुल्लेख-दर्शनात् तदानीन्तनाध्ययनीयविषयस्वरूपं परिचीयते ।[५] एकोनचत्वारिंशदधिकैकादशशत-(११३९)परिमितशाखासंवलितस्य समस्तस्य वेदराशेर्ज्ञानं प्राधान्येन प्रश्रयमलभत । तदशक्तौ च स्वशाखीयवेदस्य सशाखस्य सरहस्यस्य चानिवार्यतयाऽध्ययनमन्वमन्यत ।[६] वेदाध्ययने सस्वरवर्णानुपूर्विका श्रवणमूलाऽनूच्चारणमूला च पद्धतिः प्रचलिताऽभूत् । यथा

---

२. (क) इदमेवाध्यापनमुक्तम् ।

विश्वनाथकृतन्यायसूत्रवृत्तिः २।२।२८

(ख) महाभारते शान्तिपर्व २३१।५६

३. कात्यायनपरिशिष्टप्रतिज्ञासूत्रम्

४. मुण्डकोपनिषद् ४।४

५. छान्दोग्योपनिषद् ७।१।१

६. वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम् ।
अविलुप्तब्रह्मचर्यो गृहस्थाश्रममाविशेत् ॥

मनुस्मृतिः ३।२

स्वाध्यायोऽध्येतव्य इति श्रुतिः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ऋग्वेदे निर्दिष्टम्– गुरुः प्रथममुदचरत्, तदनु च शिष्यैरुच्चारितमिति ।[७] तैत्तिरीयोपनिषदि शिक्षायास्तदानीन्तनाः कतिपये मुख्या विषया निर्दिष्टाः ।[८] इत्थं श्रुतिमूलपरम्पराबलाद् वेदस्य साङ्केतिकसंज्ञैव श्रुतिरिति जाता । अस्याः श्रुतिमूलायाः शुद्धस्वरवर्णानुपूर्वीसंश्रितायाश्च वेदशिक्षणपद्धतेर्विकारपरिहाराय महदवधानं प्रादीयत ।[९] एतल्लक्ष्यतयैव वेदाः शिक्षाव्याकरणादीनि षडङ्गानि च ग्रन्थरूपेणाऽऽम्नातानीति निरुक्तनिर्देशानुसारं ज्ञायते ।[१०] वेदाध्ययनं च शिक्षाव्याकरणाङ्गसहितमेव प्राचलदिति गोपथब्राह्मणोक्त्या स्पष्टीभवति।[११] इत्थं वेदा अध्ययनीयास्तदध्ययनक्रमरक्षायै च तदङ्गानि परिशीलनीयानीति तदानीन्तनी धारणाऽऽसीत् । सत्यं तपो ब्रह्मचर्यं श्रद्धा गुरुशुश्रूषा चेत्यादयश्छात्राणामनुशासनपक्षीयाः परिपालनीया नियमा आसन् । गोसेवा क्षेत्रपरिरक्षणं भिक्षाटनं वेदीसंमार्जनं पुष्पावचयनमित्यादीनि छात्राणां कृत्यान्यासन् । मेखलाजिनधारणं दीर्घकेशश्मश्रुधारणं भूमिशयनं ब्रह्मचर्यधारणादिकं व्रतजातं नियतमासीत् । अध्ययनकाले जीवनोपयोगिसकलज्ञानप्राप्तिर्लोकहितानुकूलचरित्रनिर्माणं च प्रश्रयविषयीभूतमासीत् । यथा तैत्तिरीयोपनिषद्यध्ययनं समाप्य निवर्तमानाय छात्राय गुरुणोपदिष्टम् ।[१२] गुरौ श्रोत्रियत्वस्य ब्रह्मनिष्ठ-

---

७. यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः ।

ऋग्वेदः ७।१०३।५

८. ॐ शिक्षां व्याख्यास्यामः– वर्णः स्वरः । मात्रा । बलम् । साम संतानः ।

तैत्तिरीयोपनिषद् २

९. हीनो मन्त्रः स्वरतो वर्णतो वा मिथ्याप्रयुक्तो न तमर्थमाह ।
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात् ॥

पाणिनीयशिक्षा ५२

१०. साक्षात्कृतधर्माण ऋषयो बभूवुः । तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् संप्रादुः । उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थमाम्नासिषुर्वेदं च वेदाङ्गानि चेति ।

निरुक्तम् १ अ. ६ पा.५ ख.

११. ॐकारं पृच्छामः को धातुः, किं प्रातिपदिकं, किं नामाख्यातं, किं लिङ्गं, किं वचनं, का विभक्तिः, कः प्रत्ययः, क उपसर्गः, को निपातः, किं व्याकरणं, को विकारः, को विकारी, कति मात्राः, कतिवर्णः, कत्यक्षरः, कतिपदः, कः संयोगः, किं स्थाननादानुप्रदानानुकरणम् ।

गोपथब्राह्मणम् १।२४

१२. वेदमनूच्याऽचार्योऽन्तेवासिनमनुशास्ति । सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः । आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः । सत्यान्न प्रमदितव्यम् । धर्मान्न प्रमदितव्यम् । कुशलान्न प्रमदितव्यम् । भूत्यै न प्रमदितव्यम् । स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् । देवपितृकार्याभ्यां न प्रमदितव्यम् । मातृदेवो भव । पितृदेवो भव । आचार्यदेवो भव । अतिथिदेवो भव... ।

तैत्तिरीयोपनिषद् ११।१

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

त्वस्य चाऽऽवश्यकताऽऽसीत् । श्रोत्रियं ब्रह्मनिष्ठमिति ।[१३] श्रोत्रियशब्देनापराविद्यानिष्णातत्वं ब्रह्मनिष्ठशब्देन च पराविद्याकुशलत्वं निर्दिष्टम् ।[१४] विद्योपदेशायोत्तमगुरुरेव वरणीय इत्यवधारणाऽऽसीत् ।[१५] वैदिकवाङ्मयनिर्देशानुसारं गुरुगृहं[१६] पितृगृहं[१७] राजकुलं[१८] समितयो[१९] यज्ञानुष्ठानस्थलानि[२०] च शिक्षणस्थानत्वेन निर्दिष्टान्युपनिषत्सूपलभ्यन्ते ।

(ख) सूत्रकाले संस्कृतशिक्षणस्वरूपम्

एतत्कालपर्यन्तं प्रथमं वेदसंरक्षणैकलक्ष्याणां पश्चाच्च स्वातन्त्र्येण विकसतां शिक्षाव्याकरणच्छन्दोनिरुक्तप्रभृतीनां वेदाङ्गानामेकैकशो भूयान् विस्तारो जातः । एतत्पूर्वं वेदस्य सशुद्धस्वरवर्णानुपूर्वीकं पाठक्रमं संरक्षितुं पदपाठक्रमपाठघनपाठजटापाठ-वल्लीपाठादिपाठप्रकाराणां विकासो जातः । इत्थं च वेदस्य श्रवणमूलायाः शुद्धस्वर-वर्णानुपूर्वीप्रधानाया अध्ययनपरिपाट्याः संरक्षणमस्मिन्नपि काले महता यत्नेनाक्रियत । एष एव कालो धर्मशास्त्रकालो दर्शनविकासारम्भकालश्च कथ्यते । विषयान्तराध्ययन-मपि प्रियतामाप्तुमारभत । अतोऽस्मिन् काले स्वाभाविकतया शिक्षणस्वरूपे किञ्चित् परिवर्तनं दृश्यते । वेदैकनियतायाः शिक्षणपद्धतेः स्थाने विषयान्तरगामिन्या अपि शिक्षणपद्धतेः सङ्केतः प्राप्यते ।[२१] वेदाध्ययनस्य तन्मूलकयागाद्यनुष्ठानानां च ज्ञाना-नुसरणादेः क्रमशो ह्रासगामित्वमालक्ष्यर्षिभिः सूत्ररूपेण स्वल्पकलेवरेण सारपूर्णेन च

---

१३. मुण्डकोपनिषद् १।२।१२

१४. द्वे विद्ये वेदितव्ये इति ह स्म यद् ब्रह्मविदो वदन्ति, परा चैवापरा च । तत्रापरा ऋग्वेदो यजुर्वेदः सामवेदोऽथर्ववेदः शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्योतिषमिति । अथ परा यया तदक्षरमधिगम्यते ।

मुण्डकोपनिषद् १।१।४-५

१५. न नरेणावरेण प्रोक्त एष सुविज्ञेयो बहुधा चिन्त्यमानः ।

कठोपनिषद् १।२।८

१६. छान्दोग्योपनिषद् ६।१।४। बृहदारण्यकोपनिषद् ६।३।१२। श्वेताश्वेतरोपनिषद् ६ ।२२

१७. छान्दोग्योपनिषद् ३। ११। ५

१८. बृहदारण्यकोपनिषद् २।१

१९. छान्दोग्योपनिषद् ५ । ३ । १

२०. " " "

२१. यो ऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ।।

याज्ञवल्क्यस्मृतिः २।१६८

२२. पारस्करगृह्यसूत्रम् २।५।८-३५, २६।३५

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वाङ्मयनिर्माणक्रमेण वेदोक्तानामध्ययनविधिमर्यादादीनां तदुक्तयागाद्यनुष्ठानानां च वैशद्येन प्रतिपादनं व्यधायीति सूत्रविकासोपलक्षितत्वादस्य कालस्य संज्ञैव सूत्रकाल इति जाता। अतोऽस्मिन् कालेऽध्येतॄणां वेदाध्ययनपराङ्मुखत्वं मा भूदिति सावधानता प्रदर्शिता दृश्यते। एतदनुसारेण तत्कालप्रचलितायाः शिक्षणपद्धतेः स्वरूपं संक्षेपेणात्र प्रदर्श्यते।

छात्राणां नियमाः

अस्मिन्नपि काले प्रायस्त एव नियमाश्छात्राणां कृते निर्धारिता आसन् येषां व्यवस्था ब्राह्मणेषु जाता। ते च नियमा दाढ्येन विविधैर्गृह्यसूत्रैः स्मृतिग्रन्थैश्च निरूपिताः। गुरुं प्रति व्यवहरणे पालनीयानां मर्यादानां पार्थक्येन महता बलप्रदानेन निरूपणं व्यधायि।[२३] उपकुर्वाणत्वेन नैष्ठिकत्वेन च ब्रह्मचारिणां द्वैविध्यं व्यवस्थापितम्। विद्याव्रतस्नातकत्वेन विद्यास्नातकत्वेन व्रतस्नातकत्वेन च स्नातकानां त्रैविध्यं पार्थक्येन न्यरूप्यत।[२४] ब्रह्मचारिणां वसनादिसम्बन्धिनी व्यवस्थाऽपि प्रायः समाना दृश्यते ब्राह्मणग्रन्थोक्तव्यवस्थया। अध्ययनस्य प्रारम्भेऽवसाने च गुरुपादोपसंग्रहविधानादिर्व्यवहारस्य विशिष्टः प्रयोगः स्मृतिग्रन्थैः प्रतिपादितः।[२५] एतावतो विशेषानपहायान्यत् सर्वमेव समानप्रायमवलोक्यते छात्रनियमेषु।

गुरोरादर्शाः

सूत्रकालिक्यां व्यवस्थायां गुरूणां त्रैविध्यं प्रतिपादितम्। आचार्य उपाध्यायो गुरुश्चेति। मनुनाऽऽचार्यस्य महत्त्वमधिकतमममन्यत। परं याज्ञवल्क्यानुसारेणाऽऽचार्यापेक्षयाऽपि निषेकादिभरणपोषणान्तां सर्वां व्यवस्थां विधाय यो विद्यामदात् तस्य गुरोः सर्वाधिकं महत्त्वं प्रतिपादितम्।[२६] आचार्यैः निःशुल्कतया विद्यासंस्कारौ प्रादीयेतामुपाध्यायाः सशुल्कं शास्त्रीयशिक्षणमेव विदधुः। इत्थं कतिपये विशेषाः सूत्रनिरूपितशिक्षायां दृश्यन्ते। अन्यत् समानप्रायमेवावर्तत गुरोर्मर्यादापक्षेषु।

तदानीन्तना अध्ययनीया विषयाः

कालक्रमेण प्रतिभायां मान्द्यं गतायामभ्यासक्रमे च शैथिल्यं भजमाने सर्ववेदाध्ययन-

२३. मनुस्मृतिः २।१७५–२२२
२४. पारस्करगृह्यसूत्रम् १
२५. मनुस्मृतिः २।७१
२६. याज्ञवल्क्यस्मृतिः २

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिपाटी शनैः शनैर्विच्छिन्नतां गन्तुमारभत। किं च वेदाङ्गानां पृथक् पृथग् विकासभूयस्त्वेनाध्ययनीयानां विषयान्तराणां प्राचुर्यमपि वर्धमानं जातम्। प्रथमं वेदस्यैव कृतेऽध्ययनीया विषया अप्यस्मिन् समये स्वतन्त्रतयाऽध्येयाः समजनिषत। व्याकरणशास्त्रस्यास्मिन् काले महती वृद्धिर्जाता।[२७] ज्यौतिषादीनामितरेषां वेदाङ्गानां दर्शनानामुपवेदानां काव्यानां च भूयान् विकासः समजनि। शास्त्रगणनया ज्ञायते यत् तदानीं चतुर्दश विद्यास्थानानि विकासमलभन्तेति मनुयाज्ञवल्क्याभ्यां तदुल्लेखो विहितः।[२८] इत्थमस्मिन् युगेऽन्यान्यपि शास्त्राण्यध्ययनविषयतां गतान्यभवन्। अत एव वेदातिरेकेणान्यशास्त्रे परिश्रमनिवारणाय स्मृतिकारैः सावधानतां नीता अध्येतारः। यदि वेदेषु यत्नमविधायान्यत्र श्रमो वर्धमानः स्यात् तर्हि वेदाध्ययनपरम्परैव विच्छेदमवाप्नुयादिति वेदाध्ययनस्य विप्राणां परमतपस्त्वेन वेदातिरिक्तेष्वन्येषु विषयेषु श्रमं कुर्वतां निन्द्यत्वेन च निर्देशं कृतवन्तः शास्त्रकाराः।[२९] तदित्थं वेदाध्ययनैकनियतताया जीवनप्रवृत्तेः शनैः शनैर्विषयान्तरगमनाद्भ्यासह्रासाच्च सर्ववेदाध्ययनं क्रमेण दुःशकतां गन्तुमारभत। शास्त्रकारैरेतां स्थितिमाकलय्य व्यवस्था व्यधायि वेदानधीयीत वेदौ वाऽधीयीत वेदं वाऽधीयीतेत्यादि।[३०] परं साङ्गतया सरहस्यतया च स्वस्वशाखामूलकवेदाध्ययनं परमावश्यकमासीत्। सर्वावयवपूर्णे वेदाध्ययने तदा भूयो बलं प्रादीयत। तदुत्तरमेवेतरविषयाध्ययनमावश्यक-

---

२७. वासुदेवशरण अग्रवाल– पाणिनिकालीन भारतवर्ष ३७५ पृ.
यमसमीयशिशुक्रन्दीयग्रन्था अपि स्वपूर्ववर्तित्वेन पाणिनिना सूचिता विद्यन्ते।

२८. मनुर्याज्ञवल्क्यश्चेत्थं शास्त्रगणनां कुरुतः –
पुराणन्यायमीमांसाधर्मशास्त्राङ्गमिश्रिताः।
वेदाः स्थानानि विद्यानां धर्मस्य च चतुर्दश॥

याज्ञवल्क्यस्मृतिः १।३

२९. वेदमेव सदाऽभ्यस्येत् तपस्तप्स्यन् द्विजोत्तमः।
वेदाभ्यासो हि विप्रस्य तपः परममुच्यते॥
योऽनधीत्य द्विजो वेदमन्यत्र कुरुते श्रमम्।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः॥

याज्ञवल्क्यस्मृतिः २।१६६,१६८

३०. वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्।
अविलुप्तब्रह्मचर्यो गृहस्थाश्रममावसेत्॥

मनुस्मृतिः ३।२

अधुनापर्यन्तमपि वर्तमानाश्चतुर्वेदित्रिवेदिद्विवेद्युपनामभाजो द्विजा एतासामेव परम्पराणां ससूचका इति नास्ति कथापेक्षा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वेन स्वीकृतम् ।

शिक्षणपद्धतिः

वेदाध्ययनं द्विजस्य जीवनधनममन्यत । सशुद्धस्वरवर्णस्य वेदाध्ययनक्रमस्य प्रतिष्ठायै वेदाध्ययने पदपाठक्रमपाठादिषु विशिष्टपाठविधिषु महदवधानं दत्तम् । वेदाध्ययनविधौ ग्रन्थवर्जं श्रुतिमूलमेवाध्ययनं समर्थितं महता संरम्भेण । सूत्रकालस्यैव परिशेषे वर्तमानेन पाणिनिना यथा स्वकीयशिक्षायां वेदाध्ययने सहस्तस्वरमध्ययनं स्वीकृतम्, तेन वेदाध्ययन-परिपाट्यां स्वरवर्णयोः सशुद्धानुपूर्वीकमुच्चारणपरमावधानविषयीभूतमासीदिति शक्यतेऽनुमातुम् । एतत्कालिकशिक्षणपद्धतिर्धन्वन्तरिणोक्ते शिक्षणविधौ किंचित्संकेतितोपलभ्यते ।[३१]

शिक्षणस्थानानि

गुरुगृहं विविधवेदशाखासम्बद्धानि ब्राह्मणनियतानि च चरणपदभाञ्जि विद्याकुलानि च तदानीं शिक्षणस्थलत्वेन प्रथितान्यासन् । धर्मशास्त्राणामध्ययनक्रमे परिषदः प्रथिता अभूवन् यासु कठिनाः प्रश्नाः समाधीयन्त ।[३२]

(ग) पाणिनिना वर्णितं शिक्षणस्वरूपम्

सूत्रकालस्यैवान्तिमभागे वर्तमानत्वेन प्रसिद्धस्य पाणिनेरष्टाध्याय्यां शिक्षणसम्बद्धा विविधा महत्त्वपूर्णाः संकेता उपलभ्यन्ते । छात्राणां नियमसम्बन्धे पाणिनिना प्रायस्त एव नियमाः संकेतिताः, परं छात्रस्वरूपसम्बन्धे गुरुस्वरूपविषये च पाणिनिदत्ताः कतिपयसूचना महत्त्वं बिभ्रति । छात्रस्वरूपसम्बन्धे तेन बहु संकेतितं वर्तते स्वेषु सूत्रेषु । दण्डमाणवा

---

३१. अध्ययनक्रमः धन्वन्तरिः— अथ शुचये कृतोत्तरासंगायाव्याकुलायोपस्थितायाध्ययनकाले शिष्याय यथाशक्ति गुरुरुपदिशेत् । पदं पादं श्लोकं वा ते च पदपादश्लोका भूयः क्रमेणानुसन्धेयाः । एवमेकैकशो घटयेदात्मना चानुपठेत् । अद्रुतमविलम्बितमविशङ्कितमननुनासिकं व्यक्ताक्षरमपीडितवर्णमक्षिभ्रुवौष्ठहस्तैरनभिनीतं सुसंस्कृतं नात्युच्चैर्नातिनीचैश्च स्वरैः पठेत्, न चान्तरेण कश्चिद् व्रजेत् तयोरधीयानयोः ।

यथा— शुचिर्गुरुपरो दक्षस्तन्द्रानिद्राविवर्जितः ।
पठेदेतेन विधिना शिष्यः शास्त्रान्तमाप्नुयात् ॥
वाक्सौष्ठवेऽर्थविज्ञाने प्रागल्भ्ये कर्मनैपुणे ।
तदभ्यासे च सिद्धौ च यतेताध्ययनं ततः ॥

आह्निकसूत्रावल्याः समुद्धृतम् ।

(एषा च शिक्षणपद्धतिर्वेदे वेदाङ्गेषु च समाना प्रतीयते ।)

३२. मनुस्मृतिः

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

माणवा अन्तेवासिनश्चेति छात्रत्रैविध्यं संसूचितं पाणिनिना। येऽल्पवयस्काः प्रारम्भिकविषयं चाधीयाना आसन् ते दण्डमाणवपदवाच्या भवन्ति स्म। ये चोत्तरविषयमधीयानास्ते माणवपदवाच्याः। ये च गुरोः सान्निध्ये सततं वर्तमाना अध्ययनमकुर्वन् तेऽन्तेवासिन उच्यन्ते स्म।[३२] गुरोः स्वरूपविषयेऽपि पाणिनिना संसूचितम्। आचार्यः[३३] प्रवक्ता[३४] श्रोत्रिय[३५] अध्यापक इति गुरुचातुर्विध्यं वर्णितं पाणिनिना। संस्कारसहितविद्यादाताऽऽचार्यः श्रुतिप्रधानस्य शास्त्रस्याध्यापकः श्रोत्रियो वेदानां शाखा ब्राह्मणानि श्रौतसूत्रादीनि च ये व्याख्यातवन्तस्ते प्रवक्तारः कथ्यन्ते स्म। वेदातिरिक्तानां विषयाणां सशुल्कं येऽध्यापनमकुर्वन्, तेऽध्यापकपदवाच्या अभूवन्।

गुरुशिष्यसम्बन्धेऽपि पाणिनिना बहु प्रकाशितं स्वकीयेषु सूत्रेषु। छात्राणां गुरुनाम्ना व्यपदेशोऽपि प्रसिद्ध आसीत्। पाणिनिनाऽऽचार्योपसर्जनत्वेन च्छात्राणामुल्लेखः कृतो वर्तते।[३६] गुरुमुखोच्चारणानूच्चारणस्य वेदाध्ययने परमावश्यकत्वं पाणिनिनाऽपि सूचितम्। पदक्रमघनजटापाठादयो वेदाध्ययनप्रकाराः पाणिनिनाऽपि समर्थिताः। विषयान्तराणामध्ययनक्रमे प्रश्नोत्तरक्रमः संसूचितः पाणिनिना।[३७] गुरुभिश्छात्राः प्रश्नपद्धत्या परीक्ष्यन्ते स्म।[३८] पाणिनेः समयपर्यन्तं तत्तच्छात्राध्येतॄणां कुलानि प्रथितान्यभूवन्। तद्यथा वैयाकरणकुलं नैयायिककुलं याज्ञिककुलं पदककुलं क्रमककुलं चेत्यादि।

पतञ्जलिनाऽप्येतादृशकुलानां चर्चा विहिता।[३९] विविधवेदशाखासम्बद्धाश्चरणा-

---

३२. (क) न दण्डमाणवान्तेवासिषु — पाणिनिः ४–३–१३०
(ख) ब्राह्मणमाणववाडवाद्यन् — पाणिनिः ४–२–४२
माणवानां समूहो माणव्यम्

३३. इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् — पाणिनिः ४–१–४९

३४. पोटायुवतिस्तोककतिपयगृष्टिधेनुवशावेहद्बष्कयणीप्रवक्तृश्रोत्रियाध्यापकधूर्तैर्जातिः —पाणिनिः २–१–६५

३५. श्रोत्रियंश्छन्दोऽधीते — पाणिनिः ५–२–८४
(क) अधीत इत्यस्य कण्ठाग्रपठनमिति पतञ्जलिः।
(ख) गुरुमुखादक्षरानुपूर्वीग्रहणमध्ययनमिति बालमनोरमाकारः।

३६. आचार्योपसर्जनश्चान्तेवासिनि — पाणिनिः ६–२–१०४

३७. विभाषा पृष्टप्रतिवचने हेः — पाणिनिः ८–२–९३

३८. (क) मध्ये पदे निवचने च — पाणिनिः १-४-७६
(ख) निगृह्यानुयोगे च — पाणिनिः ८-२-९४
(ग) कर्माध्ययने वृत्तम् — पाणिनिः ४-४-६३

३९. तद्यथा घटेन कार्यं करिष्यन् कुम्भकारकुलं गत्वाऽऽह कुरु घटं कार्यमनेन करिष्यामिति न तद्वच्छब्दान् प्रयोक्ष्यमाणो वैयाकरणकुलं गत्वाऽऽह कुरु शब्दान् प्रयोक्ष्य इति
महाभाष्ये पस्पशाह्निकम्।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्तत्तच्छास्त्राध्येतॄणां कुलानि तत्सम्बद्धान्यध्ययनस्थानानि च तदानीन्तनाध्ययनकेन्द्राण्यान्नितिं पाणिनिना संसूचितम्। तदित्थं कतिपयान् विषयानपहाय सूत्रकालसाधारण्येव शिक्षणपद्धतिः संसूचिता पाणिनिनाऽपि।

२. माध्यमिककाल:

(क) बौद्धकाले शिक्षणस्वरूपम्

ईसवीयपूर्वपञ्चमशताब्दीत ईसवीयषष्ठशताब्दीपर्यन्तं प्रथितकीर्तेस्तक्षशिला-विद्यापीठस्योल्लेखो बौद्धकालिकशिक्षणसंस्थानेषु प्राधान्येनोपलभ्यते। तत्रत्यशिक्षणस्य स्वरूपविषये कतिपय उल्लेखनीयाः संकेता उपलभ्यन्ते। अध्ययनीयविषयत्वेनाऽऽयुर्वेदार्थ-शास्त्रराजनीतिप्रभृतीनामष्टादशविद्यानां समावेश आसीदिति तद्विवरणतो ज्ञायते।[४०] अन्यत्र लब्धशिक्षा अप्युच्चतरशिक्षावाप्तये तत्राऽऽगच्छन्ति स्म। तत्र च सशुल्कशिक्षणं प्रचलदासीत् शुल्कदानेऽसमर्थानां छात्राणां धनिकैः संभरणं क्रियते स्म। एतद्विद्यापीठसम्बन्धे जातकेषु बहु चर्चितम्। तदनुसारेण च वाराणसीतोऽप्यध्येतॄणामिहागमनमुल्लिखितं वर्तते। एतदवधावेव वाराणस्या अपि महाविद्याकेन्द्रत्वेन प्रसिद्धिरासीत्।[४१] परं ततोऽप्य-ध्येतॄणां तक्षशिलागमनोक्तेस्तक्षशिलाविद्यापीठस्य प्राशस्त्यं ज्ञायते।

बौद्धसम्राजः कनिष्कस्य शासनादुत्तरं भारते बौद्धधर्मस्य ह्रासो वैदिकधर्मस्य विकासश्च प्रारब्ध इतीतिहासविदः कथयन्ति। गुप्तशासनोदयात् प्राप्तराज्यप्रश्रयो वैदिक-धर्मः परं विकासमलभत। एतदवधिपर्यन्तं संस्कृतवाङ्मयस्यापि भूयान् विकासः संजात आसीत्। धर्मशास्त्रे दर्शनशास्त्रे ज्यौतिषशास्त्रे काव्यशास्त्रे च विपुलो विकासः समजनि। एतदवधावेव भासकालिदासाश्वघोषप्रभृतिभिर्महाकविभिः संस्कृतभाषायां दिगन्तविश्रुतानि काव्यानि व्यरचिषत। एतदवधावेवाऽऽर्यभट्टेन सूर्यसिद्धान्तो वराहमिहिरेण बृहज्जातकं व्यरचि। धर्मे दर्शने च सुप्रसिद्धा ग्रन्था अस्मिन्नवधौ लब्धजन्मानः प्रथिता अभवन्। इत्थं वैदिकधर्मेण साकमेव संस्कृतशिक्षाया अपि विपुलो विकासो जातः। ईसवीयपञ्चम-शताब्दीपर्यन्तं संस्कृतेन महती लोकप्रियताऽर्जिता। पञ्चमशताब्द्यां भारतयात्रायां समागतेन चीनदेशवास्तव्येन फाहियान इत्याख्येन यात्रिणा स्वकीये यात्राविवरणे लिखितं यत्– तेन पाटलिपुत्रवर्तिनि विहारे संस्कृतपुस्तकानि पठता संस्कृतभाषणं च शिक्षता विनयसम्बद्धान् नियमान् लिखता सम्पूर्णं वर्षं व्यत्यायितमिति। एतेन संस्कृतशिक्षायास्तदानीं वर्तमान-परमलोकप्रियत्वं सूच्यते।[४२] एतदवधौ शिक्षणप्रणालीसम्बन्धे कालिदासादिकृतिषु केचन

४०. चत्वारो वेदा उपवेदाः षडङ्गानि मीमांसा धर्मशास्त्रं न्यायः पुराणं च।

४१. राधाकुमुद मुखर्जी — एन्सियन्ट इण्डियन एजुकेशन ४६० पृ.

४२. फाहियानस्य यात्राविवरणम्
राधाकुमुद मुखर्जी — एन्सियन्ट इण्डियन एजुकेशन ४६८ पृ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संकेता उपलभ्यन्ते। तदनुसारेण प्राचीनाश्रमपरिपाटी गुरुकुलाध्ययनपरम्परा च तदानीं प्रचलिता दृश्यते। गुरुसेवायै दक्षिणाऽपि देयाऽऽसीत् तदानीम्। अध्ययनीयविषयत्वेन चतुर्दशविद्यानामुल्लेखः कालिदासादिभिरपि कृतः। गुरुशिष्यसम्बन्धश्च सूत्रकालानुकूल एव दृश्यते।[४३]

तत्कालवर्तिनः सम्राजः समुद्रगुप्तस्य शिलालेखेषु प्रयुक्तं प्राञ्जलसंस्कृतं सार्वजनीनतया संस्कृतस्य महत्त्वमुद्घोषयति। अयमेव समयो नेपाले लिच्छविवंशस्याभ्युदयकाल इतीतिहासविद्भिः प्रतिपादितः।

(ख) लिच्छविकाले संस्कृतशिक्षणस्य स्वरूपम्

नेपाले संस्कृतशिक्षायाः प्रारम्भः कदाऽभवदिति निश्चितरूपेण तिथिं निर्देष्टुं न शक्यते। नेपालस्य संस्कृताध्ययनकेन्द्रत्वं प्रागैतिहासिककालत एव वरीवर्त्यत इत्यत्र नास्ति सन्देहः। ऋग्वेदादेव देवतात्मनो हिमालयस्य महती प्रशस्तिर्दृष्टिगोचरतामायाति। पौराणिकवाङ्मये तु हिमवत्खण्डः सातत्येन संस्तुतिमलभत। विश्वामित्रप्रभृतयोऽनेके मन्त्रद्रष्टारः स्वकीयया ऋतम्भरप्रज्ञया कौशिकीप्रवाहपावितं देशमिममलमकुर्वन्निति विद्यतेऽस्य महती प्रतिष्ठा शास्त्रेषु। उपनिषच्चर्चिता योगियाज्ञवल्क्यविदेहजनकप्रभृतयो ज्ञानिनो गार्गीमैत्रेयीप्रभृतयो वेदवेदान्ततत्त्वपरिशीलनचुञ्चवो ब्रह्मवादिन्यश्चास्यैव देशस्य मिथिला-(धनुषामण्डल) प्रमण्डलवर्तिनि जनकपुरे विश्रुतिमलभन्त। आदिकविना महर्षिवाल्मीकिनाऽप्ययमेव हिमवत्खण्डपरिसरः स्वकीयसाधनाकेन्द्रत्वेन प्रथां प्रापित इति विद्यते भूयसी शास्त्रभणितिः। सिन्धुशौवीरपतीरहूगणप्रभृतीनां तत्त्वजिज्ञासापराणां श्रद्धास्पदीभूतोऽसौ पुलहाश्रमोऽपि चक्रनदी(कृष्णागण्डकी)तीरवर्तित्वेनेममेव देशं नेपालं गौरवास्पदीचकारेति पुराणेषूपलभ्यते। इत्थं विविधैरेतैर्वैदिकपौराणिकप्रसङ्गैः संस्कृतविद्याया विच्छेदविरहिताऽसाधारणी परम्परा नेपालेऽनादिकालतः प्रचलिता परिलक्ष्यते। तत्रापि मिथिलासदृशस्य प्रथितविद्याकेन्द्रस्य सत्तयाऽधुनापर्यन्तं तत्रोपलभ्यमानया विशिष्टसंस्कृताध्ययनपरम्परया च तत् सम्यक् प्रमाणितं भवति। अतो नेपाले संस्कृताध्ययनपरम्पराप्रवेशसमयो न कश्चनैतिहासिकसमयसीमानं बिभर्ति।[४४] महायानसम्प्रदायस्य प्रवर्तनात् पूर्वं समस्तेऽप्यार्यावर्ते संस्कृतशिक्षण प्रचलदासीदिति केषांचन पाश्चात्त्येतिहासविदां विचारो दृश्यते।[४५] तेनाऽऽर्यावर्तान्तर्गते नेपाले प्राच एव कालात् संस्कृतशिक्षणं प्रचलदवर्ततेति

४३. कालिदासः- अभिज्ञानशाकुन्तलं रघुवंश च

४४. सूर्यविक्रम ज्ञवाली — नेपाल उपत्यकाको मध्यकालीन इतिहास २६६ पृ.

४५. Arthur A. Macdonell: History of Sanskrit Literature, p. 22:
There is, indeed, no doubt that in the second century B.C. Sanskrit was actually spoken in the whole country called by Sanskrit writers Aryavarta, or 'land of the Aryans', which lies between the Himalaya and the

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ततोऽपि वक्तुं शक्यते । महायानसम्प्रदायस्य नेपालप्रवेशसमयो निर्धारिततया कथयितुं न शक्यते। बौद्धसम्राजः कनिष्कस्य समये (ई. प्रथमशताब्द्यां) महायानसम्प्रदायस्य प्रारम्भ इतिहासे प्रसिद्धः। महायानसम्प्रदायग्रन्थाः प्रायः संस्कृत एव विरचिताः । तस्य च सम्प्रदायस्य नेपाले प्रथिततयेतिहासविद्भिरुपकल्पितमिदं भवेत्। कनिष्कशासनोत्तर-मल्पेनैव कालेन तस्य नेपालप्रवेशोऽनुमातुं शक्यते। महायानसम्प्रदायस्य प्रवेशकालः स्यादनिश्चित एव, परमेतन्निश्चप्रचं वर्तते पञ्चमशताब्द्यां नेपाले संस्कृतशिक्षायाः सम्यक् प्रचार आसीत्। लिच्छविभूपतेर्मानदेवस्य चाँगुनारायणस्थं शिलालेखं विलोक्येदमसन्दिग्धं प्रतिपादयितुं शक्यते। तदानीमत्र नेपाले संस्कृतस्याध्ययनाध्यापनपरम्परा सम्यक् प्रचलिता-ऽभवदिति ज्ञायते। लिच्छविकालिकशिलालेखेषु यादृशः प्रौढसंस्कृतप्रयोग उपलभ्यते,[४६] स विशिष्टाध्ययनाध्यापनप्रक्रियामन्तरेण न सम्भाव्यते। अन्यदपि वर्तते विशेषतोऽवधेयं यत्

Vindhya range. But who spoke it there ? Brahmans certainly did; for Patanjali speaks of them as the 'instructed' (*sista*), the employers of correct speech. Its use, however, extended beyond the Brahmans; for we read in Patanjali about a head-groom disputing with a grammarian as to the etymology of the Sanskrit word for charioteer (*suta*).

४६. (क) चाँगुनारायणस्य वर्णने –

तर्जन्या कर्णकण्डूत्युपशमनसुखोन्मीलितार्धेक्षणस्य
श्रीनिःसङ्गोपगूढस्तनकलशयुगस्पर्शरोमाञ्चितस्य
मायासुप्तौ स्थितस्य स्फुटजलधिजलक्षालिताङ्गस्य शौरेः
भूयात्पर्यस्तहस्तस्थगितमुखशशि श्रेयसे जृम्भितं वः

(ख) राज्ञो जयदेवस्य वर्णने बुद्धकीर्तिः

अङ्गश्रिया परिगतो जितकामरूपः काञ्चीगुणाढ्यवनिताभिरुपास्यमानः ।
कुर्व्वन्सुराष्ट्रपरिपालनकार्यचिन्तां यः सार्व्वभौमचरितं प्रकटीकरोति ।।

(ग) अनुपरमकृतः

विदितविविधधर्म्मो वेदिता वाङ्मयानामिरवधिकमसिथ्या शान्तरागाविदोषम्
...खपरार्त्थस्तद् भवान्मोहजालन्तिमिरमिव विवस्वानंशुभिः प्रक्षिणोति

(घ) जयदेवकृतः

स्रोतः स्वर्गापगायाः किमिदमवतरल्लोलकल्लोलरम्यं
किं ब्रह्मोत्पत्तिपद्मं तलकमलवरप्रेक्षणायोपयातं ।
सम्प्राप्तश्चन्द्रमौलेरमलनिजशिरश्चन्द्रबिम्बं किमत्रे-
त्येवं यद्वीक्ष्य शङ्कां वहति भुवि जनो विस्मयोत्फुल्लनेत्रः ।।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

लिच्छविभूपतिभिर्न केवलं मन्दिरस्थापनानिमित्तेषु शिलालेखेष्वेव, न वा केवलं वंशावली-सम्बद्धेष्वभिलेखेष्वेव संस्कृतं प्रयुक्तम्, प्रत्युत कुल्यानिर्माणादिषु पिण्डक(कूत)निर्धारण-सदृशेषु लौकिकव्यवस्थासु च संस्कृतप्रयोगः कृतः। अतो लिच्छविकाले नेपाले संस्कृतस्य जनजीवने महती लोकप्रियता परिलक्ष्यते। संस्कृतं तदानीं न केवलं राजभाषात्वेनापितु जनभाषात्वेनाप्यासीदिति प्रमाणैरेतैरनुमातुं शक्यते।[४७] सप्तमशताब्द्यां चीनदेशवास्तव्येन यात्रिणा युएन्त्साङ्ग इत्याख्येन लिच्छविभूपाला उत्कृष्टविद्वांस आसन्नित्युक्तम्।[४८] तदानी-न्तनैर्विष्णुशिवादिमन्दिरनिर्माणकार्यैर्ज्ञायते वैदिकधर्मस्य तदानीं विशिष्टा प्रतिष्ठाऽऽसीदिति। तदानीं निखिला वेदाः स्मृतय इतिहासपुराणादयश्च शिक्षणीयविषया अभवन्।[४९] महासामन्तेनांशुवर्मणा विरचितस्य शब्दशास्त्रस्य चर्चेतिहासकारैः कृता। स च महान् शास्त्रचिन्तकः प्रतीतः। अस्मिन्नेव समये भारते तक्षशिलानालन्दानाम्नो-र्दिगन्तविश्रुतयोर्विद्याकेन्द्रयोर्नैपालकानां विदुषां संपर्क आसीदितीतिहासतो ज्ञायते। तदानीमनुपरमबुद्धकीर्तिसदृशाः प्रौढाः संस्कृतकवयोऽभूवन्। राजानोऽपि कवितया प्रसिद्धिं गताः। तत्र द्वितीयजयदेवस्य कवित्वं पशुपतिशिलालेखेनोद्घोष्यते। सुश्रुतसंहिता-टीकाकारश्चक्रपाणिर्नालन्दाविश्वविद्यालये वैदुष्येण ख्यातिं गतश्चन्द्रवर्मनामको विद्वांश्च लिच्छविकाले समजनिषाताम्।[५०] यद्यपि संस्कृतशिक्षणपद्धतिसम्बद्धं तादृशं किमपि प्रमाणजातं नोपलभ्यते, तथापि विद्वद्भ्यो तिब्बतवास्तव्यैर्विद्वद्भिर्नेपाल आगत्यात्रत्येभ्यः संस्कृताध्ययनं कृतमितीतिहासनिर्देशेन नेपाले तदानीं काचन विशिष्टा शिक्षणप्रणाल्यवश्य-मासीदित्यवधार्यते। राजकुमार्या भृकुट्या साकं तिब्बतं गतवतः शीलमञ्जुनामकस्य पण्डितस्य प्रसङ्ग इतिहास उपलभ्यते। स खलु बौद्धशास्त्राध्यापकत्वेन प्रथित आसीत्।[५१] अतस्तदानीन्तना विद्वांसो वैयक्तिकरूपेण संस्कृतशिक्षणमकुर्वन्नित्यनुमातुं शक्यते। लिच्छवि-कालिकेषु शिलालेखेषु ज्यौतिषधर्मशास्त्रादीनां विविधवाङ्मयानां संकेत उपलभ्यते। तेषां नक्षत्रविद्यानिष्णातत्वं पञ्चाङ्गनिर्माणनैपुण्यं चेतिहासविद्भिर्निर्दिष्टम्।[५२] अतो

---

४७. सूर्यविक्रम ज्ञवाली — नेपाल उपत्यकाको मध्यकालीन इतिहास २६६ पृ.

४८. श्रीराम गोयल — प्राचीन नेपाल का राजनीतिक और सांस्कृतिक इतिहास १९०–१९१ पृ.

४९. " " " " " " "

५०. नेत्रबहादुर थापा — ए शर्ट हिस्ट्री अफ् नेपाल ३४ पृ.

५१. सूर्यविक्रम ज्ञवाली — नेपाल उपत्यकाको मध्यकालीन इतिहास २६७ पृ.

५२. (क) रोहिणीनक्षत्रयुक्ते चन्द्रमसि मुहूर्ते प्रशस्तेभिजिति (चाँगुनारायणशिलालेखः)।

(ख) नयराज पन्त — लिच्छविकालको पञ्चाङ्गको एक झलक, पूर्णिमा १. ३ अं. १–१३ पृ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वेदव्याकरणधर्मशास्त्रदर्शनादयो विषयास्तदानीमध्ययनीया आसन्नित्यनुमितं भवति। नेपालभारतयोर्धर्मसंस्कृतिविद्याक्षेत्रे प्राच एव कालाद् घनिष्ठसम्बन्धस्य सत्त्वेन तदानीं भारते प्रथिताभ्यां तक्षशिलानालन्दाविद्यापीठाभ्यां सह नैपालकविदुषामवश्यं सम्पर्क आसीदिति शक्यते वक्तुम् ।

सप्तमशताब्द्यां वर्तमानस्य नालन्दाविश्वविद्यालयस्य द्वितीयशताब्दीतः सप्तमशताब्दीपर्यन्तं यादृशं वर्णनं ह्वुएन्सांगेन कृतम् – ततस्तत्र वर्तमानायाः शिक्षणपद्धतेः किंचिद् विवरणमुपलभ्यते । तत्र वेदा व्याकरणं बौद्धनिकायग्रन्था वैद्यकं दर्शनानि साहित्यं तन्त्रं कला चेत्यादयो विषया अध्याप्यन्ते स्म । दशसहस्राधिकाश्छात्रास्तत्राधीयते स्म । सार्धसहस्रसंख्यका अध्यापकाश्चासन् । शीलभद्रनामा प्रधानाचार्य आसीत् । तत्र च प्राधान्येन महायानसम्प्रदायस्य विषयः शिक्ष्यते स्म । लिच्छविकालप्रसिद्धेन विदुषा चन्द्रवर्मणा नालन्दाविश्वविद्यालयेऽप्यधीतमितीतिहास उट्टङ्कितम् ।

लिच्छविशासनात् परं मल्लशासनोदयात् पूर्वं नवमशताब्द्यां मगधे वर्तमानेन विक्रमशिलाविश्वविद्यालयेन सह नैपालकानां विदुषां संपर्क आसीदितीतिहासविदः कथयन्ति। सूर्यविक्रमज्ञवालीमहाभागस्य कथनानुसारं रत्नकीर्तिवैरोचनकनकश्रीनामकानां विदुषां विक्रमशिलाविश्वविद्यालयेऽध्ययनं तिब्बतीयेतिहासकारेण तारानाथेनोल्लिखितम्। तदानीं नेपाले तन्त्रविद्याया महान् प्रचार आसीत् । तन्त्रशास्त्राध्ययनार्थं तिब्बतप्रदेशतोऽध्ययनार्थिनो नेपालमागमन्निति तिब्बतवंशावल्यामुल्लिखितम् । एकादशशताब्द्यां नैपालका विद्वांसो बौद्धवाङ्मयस्य तन्त्रस्य च शिक्षकत्वेन महतीं प्रसिद्धिमापुरितीतिहासविद्भिरुल्लिखितम् ।[५३] तदानीं विहारा एव शिक्षणकेन्द्रत्वेनावर्तन्त । तत्र गुमविहारो मानविहारो राजविहारः खर्जूरिकाविहारो मध्यमविहारश्चेत्यंशुवर्मणः शिलालेख उपलभ्यते ।[५४]

(ग) जगदीशचन्द्र रेग्मी — लिच्छवि संस्कृति १३०, १३३ पृ.

(घ) विदितविविधधर्मो वेदिता वाङ्मयानाम् (अनुपमरचितो हाँडीग्रामशिलालेखः) विदितविविधधर्मशब्दविशेषणेन वैदिकधर्मस्य तदङ्गभूतानां शैववैष्णवशाक्तादीनां सम्प्रदायानां बौद्धधर्मस्य च ज्ञानं संकेत्यते । अतस्तदानीमत्र वैदिकवाङ्मयं बौद्धवाङ्मयं चाध्ययनीये आस्तामित्यनुमीयते ।

५३. (क) ब्लु एनल्स् - १ भाग २–२७ पृ.

(ख) सूर्यविक्रम ज्ञवाली– नेपाल उपत्यकाको मध्यकालीन इतिहास

५४. रेनिइरो नोली–३६ संख्याको शिलालेख

एते विहारा विद्याकेन्द्रत्वेन प्रसिद्धा आसन् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(ग) मल्लकाले संस्कृतशिक्षणस्य स्वरूपम्

मल्लकाले द्वादशशताब्दीतोऽष्टादशशताब्दीपर्यन्तं सस्कृतस्य प्रसारो दृश्यते, तेनै-तस्मिन्नपि काले संस्कृतविद्याया महानादर आसीदिति ज्ञायते । मल्लकालिकेष्वपि विविधेषु शिलालेखेषु भूयान् संस्कृतप्रयोगः प्राप्यते ।[५५] तदानीं मल्लनृपतिभिर्लिखितानि नाटकानि विलोक्य संस्कृतभाषायाः प्रचुरः प्रस.रो लोकप्रियता चाऽऽसीदिति ज्ञायते ।[५६] प्रताप-मल्लस्य कवीन्द्र इत्युपाधिनाऽपि स्वयं राजकुलेऽपि संस्कृतस्य लोकप्रियताऽऽसीत् । तस्य राज्ञी लालमत्यपि संस्कृते श्लोकरचनया ख्यातिं गता । तेन स्त्रीष्वपि संस्कृतानुरागो दृश्यते । अतस्तदानीं संस्कृताध्ययनाध्यापनयोः काचन समीचीना परिपाटी नेपालेऽवश्यमवर्ततेति शक्यतेऽनुमातुम् । द्वादशशताब्दीतश्चतुर्दशशताब्दीपर्यन्तं नेपालो महाविद्याकेन्द्रमासीत् ।[५७] भारतादपि विद्वांसोऽध्ययनाय नेपाल आगच्छन्नितीतिहासतो ज्ञायते । नैपालका अपि विद्वांसो भारते लब्धख्यातयोऽभवन्नित्यपि ज्ञायते ।[५८] मल्लकाले शास्त्रीयशिक्षायाः शिल्पशिक्षायाश्च भेदेन शिक्षाया द्वैविध्यमासीत् ।[५९] शास्त्रीयशिक्षायां वेदपुराणधर्मशास्त्र-राजनीतिशास्त्रदर्शनशास्त्रज्यौतिषायुर्वेदाश्वशास्त्रतन्त्रशास्त्रादीनां समावेश आसीत् ।

---

५५. स्वयम्भूस्थितेऽर्जुनमल्लस्थितिमल्लयोरभिलेखे (वि. सं. १४२९)—

(क) श्रीकाण्ठमण्डपपुरी विमलातिरम्या,
तस्यां जयो वसति धैर्यगुणैरुदारः ।
श्रीराजहर्ष इति सर्वजनप्रणीतः
पात्रान्वयामृतकरः सुविशालकीर्तिः ॥...

(ख) सिद्धिनरसिंहमल्लस्य कृष्णमन्दिराभिलेखे—
युद्धारम्भः कृतोऽस्मिन्नपि शुभदिवसे शत्रुभिर्युद्धशौण्डै-
र्दुर्दृष्टैः कोटोवरुद्धः कुटिलनृपभटैरद्भुतैः कोटिसंख्यैः ।
लीलामात्रेण शत्रूनपनयत तदा पार्थिवः पार्थतुल्यः
कोटं निर्मोचयित्वा नमुचिरिपुरिवानन्दसन्दोहमाप ॥...

५६. सूर्यविक्रम ज्ञवाली— नेपाल उपत्यकाको मध्यकालीन इतिहास २२३ पृ.

५७. बुद्धश्रीनामको विश्रुतयशा मनीषी विक्रमशिलाविद्यापीठे सम्मानित आसीत् । ततश्च पुनर्नेपाले प्रत्यागतेन तेन बौद्धभिक्षुभ्यः प्रज्ञापारमितायाः शिक्षाऽदायीति द्वादशशताब्द्या नेपालेतिहासतो ज्ञायते । अस्मिन्नेव च समये नेपालेऽनेके ख्यातनामानोऽतुल्यदासनयश्रीरत्नरक्षितप्रभृतयः प्रसिद्धाः पण्डिता अभूवन्नितीतिहासाभिज्ञैर्निरूपितम् ।

५८. सूर्यविक्रम ज्ञवाली—नेपाल उपत्यकाको मध्यकालीन इतिहास २८०–२९९ पृ.

५९. धनवज्र वज्राचार्य-मध्यकालीन नेपाल, नेपालपरिचय ११५ पृ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एतदतिरिक्ता शिल्पशिक्षाऽपि प्रचलिताऽभूत्, यत्र विविधवास्तुकलाचित्रकलाजीवनो-पयोगिवसनादिनिर्माणकलाश्च समाविष्टा आसन्। विदुषां गृहाणि विहाराश्च तदानी-न्तनानि शिक्षणस्थानान्यासन्निती तिहासतो ज्ञायते।

तक्षशिलाविश्वविद्यालयस्य विलयानन्तरं भारते तादृशानां विश्वश्रुतानां महतां विद्याकेन्द्राणां सत्ता विलयं गता। तदुत्तरं वाराणसीवङ्गप्रदेश (नदिया) इत्यादिस्थानानि प्रसिद्धविद्याकेन्द्रत्वेन परां ख्यातिं प्राप्तानि। नैपालकानां विदुषां परवर्तिनि समये तैरपि साकं संपर्कोऽभूत्। एते प्रदेशाः सामीप्यदृष्टयाऽपि नैपालकविदुषां गमनागमनयो-रनुकूला आसन्।

मिथिला

उपनिषद्विख्यातस्य विदेहस्य समयादेव तत्र वैदिकपरम्परायाः शिक्षणं क्रमागत-मासीत्। यद्यपि तत्रत्यायाः शिक्षाया इतिहास ईशवीयचतुर्दशशताब्द्यां कामेश्वरकुलशासनो-दयात् प्राक् स्पष्टो नास्ति, परं तदुत्तरकालिको मिथिलायाः शैक्षिकेतिहासः परमोज्ज्वलो दृश्यते।[६०] भगवद्गीतादेवीमाहात्म्यमेघदूतगीतगोविन्दमालतीमाधवरसिकसर्वस्वसंगीत-सर्वस्वादिग्रन्थानां टीकाकारो जगद्धरो न्यायशास्त्रप्रसिद्धा गङ्गेशवर्धमानपक्षधरादयो विद्वांसश्च मिथिलां स्वकीयया विद्ययाऽलमकुर्वन्। वासुदेवमिश्रमहेशठक्कुरप्रभृतयो मिथिलाया विद्यारक्षका अभवन्। शंकरमिश्रेण वैशेषिकन्याये च टीका विरचिता। वाचस्पतिमिश्रोऽपि मिथिलायामेव प्रादुरभूत्। तत्रत्या शिक्षणपरिपाटी तदानीं भारत-प्रसिद्धाऽभूत्। तत्र शास्त्रार्थपरिपाटीप्रधानाध्ययनाध्यापनपद्धतिः प्रसिद्धिं गता।

नवद्वीपः (नदिया)

सेनकुलावतंसस्य लक्ष्मणनृपतेः (ई. ११०६–११३८) शासनकाले वङ्गप्रदेशे नवद्वीप-मण्डलं विद्याया महत् केन्द्रमभूत्। तस्य प्रधानमन्त्री हलायुधः संस्कृतस्य महान् विद्वाना-सीत्। तस्यैव समये गीतगोविन्दकारो जयदेवः पवनदूतस्य रचयिता धोयी च तत्रैवा-भवताम्। तदनन्तरं पञ्चदशशतके वासुदेवसार्वभौमप्रयासान्नवद्वीपमण्डलमपि न्यायदर्शनस्य शिक्षाकेन्द्रत्वेन प्रथितमभूत्। एतानि च शिक्षाकेन्द्राणि नैपालकानामध्येतॄणां कृत आकर्षण-स्थलान्यभूवन्निति प्रतीयते। एतैर्विद्याकेन्द्रैः सहैव वाराणस्याः सकलविद्याकेन्द्रत्वेन महती प्रसिद्धिरासीत् तदानीम्। नैपालका अनेके विद्वांसस्ततः परिचिताः सम्बद्धाश्चासन्नित्यनु-मीयते।[६१]

---

६०. राधाकुमुद मुखर्जी–एन्सियन्ट इण्डियन एजुकेशन ५९६ पृ.
६१. रामचन्द्र मिश्र –हिस्ट्री अफ् बेङ्गाल

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ङ) शाहकाले संस्कृतशिक्षणस्य स्वरूपम्

गोरखाराज्यस्योदयकालादेव संस्कृतस्य संरक्षणसम्बन्धे गोरक्षभूपालानां महान् यत्न आसीदिति ज्ञायते । रामशाहपृथ्वीपतिशाहकालिका गोरखाराज्ये लब्धाः शिलालेखा एतज्ज्ञापयन्ति । तदानीं ख्यातनामानो वीरेश्वरप्रभृतयो विद्वांसः कवयश्चाऽऽसन्निति ज्ञायते ।[६२] यद्यपि राजकीयव्यवहारे नेपालीभाषैव प्रयोगमलभत, तथापि शास्त्रीयभाषात्वेन संस्कार-भाषात्वेन वा स्वकीयेषु शिलालेखेषु सुरभारत्या एव शाहभूपालैः प्रयोगः कृतः । शाहवंश्या भूपाला धर्मानुरागिणोऽभूवन्नितीतिहास आख्याति । पृथ्वीनारायणतः प्रागेव गोरक्षशासन-काले वर्तमानस्य प्रेमनिधिपन्तनाम्नः ख्यातयशसो विदुषो रचना मल्लादर्शः (शिव-ताण्डवतन्त्रस्य टीका) प्रायश्चित्तप्रदीपः श्राद्धकर्मविधिः कार्तवीर्यपद्धतिः शब्दार्थचिन्तामणिः (शारदातिलकव्याख्या) इत्यादय आसन् । विभाजितस्य नेपालस्य पृथ्वीनारायणशाहेनैकी-करणं विहितम् । तच्चैकीकरणं न केवलं राजनीतिकदृष्टयाऽभवदपि तु धार्मिकसांस्कृतिक-शैक्षिकादिविविधेषु पक्षेषु राष्ट्रस्यैक्यं सुदृढत्वं च समपादयत् । परमविद्यानुरागिणा पृथ्वीनारायणशाहेन संस्कृतविदुषां सम्मानः कृतः । तत्प्रश्रये भक्तविजयपृथ्वीन्द्रवर्णनोदय-कर्ता ललितावल्लभः कवितानिकषोपलकर्ता लक्ष्मणकविः विजयतिलककर्ताऽग्निधरपण्डितः प्रशस्तिरत्नरचयिता रामचन्द्रोपाध्याय इत्येवमादयो विद्वांसः कवयश्च संस्कृतविद्यामुन्नीत-वन्तः । एष खलु राष्ट्रियगौरवोद्बोधकः समय आसीत् । नेपालवास्तव्याः प्रजा यथा श्रद्धेयभूपतेर्नेतृत्वे विशालनेपालनिर्माणाय प्रयतमाना आसन् तथैव विद्यागौरवमपि विस्तार-यन्तो नैपालका विद्वांसः कवयश्च स्वकीयाभी रचनाभिर्ज्ञानगरिमाणं विस्तारयन्त आसन् । एकोनविंशतितमायां वैक्रमशताब्द्यां जयरत्नाकरनाटकपुरश्चरणदीपिकाकर्तुः शक्तिवल्लभस्य वाणीविलाससिद्धान्तवार्षिकरत्नावलीपुरश्चरणपद्धतिप्रभृतीनां ग्रन्थानां रचयितुर्वाणीविलासस्य पलभायन्त्ररत्नदीपादीनां ग्रन्थानां रचयितुर्लक्ष्मीपते-श्चोदयेन शाहवंशस्य संस्कृतानुरागित्वं दिक्षु प्रसारितम् । अस्मिन्नेव समये (ई. १७९१) वाराणस्यां ब्रिटिशशासनेन भारते संस्कृतशिक्षायाः संस्थागतविकासाय काशिक-राजकीयसंस्कृतमहाविद्यालयनाम्ना शिक्षणसंस्थायाः स्थापनं विहितम् । तदानीन्तने समये

---

६२. तुलसीराम वैद्य, धनवज्र वज्राचार्य – गोरखाको ऐतिहासिक सामग्री १८ पृ., पृथ्वीपतिशाह-स्याभिलेखे–

गोर्खाधीशमहाराजपृथ्वीपतिनृपाज्ञया ।
वीरेश्वरेण विदुषा प्रशस्ती रचिता शुभा ॥
शाके १६०२ मासे ३

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

प्रचलितायाः संस्कृतशिक्षायाः पद्धतिं ज्ञातुं तस्य महाविद्यालयस्य शैक्षिकविकासक्रमोऽवलोकनीयो भवति । प्रथमस्तरस्य महाविद्यालयस्य स्थापनाकालेऽधोनिर्दिष्टा विषया अध्यापनीयतया निर्धारिता आसन्– चत्वारो वेदाश्चत्वार उपवेदा (आयुर्वेदो धनुर्वेदो गान्धर्ववेदोऽर्थशास्त्रं च) षड् वेदाङ्गानि (शिक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषं च) दर्शनानि (साङ्ख्यो न्यायो वैशेषिकं योगो मीमांसा वेदान्तः) स्मृतयश्च । एतस्मिन् ख्यातनाम्नि महाविद्यालय एतेषां विषयाणां निर्धारणात् तदानीं संस्कृतशिक्षाजगति प्राधान्येनाध्येया विषया एत आसन्निति ज्ञायते ।[६३] एकोनविंशविक्रमशताब्द्यां नेपाले महादेवपाँडेचिरञ्जीविपाँडेनीलदेवपन्तवाचस्पतिपन्तप्रभृतीनां विदुषां वाराणस्यां संपर्क आसीदिति तेषामध्ययनाध्यापनादिविवरणतः प्राप्यते । अतस्तदानीं नेपालेऽपि संस्कृतशिक्षायास्तत्समानविषयकमेव स्वरूपमनुमातुं शक्यते । पण्डितराजसोमनाथसिग्द्यालमहाभागानां विचारानुसारं नेपाले पर्वतप्रान्तेषु वैदिकसंहिता कर्मकाण्डं पुराणं ज्यौतिषं काव्यानि व्याकरणं धर्मशास्त्रं चेत्येतेषां विषयाणां न्यूनाधिकोऽध्ययनाध्यापनक्रमः प्राच एव कालादासीत् । काष्ठमण्डपोपत्यकायां च व्याकरणधर्मशास्त्रपुराणज्यौतिषकाव्यवैद्यकप्रभृतीनां विषयाणामध्ययनं प्रचलदासीत् । आधुनिकयुगप्रचलितायाः संस्थागतशिक्षणपद्धतेः प्रारम्भात् पूर्वं विद्वांसः स्वस्वगृहेष्वेवाध्यापनमकुर्वन् । स्वगृहातिरिक्तेषु नदीतटोद्यानादिषु मठादिष्वपि विद्वद्भिरध्यापनमक्रियत ।[६४] शिक्षणपरिपाट्याः सूक्ष्मसंकेतः प्राप्यते। तदनुसारं छात्राणां शास्त्रार्थपरिपाट्या ज्ञानसंवर्धनं प्रामाण्यमलभत । इत्थं प्राच एव कालात् संस्कृताध्ययनाध्यापनपरम्पराऽविच्छिन्नतया प्रवर्तमानाऽऽसीत् । संस्कृतविषयकप्रौढपाण्डित्यमण्डिता नैपालका विद्वांसः काशीमिथिलानवद्वीपादिष्वपि लब्धप्रतिष्ठा अभूवन् । चिरञ्जीविपाँडेनीलदेवपन्तादीनां काश्यादिषु प्रसिद्धिलाभप्रसङ्गैस्तद् बुध्यते ।

३. आधुनिककालः– नेपाले संस्थागता संस्कृतशिक्षणपद्धतिः

(क) – संस्कृतमहाविद्यालयस्थापनापर्यन्तं संस्कृतशिक्षणस्वरूपम्

राणाशासनप्रारम्भात् पूर्वं नेपाले संस्कृतशिक्षैव प्रधानशिक्षाऽऽसीत् । संस्कृतज्ञातार एव शिक्षाप्रसारका अभूवन् । भारते तदानीमुत्तरोत्तरं वर्धमानेनाऽऽङ्ग्लशासनेन तत्र सर्वत्राऽऽङ्ग्लभाषायाः शिक्षाक्रमः प्रसारितः । आङ्ग्लशासनस्य प्रयासेन शनैः शनैराङ्ग्लशिक्षाक्षेत्रविस्तारो जातः । भारते संस्कृतशिक्षाया उत्तरोत्तरं संस्थागतरूपविकासोऽपि प्रारभ्यत ।

६३. नेपालमा शिक्षा २१ पृ.
६४. " " २२ पृ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनेकान्यनुसन्धानकेन्द्राणि स्थापितानि । आङ्ग्लभाषामनधीत्य गवेषणात्मकमध्ययनं दुःशकं भवतीति विश्वास आङ्ग्लशिक्षाप्रभावादितस्ततो वर्धमान आसीत्।[६५] नेपालेऽपि प्रशम-राणाप्रधानमन्त्रिणा जङ्गवहादुरेण इङ्गलैण्डयात्रातः परावृत्तेन १९१५ तमे वैक्रमवत्सरे (ई. १८५८) मिस्टर रोज इत्याख्यस्याऽऽङ्ग्लाध्यापकस्य प्रधानशिक्षकत्वे दर्वारस्कूलनाम्न्या आङ्ग्लपाठशालायाः स्थापना व्यधायि । एपा पाठशाला १९४२ तमवैक्रमवत्सरपर्यन्तं राज-भवनान्तर्गताऽऽसीत् ।[६६] इतिहासविदां कथनानुसारं जङ्गवहादुरशासने प्रथमं नीलदेवपन्तेन तदनु तत्तनुजनुषा वाचस्पतिपन्तेन (१९३१ वैक्रमाब्दे) द्वे संस्कृतपाठशाले स्थापिते । ते चोभे पश्चान्निरुद्धे । एतदनन्तरमेव संस्कृतानुरागिभिरनुरुद्धो जङ्गवहादुरसूनुर्जनरलजितजङ्गो विष्णुहरिपण्डितं नियोज्य राजराजेश्वर्यां संस्कृतपाठशालां स्थापितवान् । सेयमाधुनिक-नेपालस्य प्रथमा प्रसिद्धा संस्कृतपाठशालाऽऽसीत् ।[६७] सैषा किञ्चित्कालपर्यन्तमवस्थाय पश्चान्निरुद्धा । तदनन्तरं पूर्वनेपाले भोजपुरमण्डलान्तर्गते दिङ्लाख्यस्थाने १९३२ वैक्रमाब्दे षडानन्दब्रह्मचारिणः सत्प्रयासादेका संस्कृतपाठशाला स्थापिता । न केवलं पूर्वनेपालवास्त-व्यानां संस्कृताध्येतॄणां कृतेऽपि तु नेपालस्यान्यभागस्थानां प्रवासस्थानां च संस्कृताध्येतॄणां संस्कृतज्ञाने ख्यातनामिका सा संस्था महदाकर्षणकेन्द्रमासीत् । तत्र च विशेषतया वेद-व्याकरणकाव्यकोशादिविषया अध्याप्यन्ते स्म । काष्ठमण्डपेऽपि प्रधानमन्त्रिणा रणोद्दीपसिंहेन राजपुष्करिण्या (रानीपोखरी) उत्तरस्यां दिशि १९३४ तमवैक्रमाब्द एकस्याः संस्कृतपाठशालायाः स्थापना व्यधायि । विद्यार्थिनस्तत्र व्याकरणकाव्यज्यौतिषादि-विषयान् यथेच्छमधीयते स्म । सैव पाठशाला ततो रणमुक्तेश्वरनाम्नि स्थाने किञ्चित्काल-पर्यन्तं स्थानान्तरिताऽभवत् । अध्ययनाध्यापनादीनामसौष्ठवेनासौविध्येन च राज-पुष्करिण्याः पश्चिमायां दिशि वर्तमाने भवने प्रधानमन्त्रिणो वीरशमशेरमहाभागस्य प्रयासेन १९४८ तमवैक्रमाब्दे सुव्यवस्थया समं सा पाठशाला प्रतिष्ठामलभत । तस्यां च पाठशालायां दशसंख्यका विद्वांसो वेदव्याकरणज्यौतिषकाव्यादिविषयानध्यापयन्ति स्म । प्रधानपण्डितपदमलंकर्तुं विष्णुहरिपण्डितो न्ययुज्यत । प्रथमतस्तत्राध्ययनाध्यापनपरीक्षण-पद्धतयः स्वतन्त्ररूपेणैव प्रचलिता अभूवन् । १९५५ तमवैक्रमवत्सरतः काशिकराजकीय-संस्कृतमहाविद्यालयेन सार्कं पाठ्यक्रमपरीक्षाविधौ निकटसम्बन्धे सति वेदव्याकरणज्यौतिष-विषयानधीत्य मध्यमां परीक्षां दातुं विद्यार्थिनो वाराणस्यां गच्छन्ति स्म । तत्र प्रथमतो

---

६५. रमेशचन्द्र मिश्र– हिस्ट्री अफ बेङ्गाल ४२५ पृ.

६६. पण्डितनयराजपन्तस्यायं विचारः ।

६७. नेपाल-संस्कृत-परिषद्– संस्कृत-संस्कृति ३ पृ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मध्यमापर्यन्तमेवाध्ययनाध्यापनादिकं प्रचलदवर्तत। पश्चात् १९८० तमवैक्रमवत्सरतः पण्डितराजसोमनाथप्रभृतीनां विदुषां सत्प्रयत्नैः शास्त्र्याचार्याणामपि पठनपाठनादीनि प्रारब्धान्यभवन् । १९८९ वैक्रमाब्दतः १९९० तमे वैक्रमाब्दे प्रधानमन्त्रिणो जुद्धशमशेरमहोदयस्य प्रयासात् शिक्षकसंख्यासंवर्द्धनेन समं वेदव्याकरणन्यायज्यौतिषसाहित्यादिविषयेष्वध्ययनाध्यापनादिव्यवस्थया च पाठशालाया महती समुन्नतिर्जातेति प्रतीयते।[६८] सा च संस्कृतपाठशाला न केवलं काष्ठमण्डपोपत्यकान्तर्गतानां संस्कृताध्येतॄणामपि तु राष्ट्रस्य विविधेषु स्थानेषु वास्तव्यानां विशेषतः पश्चिमनेपालवर्तिनां संस्कृतविद्यानुरागिणां च महाविद्याकेन्द्रत्वेन प्रथिताऽभूत् । तत एव संस्कृतशिक्षां लब्धवन्तश्छात्रा नेपालस्यानेकेषु दुर्गमादिस्थानेष्वपि संस्कृतशिक्षां प्रासारयन्नित्यवगन्तुं शक्यते ।

इत्थं च दिङ्लापाठशालारानोपोखरोसंस्कृतप्रधानपाठशालादितो राष्ट्रस्य प्रतिमण्डलं प्रतिग्रामं संस्कृतशिक्षायाः प्रचारप्रसारविधावपूर्वं जागरणं समपद्यत । फलतः पोखरा (वै.१९५०) जनकपुर (वै. १९६६) मटिहानीरिडीगुल्मीकपिलवस्तुप्रभृतिषु देशस्य विविधेषु स्थानेषु संस्कृतप्रधानपाठशालाः स्थापिता अभूवन् ।[६९] अष्टपञ्चाशदुत्तरैकोनविंश (१९५८) वैक्रमशताब्द्यां प्रधानमन्त्रिणा देवशमशेरमहोदयेन युगपदेव स्थापितैः सप्तपञ्चाशत्सङ्ख्यकैः प्रारम्भिकपाठशालारूपैः संस्कृतविद्याकेन्द्रात्मकैः निःशुल्कावासभोजनादिसौविध्यं सम्पादयद्भिः संस्कृतच्छात्रावास (तीनधारापाकशाला) सदृशैरावासैश्च सहितैः संस्कृतविद्यालयैः संस्कृतशिक्षायाः प्रचुरः प्रसारः समजनि ।

तदानीन्तनी शिक्षणपद्धतिश्च पारम्परिक्येवाऽऽसीत् । ख्यातनामिकयोर्दिङ्लारानोपोखरीसंस्कृतपाठशालयोर्वाराणस्या समं निकटसंपर्कानन्तरमत्रत्याऽपि शिक्षणपद्धतिः क्रमशः पाठ्यक्रमपरीक्षाभ्यां नियन्त्रिताऽभवत । ततश्च क्रमागता शास्त्रसंरक्षणैकलक्ष्या कण्ठस्थीकरणमूला मौखिकाध्ययनाध्यापनप्रणाली क्रमशो ह्रासं गता । तथाऽपि शास्त्रीयविषयाणां प्रौढपाण्डित्येन विमलज्ञानसंपादनेन च संस्कृतवाङ्मयस्य संरक्षणं प्रचारप्रसारौ च तदानीमपि संस्कृतशिक्षाया उद्देश्यमभवत् । तदानीन्तना अध्यापकाश्च शास्त्रीयसरणिमाश्रित्यैवाध्यापयन्त आसन् । तदानीन्तनसंस्कृतशिक्षणपरिपाटीपरिशीलनेन नैपालकसंस्कृताध्येतृसमाजे प्रचलितायाः संस्कृतशिक्षणपद्धतेः स्वरूपसङ्केतः प्राप्तुं शक्यते । तत्सम्बन्धे किञ्चिदत्र चर्च्यते ।

---

६८. कलेज अफ एजुकेशन– नेपालमा शिक्षा २३ पृ.

६९. नेपालसंस्कृतपरिषद्– संस्कृत–संस्कृति १६ पृ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एकस्मिन्नेव भवने राजकीयनियमानुसारेणैव प्रचलन्त्यो रानीपोखरीसंस्कृताङ्ग्लपाठशालयोरवकाशविषये शिक्षकाणां पारिश्रमिकविषये च समानो नियमो नादृश्यत। संस्कृतपाठशालायां पूर्णिमामावस्ययोरर्धावकाशोऽष्टमीप्रतिपदोश्च पूर्णावकाशो मन्यते स्म। आङ्ग्लविद्यालये तु पूर्वं शनिवासरेऽर्धावकाशो रविवासरे पूर्णावकाशः पश्चाच्च शुक्रवासरेऽर्धावकाशः शनिवासरे च पूर्णावकाश इति व्यवस्था स्वीकृताऽऽसीत्। पारिश्रमिकविषयकं वैषम्यं श्री ५ महेन्द्रशासनकाले परिहृतम्। संस्कृतपाठशालायां वेदादिविषयशिक्षणपरिपाटी चेत्थमवर्तत।

तत्र च वेदे शुक्लयजुर्वेदमाध्यन्दिनवाजसनेयशाखायाः संहिताभागस्यैव शिक्षणं प्रचलति स्म। तच्च वेदशिक्षणं याज्ञवल्क्यशिक्षोक्तविधिना हस्तेन स्वरदानपुरःसरं गुरुमुखोच्चारणानूच्चारणप्रणाल्यैवाक्रियत।

व्याकरणादिविषये च गुरुवदनं विलोकयन्तो बद्धासनाश्छात्रा गुरुसन्निधौ पङ्क्तिबद्धक्रमेण सावधानमानसा निवसन्ति स्म। कथयेति गुरुवचनश्रवणानन्तरं वाक्पटुः कश्चिच्छात्रोऽध्ययनीयस्थलस्य पङ्क्तिमुच्चारयति स्म। तदनन्तरं शिष्योक्तग्रन्थभागसम्बद्धपूर्वज्ञानविधिवर्णनपुरःसरं गुरुणा सम्यग् व्याख्यायत। छात्राणां बोधाबोधपरिज्ञानाय च पश्चात् पूर्वोक्तग्रन्थभागं वाचयित्वा बोधनिश्चये सति पुनरपि सनिदर्शनं सरलया सरण्या तदुक्तग्रन्थभागं व्याख्याय प्रबोध्य लेखयित्वा छात्रप्रश्नान् समाधाय च विषया अपाठचन्त।

गणितविषये तु छात्राः शिलाफलकेषु गुणनादिविधिलेखनपुरःसरमध्याप्यन्त। निखिलच्छात्राणां पाठ्यपुस्तकं विलोक्य पठनं गुरूणां च पुस्तकावलोकनं विनैव कण्ठाग्रपाठनं च प्रचलदवर्तत। गुरूणां कृते तदानीं पुस्तकविलोकनपूर्वकमध्यापनमतीव संकोचविषयममन्यत। वेदन्यायव्याकरणगणितकाव्यकोशादिविविधविषया अध्ययनीयतया तदानीं निर्धारिता आसन्।

रानीपोखरीतः नधारापाकशालानामके छात्रावासे सायंप्रातःकालिकाध्ययनाय केचनाध्यापका नियुक्ता आसन्। तादृशी व्यवस्थेदानीमपि प्रचलति। अथ च प्रातरुत्थानं शौचसन्ध्यावन्दनादिविधानमधीतपाठाभ्यसनं शुद्धं धौतं परिधाय भोजनागारगमनं निरामिषसात्त्विकभोजनं विधाय पाठशालायां गत्वा यथाविधि पठनं पाठलगनं कदाचिदन्ताक्षरीकरणं ब्रह्मचर्यसंरक्षणं स्वास्थ्यपालनं विविधविद्यार्जनं चेत्यादयो नियमाश्छात्रैः परिपालिता अभूवन्। प्रायस्त एव नियमा इतरसंस्कृतावासेष्वपि प्रथिता आसन्। शिक्षणे यथासम्भवमावासभोजनादौ च निःशुल्कतानियमः परम्पराप्राप्त एवावर्वत।[७०] उत्तमोत्तमाश्छात्रा निम्न-

७०. सामान्यतो नेपाले समग्रा शिक्षा निःशुल्केवाऽऽसीत्। पश्चाच्च संस्कृतेतरशिक्षा सशुल्कतां गता।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

निम्नतमच्छात्राणां पाठं लगयन्ति स्म, कदाचिच्चाध्यापनकार्यमपि संपादयन्ति स्म । अध्यनीयविषयस्य चतुर्थांशमेव ज्ञानमध्यापकेन सम्पादनीयमन्यज्ज्ञानांशत्रयं सब्रह्मचर्यादिभिरधिगन्तव्यं भवतीत्यादि वचनमपि तदानीन्तन्यां शिक्षणपरिपाट्यां चरितार्थमासीत्।[७१] विशेषतो विद्यार्थिनो मुखं व्याकरणं स्मृतमिति वचनानुसारेण तदानीं व्याकरणाध्ययन एव प्रवर्तिता अभूवन्। एकस्मिन्नेव परिवारे पञ्चषाणां जनानां व्याकरणमध्यमपरीक्षोत्तीर्णतां विलोक्य तदनुमातुं शक्यत एव। तदानीन्तने समाजे यः कोऽपि संस्कृतज्ञो वेदधर्मशास्त्रज्यौतिषादिविषयाणां ज्ञातृरूपेणामन्यत । अतस्तदानीन्तनाः संस्कृताध्यायिन ऐच्छिकरूपेणापि व्यवहारोपयोगिनोऽन्यानपि ज्यौतिषादिविषयानधीयते स्म ।

संस्कृतशिक्षणपद्धतावाधुनिकविषयसमावेशः

संस्कृताध्यायिनां छात्राणामाधुनिकविषयकज्ञानसम्पादनाय संस्कृतशिक्षायाः पाठ्यक्रमे भूगोलेतिहासादीनां विषयाणामपि समावेशो भवत्वित्यादिकान् विचारान् पुरस्कृत्य चतुरधिकद्विसहस्रतम (२००४) वैक्रमाब्दस्याऽऽषाढमासस्य प्रथमदिनतः संस्कृतच्छात्रावासस्थितै रानीपोखरीसंस्कृतप्रधानपाठशालायामध्येतृभिर्जयतु संस्कृतमित्याख्यान्दोलनस्य सूत्रधारैर्निखिलैश्छात्रैः स्वकीयमान्दोलनमारब्धमासीत्। तदपराधेन चतुर्दश छात्रा देशाद् बहिष्कृताः।[७२] तदान्दोलनेन संस्कृतशिक्षायाः पाठ्यक्रमे शास्त्रीयविषयैः सममाधुनिकविषयाणां विनियोगः समजनि । ततश्च संस्कृताध्यायिनो विद्यार्थिन आधुनिकविषयांश्चाधीत्य पाश्चात्त्यपौरस्त्यविषयैर्युगपदेव परिचिता दृश्यन्ते ।

(ख) नवीनशिक्षाप्रणालीप्रारम्भपर्यन्त संस्कृतशिक्षणस्वरूपम्

रानीपोखरीसंस्कृतप्रधानपाठशालायामेव शास्त्र्याचार्यपर्यन्तानां विषयाणामध्ययनाध्यापनपद्धतिषु प्रचलन्तीषु सतीषु पञ्चसप्तत्युत्तरैकोनविंशतिशततमे (१९७५) वैक्रमाब्दे त्रिचन्द्रमहाविद्यालयस्य स्थापनात् प्रभृत्याङ्ग्लशिक्षणपद्धतौ क्रमागतं परिवर्तनं संस्कृतानुरागिणामपि चेतः समाकर्षयत्। फलतः प्रजातन्त्रोत्तरकालिके (२००७ वैक्रमाब्दे फाल्गुनस्य ७ दिनादुत्तरवर्तिकाल एव प्रजातन्त्रोत्तरकालः) नेपाल आङ्ग्लशिक्षाप्रदायिनामन्यमहाविद्यालयानामिवोच्चशिक्षाकेन्द्ररूपेण संस्कृतमहाविद्यालयस्थापनाविधौ राष्ट्रव्यापि जागरणमदृश्यत। तथाऽपि साधनाभावेन प्रोत्साहनाभावेन च जनभावनानुसारं बहुशः संस्कृतमहाविद्यालयाः स्थापयितुं नाशक्यन्त । सर्वप्रथमं सुन्सरीमण्डले २००८ वैक्रमाब्दे मार्गस्य २७ दिवसे पिण्डेश्वरनाम्ना संस्कृतमहाविद्यालय एकः प्रतिष्ठितोऽभूत् । तत्र च प्रारम्भतो मध्यमापर्यन्तानि वेदव्याकरणसाहित्यविषयाणामध्ययनाध्यापनानि प्रारभ्यन्त । अथ च तस्मिन्नेव

७१. सीताराम चतुर्वेदी– संस्कृत-शिक्षण-पद्धति ३८१ पृ

७२. ईश्वरीराज अर्याल– नयाँ नेपालको इतिहास २२९ पृ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवत्सरे दाङमण्डलान्तर्गते बिजौरीनामके प्रदेशेऽपि जनतासंस्कृतमहाविद्यालयनाम्नोच्चशिक्षणकेन्द्रमस्थाप्यत । स च महाविद्यालय एकादशोत्तरद्विसहस्रतमे (२०११) वैक्रमाब्दे महाविद्यालयरूपेण त्रयोदशोत्तरद्विसहस्रतमे (२०१३) वैक्रमवत्सरे च परीक्षाकेन्द्ररूपेण मान्योऽभवत् । तत्र च व्याकरणन्यायसाहित्यविषया अध्याप्यन्ते स्म । राष्ट्रस्यान्यान्यभागेष्विव राजधान्यां काष्ठमण्डपेऽपि जागरूकाणां संस्कृतानुरागिणां शासनस्य च साहाय्येनाष्टोत्तरद्विसहस्रतमस्य (२००८) वैक्रमसंवत्सरस्य पौषस्य चतुर्थे दिवसे रानीपोखरीसंस्कृतपाठशालाया भवनेऽस्थायिरूपेणोच्चशिक्षाकेन्द्ररूपेण च राजकीयसंस्कृतमहाविद्यालयस्य (इदानीं वाल्मीकिविद्यापीठस्य) स्थापनाऽजायत । स च प्रजातन्त्रप्रवर्तकस्य संस्कृतानुरागिणो राज्ञस्त्रिभुवनवीरविक्रमशाहदेवस्य करकमलाभ्यां नवोत्तरद्विसहस्रतम (२००९)-वैक्रमसंवत्सरस्य ज्येष्ठ एकत्रिंशे दिवसे समुद्घाटितः सम्यक् प्रतिष्ठितोऽभूत् । स्थापनाकालात् प्रभृति तत्र मध्यमात आचार्यकक्षापर्यन्ता वेदव्याकरणन्यायज्यौतिषसाहित्यप्राचीनन्यायवेदान्तपूर्वमीमांसाधर्मशास्त्रसांख्ययोगाश्च यथायथं पाठिता मान्याश्चाभूवन् । किञ्चित्कालानन्तरं सर्वदर्शनविषयस्य च समावेशेनैकादशशास्त्रीयविषयाणामन्याधुनिकविषयाणां चाध्ययनाध्यापनादयः प्रचालिता अविद्यन्त । ततश्च द्वाविंशोत्तरद्विसहस्रतमे (२०२२) वैक्रमाब्दे त्रिभुवनविश्वविद्यालयान्तर्गततया कीर्तिपुरप्रदेश आचार्यकक्षायाः सञ्चालनं धनुषामहोत्तरीमण्डलयोः क्रमशो लक्ष्मीनारायणयाज्ञवल्क्यसंस्कृतमहाविद्यालययोः संस्थापनं चेत्यादिना प्रयासेन संस्कृत उच्चशिक्षाप्रचारप्रसारकर्मणि महत् साहाय्यं जातमित्यवगन्तुं शक्यते ।[७३]

तदानीन्तनी शिक्षणपद्धतिश्च पतत्प्रकर्षरूपेण क्रमशोऽपचीयमाना पारम्परिक्येवाऽऽसीत् । या तदानीं वाराणस्यामन्यत्र च प्रचलन्त्यदृश्यत । विशेषतः पाठ्यक्रमेण परीक्षया च नियन्त्रिता शिक्षणप्रणाली छात्राणां प्रौढतमशास्त्रीयपाण्डित्यसम्पादनापेक्षया बाह्यचतुरस्रज्ञानायैव समर्थाऽभूत् । प्रजातन्त्रोत्तरनेपालस्यान्ताराष्ट्रियसम्बन्धसंवर्धनेन शास्त्रीयैर्विषयैः सममाधुनिकविषयाणां समावेशेन परीक्षाप्रणाल्या जटिलजालेन जीविकाप्रश्नेन च शास्त्रीयमध्ययनं शनैः शनैः क्षीणतामेवोपगतमुपगच्छद् वर्तत च ।

(ग) नवीनशिक्षाप्रणालीप्रवर्तनानन्तरं संस्कृतशिक्षणस्वरूपम्

अष्टाविंशत्युत्तरद्विसहस्रतम(२०२८)वैक्रमवत्सरतः सञ्चालितायाः नवीनशिक्षापद्धतेः प्रयोगः संस्कृतोच्चशिक्षायां त्रिंशदुत्तरद्विसहस्रतम(२०३०)वैक्रमवर्षतः प्रारब्धः । संस्कृतस्य पृथगध्ययनसंस्थानं त्रिभुवनविश्वविद्यालयान्तर्गततया दाङमण्डले समस्थाप्यत । तदन्तर्गततया पञ्चसंख्यकाः संस्कृतमहाविद्यालयाश्चतुर्षु विद्यापीठेषु (क्याम्पस) परिणताः ।

---

७३. (क) जनताविद्यापीठं दाङ– ऐंसेलु प्रथमाङ्कुरः । जनताविद्यापीठपरिचय ८३ पृ.

(ख) नेपालसंस्कृतपरिषद्– संस्कृतसंस्कृति १५ पृ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नवीनशिक्षापद्धतेरुद्देश्यानुकूलमुद्देश्यादिनिर्धारणं व्यधायि । पाठ्यविषयाणां कृते पाठसमयाः (पाठघटिका) निर्दिष्टाः । मध्यमाशास्त्र्याचार्यस्थाने प्रमाणपत्रस्नातकस्नातकोत्तरस्तरेषु विभज्य पाठ्यांशक्रमो व्यवस्थापितः । स्तरगतत्वेन विषयगतत्वेन पाठ्यांशगतत्वेन प्रकरणगतत्वेन च शिक्षणस्योद्देश्यं निरधार्यत । एतैर्मूलभूतैः प्रयोगैः सह सत्रव्यवस्थां पुरतो निधाय प्रचलिता नवीनशिक्षाप्रणाली साम्प्रतं संस्कृतक्षेत्रेऽप्यवकाशसाम्यं विदधती नवीनानुत्साहप्रदान् प्रसङ्गान् पुरः स्थापयन्ती विद्यते । राष्ट्रियविकाससेवाप्रयोगः शोधपत्रलेखनं चेत्येतौ विधी नवीनशिक्षाप्रणाल्यां विशेषतो नवीनतां वहन्तौ काममप्यनुसन्धानोन्मुखीं नवीनामाशामुत्पादयन्तौ दृश्येते अनुभूयेते च । प्रतिपाठ्यांशं निर्दिष्टेन शिक्षणविधिना पूर्वचर्चितं वेदव्याकरणन्यायज्यौतिषसाहित्यादिविषयैः सममितिहासपुराणस्याप्यध्ययनाध्यापनकार्यं यथायथं प्रचलति । सामान्यतो वेदादिविषयाणां पारम्परिकी शिक्षणपद्धतिश्च पूर्ववदिदानीन्तन्यां शिक्षणपरिपाट्यामपि स्वजीवनं वहन्ती वर्तत इव ।

संस्कृतशिक्षणे परीक्षाप्रयोगाः

वैदिकशिक्षणपद्धतौ परीक्षायाः प्रयोगो विद्यार्थिनः कार्यक्षमतायां शास्त्रज्ञानेऽनुशासने च क्रियते स्म । उपनिषत्स्वनेकाः कथा उपलभ्यन्ते, यत्र छात्राणां योग्यता विविधरूपाः परीक्षिता दृश्यन्ते । गोपालनं क्षेत्रसंरक्षणं शास्त्रार्थश्चेत्यादयः परीक्षणप्रकारास्तदानीं प्रचलिता दृश्यन्ते ।[७४] मूलतो विद्यायां व्रते च छात्रेणोत्तीर्णेन भाव्यमित्यासीदपेक्षा । तदनुसारेणैव ताः परीक्षाः सञ्चालिताः ।

सूत्रकालेऽपि प्रायस्त एवोपायाश्छात्रपरीक्षणाय प्रयुक्ता अभवन्निति तत्सम्बन्ध उल्लेखानुपलम्भादनुमातुं शक्यते ।

पाणिनिकाले शास्त्रसम्बन्धिन्याः परीक्षणपरम्पराया उल्लेखः प्राप्यते । प्रश्नोत्तरक्रमेण शास्त्रीयपरीक्षणप्रयोगस्तदा प्रचलित आसीदित्यनुमातुं पाणिनिसूत्रेषु प्रचुरा सामग्र्युपलभ्यते । परं स्पष्टतयोल्लेखाभावात् कियन्तः प्रकाराः परीक्षाया आसन्निति कथयितुं न पार्यते । न्यायसूत्रे ज्ञानग्रहणाभ्याससम्बन्ध उल्लेखो विद्यते ।

ई. पू. पञ्चमशताब्दीतः ई. षष्ठशताब्दीपर्यन्तं विशेषप्रसिद्धे तक्षशिलाविद्यापीठे छात्रपरीक्षणस्य विशिष्टो विधिर्विद्यमानः प्रतीयते । ततः शास्त्रेषूत्तीर्णानां परा ख्यातिर्वर्णितेतिहासे ।

---

७४. बृहदारण्यकोपनिषद्, छान्दोग्योपनिषच्च
राधीक्ष्योर्यस्य विप्रश्नः –पाणिनिः १।४।३९
निगृह्यानुयोगे च –पाणिनिः ८।२।९४
मध्ये पदे निवचने च –पाणिनिः १।४।७६
ज्ञानग्रहणाभ्यासस्तद्विद्यैश्च सह संवादः– न्या. सू. ४।२।४७

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

ई. द्वितीयशताब्दीतो लब्धख्यातौ नालन्दाविश्वविद्यालयेऽपि छात्राणां प्रवेशार्थं द्वारपण्डितैः परीक्षा क्रियते स्मेति विवरणं ह्यु एन्सांगस्य यात्राविवरण उपलभ्यते। तत्र यदि प्रवेशकाले परीक्षाऽऽवश्यक्यासीत् तर्हि निश्चप्रचमध्ययनसमाप्तावपि काचन परीक्षाऽवश्यं क्रियमाणा स्यादिति संभावयितुं पार्यते । यद्यन्यविधा परीक्षा न स्यात् तदाऽपि मौखिकी परीक्षा तु निश्चप्रचं स्यादिति शक्यत आख्यातुम् । नवमशताब्द्यां प्रतिष्ठापिते विक्रमशिलाविश्वविद्यालयेऽपि द्वारपरीक्षाया विवरणं प्राप्यते। परन्तु मौखिक्यतिरिक्ता लेखात्मिकाऽन्या वा कीदृशी परीक्षाऽऽसीदिति तत्रापि नास्ति स्पष्ट उल्लेखः।

मौखिकातिरिक्ता तत्रैका परीक्षा प्रचलिता श्रूयते । तक्षशिलास्नातकत्वेन विश्रुतयशसा कुमारजीवकेन सप्तवर्षावधिना समयेन महता संरम्भेणाध्ययनं कृतम् । अन्ते च परीक्षणक्रम आचार्येण खनित्रं लवित्रं च दत्त्वा स योजनाभ्यन्तरतः कमपि तादृशं पादपमेकमानेतुमादिष्टो यत्र कोऽप्यौषधीयगुणो न स्यात् । जीवको गतोऽन्वेष्टुम्, परं तेनैकोऽप्यौषधानुकूलगुणवर्जितः पादपो नालम्भि । तेन विनिवेदितम्– वृक्षेषु तादृशः कोऽपि नास्ति यस्मिन्नौषधोपयोगिगुणा न स्युरिति तेन जीवकेन विशेषयोग्यतया परीक्षोत्तीर्णेति।[७५]

तदित्थं प्राचीनपरिपाट्यां शास्त्राभ्यासेन सहैव तस्य व्यावहारिकप्रयोगस्तन्मूला योग्यताऽपि परीक्षायाः प्रबलः पक्ष आसीदिति निश्चितं भवति ।

तदुत्तरं मिथिलायां नवद्वीपे च प्रचलितायां संस्कृतशिक्षणपरम्परायां प्रसिद्धायाः शलाकापरीक्षायाः पुस्तकलेखनपरीक्षायाश्च उल्लेखः प्राप्यते । शलाकापरीक्षा चाधीतानां विषयाणां समग्रतायाः परीक्षणायाधीते ग्रन्थे शलाकाविन्यासेन यः कोऽपि ग्रन्थांशः स्पृष्टो भवेत्, तस्याऽऽधिकारिक ज्ञानमपृच्छ्यतेति तद्विवरणतो ज्ञायते ।[७६]

नेपाले प्रचलितायामपि प्राचीनशिक्षणपद्धतौ प्रायस्त एव परीक्षणप्रकाराः प्रायुज्यन्तेति संभावनीयं भवति । लिच्छविकाले तदुत्तरमल्लशासनोदयात् प्रागपि नेपालस्तन्त्रादिशास्त्राणां महत् शिक्षाकेन्द्रमासीदिति लिखितचरमेतत् । तत्र च परीक्षणप्रयोगस्य स्पष्टोल्लेखो न लभ्यते । परं तदानीं विद्याकेन्द्रत्वेन प्रथिते नेपाले निश्चप्रचमध्येतॄणां परीक्षणविधिः स्यादेव। स च प्राचीनसंस्कृतशिक्षणपद्धतौ प्रचलितेष्वेव विधिष्वन्यतमो भवेदिति शक्यतेऽनुमातुम् ।

मल्लकालेऽपि द्वादशशताब्दीतश्चतुर्दशशताब्दीपर्यन्तं संस्कृतशिक्षाकेन्द्रत्वेन प्रथिते नेपालेऽनेकेषां बहिर्देशेभ्यः समागतानां विदुषामध्येतॄणां चाध्ययनपरम्परा प्रचलन्तीतिहास उल्लिखिता। अतस्तेषां योग्यता परीक्षणविधिना केनचित् तदा प्रचलितेन भाव्यम्, परं तत्सम्बद्ध स्पष्टं प्रमाणमनुपलब्धमिति मौखिकशलाकादयः केचन परीक्षणविधयः प्रचलिताः स्युरित्यनुमीयते । निखिलविद्याकेन्द्रत्वेन प्रथितायां वाराणस्यां १७९१ तमे ई. वर्षे आरब्धः

७५. सारस्वती सुषमा २२ वर्ष २ अङ्क (व. सं. २०२४) १२८ पृ.

७६. राधाकुमुद मुखर्जी– एन्सियन्ट इण्डियन एजुकेशन ५९८ पृ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

काशिकराजकीयसंस्कृतमहाविद्यालय आधुनिकभारते संस्कृतशिक्षणस्य संस्थागतविकासक्रमे प्रथमं प्रधानसंस्कृतशिक्षणकेन्द्रमासीत्। भारते नेपाले वाऽऽधुनिकयुगे प्रचलतां संस्कृतशिक्षण-क्रमाणामुपरि सर्वाधिकः प्रभावस्तस्यैव महाविद्यालयस्यासीदिति नास्ति तिरोहितं विपश्चिताम्। तत्र च काशिकराजकीयसंस्कृतमहाविद्यालये तत्स्थापनानन्तरमपि परीक्षाक्रमो मौखिकप्रधान एवाऽऽसीत्। लेखात्मकपरीक्षणक्रमस्तत्राध्येतॄणां लेखाभ्याससंवर्धनाय ई. १८४६ वर्षात् परमेव सञ्चालितः।[७७] स चायं परीक्षणक्रमः १८७९ ई. वर्षपर्यन्तं केवलं छात्रयोग्यता-मात्रसूचकैः प्रमाणपत्रैः प्रमितोऽभूत्। छात्रेण ये ये विषया अधीता यस्य यस्य सकाशेऽधीता-स्तेषां विषयाणां तेषामध्यापकानां ससम्मतिकं समुल्लेखं विधाय प्रमाणपत्राणि व्यतीयन्त।[७८] तदानीमुत्तमपरीक्षानाम्ना यथोचितपरीक्षानाम्ना च परीक्षणविधिः सञ्चालितोऽभूत्। १८८० ई. वर्षपर्यन्तं तत्र वार्षिकपरीक्षानाम्ना परीक्षणविधिः सञ्चालितोऽभूत्। १८८० ई. वत्सरतः प्रथमामध्यमोत्तमेति नामनिर्देशपुरःसरं पदवीप्रदानलक्ष्याणां परीक्षाणां क्रमो निर्धारितः। पाठ्यक्रमश्च के के ग्रन्थाः कस्यां कस्यां परीक्षायां स्थाप्या इति निर्धार्य परीक्षाणां वर्गीकरणेन समपाद्यत। सप्ताशीत्युत्तराष्टादशशततमे (१८८७) ई. वर्षे पुनर्मध्यमोत्तमयोः परीक्षयोः प्रतिविषयपार्थक्येन सञ्चालनं प्रारब्धम्। अष्टादशोत्तरकोन-

७७ सारस्वती सुषमा प्रथमे वर्षे प्रथमेऽङ्के (ई. १९४२) २३ पृ.

७८. तदानीन्तनप्रमाणपत्रस्यैकमुदाहरणम्–

"स्वस्ति श्रीमत्सकलगुणालङ्कृतकाशीस्थराजकीयप्रधानपाठशालायां ज्ञापनाम्नो मनेगशर्मणः पुत्रः श्रीकीर्तिनाथशर्मा मैथिलो नवानीग्रामनिवासी स्वदेश रघुवंश सिद्धान्तकौमुदीं चाधीत्याधिकव्युत्पत्ति-सम्पादयिषया पञ्चसप्तत्युत्तराष्टादशशततमे खिष्टाब्दे प्रविष्टो व्याकरणे मनोरमाशब्दरत्नपरिभाषेन्दु-शेखरशब्देन्दुशेखरभूषणमहाभाष्यनवाह्निकानि धर्मशास्त्रे मिताक्षरां शब्दखण्डे व्युत्पत्तिवादशक्तिवाद-विषयतावादान् न्याये मुक्तावलीं माथुरीपञ्चलक्षणीं वेदान्ते पञ्चदशीमलङ्कारे कुवलयानन्दसाहित्य-दर्पणकाव्यप्रकाशान् काव्ये माघनैषधादीनि चाध्यष्ट। अधीतेष्वेषु ग्रन्थेषु दत्तोत्तमपरीक्षोऽयमिदानीं पाण्डित्यकार्यकरणं समर्थः सम्पन्न इत्यर्थबोधकमस्मै मेधाविने सुशीलाय कुलीनायाभ्यासशालिने नियतोपस्थितिकाय वितरन्ति। शम् माघवदि ८ संवत् १९३५

बालशास्त्री	देवकृष्णशर्मा
द्विवेदबस्तीरामशर्मा	वामनाचार्याः
कैलाशचन्द्रशर्मा	पं. वेङ्कटेशशर्मा
पं. शीतलाप्रसादशर्मा	रामामश्रशास्त्री
शिवकुमारशर्मा	
बापूदेवशास्त्री	

सारस्वती सुषमा प्रथमे वर्षे प्रथमेऽङ्के २६ पृ.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

विंशतितमादीशवीयवर्षाच्च (१९१८) प्रथमामध्यमाशास्त्र्याचार्यनाम्ना परीक्षाक्रमश्चतुर्धा व्यभज्यत । ततस्त एवोपाधयः प्रचलितास्तत्सम्बद्धैरन्यैः शिक्षासंस्थानैरपि तदेवानुसृतम् । अद्यावधि स एव क्रमो न्यूनाधिकपरिवर्तनसहकृतश्चलन् वर्तते ।

नेपालेऽपि रानीपोखरीसंस्कृतप्रधानपाठशालायाः पाठक्रमः परीक्षाक्रमश्च सं. १९५५ (ई. १८९८) वर्षात् काशिकराजकीयसंस्कृतमहाविद्यालयीयाभ्यां ताभ्यां पाठक्रमपरीक्षाक्रमाभ्यां सह सम्बद्धौ जातौ । अत इहापि सैव परीक्षा समचलत् । षट्चत्वारिंशदधिकाष्टादशशततमाद् (१८४६) वर्षात् परं काशिकराजकीयसंस्कृतमहाविद्यालयेनोपाधिवितरणनिमित्ता परीक्षाप्रणाली संचालिता । तस्याश्चानुकरणमन्यत्रापि विद्याकेन्द्रेष्वभवत् । परं नेपालस्य प्राचीनकालादेव बाह्यप्रभावस्वातन्त्र्यादिह स्वतन्त्र एव शिक्षणपरीक्षणपद्धती प्राचलताम् । वाराणस्यां परीक्षणप्रणालीप्रचलनात् परं द्विपञ्चाशद् (५२) वर्षोत्तरमेव नेपाले तस्य प्रभावः समजनि । एतत्पूर्वं चतुस्त्रिंशदधिकैकोनविंशतिशततम (१९३४) वैक्रमवत्सरतः १९५५तमवैक्रमवत्सरपर्यन्तं नेपाले मौखिकशलाकापरीक्षादयः पुरातना एव परीक्षाप्रकाराः प्रचलिता आसन्निति तर्कयितुं शक्यते । व्याकरणादिविषयेषु मध्यमापर्यन्तमिहाधीत्य परीक्षां दातुं परीक्षार्थिनो वाराणसीमगमन् । १९७२वैक्रमवर्षात् परं पण्डितराजसोमनाथप्रभृतीनां विदुषां सत्प्रयासेन शास्त्र्याचार्यपरीक्षापर्यन्तस्य परीक्षाक्रमस्य कृतेऽप्यध्ययनाध्यापनव्यवस्था संस्कृतप्रधानपाठशालायां समजनि । तदानीं शास्त्र्याचार्यपरीक्षे अपि काशीस्थराजकीयसंस्कृतमहाविद्यालयप्रचलितपद्धत्या काश्यामेव प्रादीयेतां नैपालकैर्विद्वद्भिः । अशीत्युत्तराष्टादशशततम-(ई. १८८०) वर्षादारब्धः स च परीक्षाक्रमो लेखात्मकमौखिकरूपाभ्यामुभाभ्यां क्रमाभ्यां प्राचलत्, प्रचलति च न्यूनाधिकपरिवर्तनेन सहाद्यावधि ।

परीक्षाप्रणालीसम्बन्धेऽस्त्यवधेयमिदं यद् यदाप्रभृति परीक्षोपाधिप्रदानलक्ष्यतां गन्तुमारभत, तदाप्रभृति संस्कृतशिक्षणस्य जीविकामूलत्वं परीक्षाप्रधानत्वं च तत आरब्धम् । उपाधिमूलपरीक्षाप्रणालीप्रारम्भात् पूर्वमध्येतॄणां ज्ञानवर्द्धनाय परीक्षा साधनीभूताऽऽसीत् । परं परवर्तिनि समये परीक्षायाः शनैः शनैः प्राधान्यवृद्ध्याऽध्ययनं साधनतां गतम्, परीक्षैव साध्यतां गता। अतोऽध्ययनाय परीक्षा परीक्षाया एवाध्ययनमिति विकल्पद्वयं स्पष्टं निभालनीयं भवति परीक्षासम्बन्धिनि विचारक्रमे । यथा यथा संस्कृतशिक्षणस्य व्यवहारोपयोगितायाः प्रश्नः संवर्धमानो जातस्तथा तथा संस्कृतशिक्षायामितिहासार्थशास्त्रभूगोलादीनामाधुनिकविषयाणां समावेशोऽपि वृद्धिं गत इति वर्तमानसंस्कृतशिक्षणक्रम एष एव विशेषः परिलक्ष्यते । एतदनुसारेणैव परीक्षाकेन्द्रितत्वमपि वृद्धिं गतम् । पञ्चोत्तरद्विसहस्रतम (२००५)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वैक्रमवत्सरात् सप्तोत्तरद्विसहस्रतम (२००७) वैक्रमवत्सरपर्यन्तं नेपाले स्वतन्त्रा परीक्षा संचालिताऽऽसीत्, यस्या अनुमोदनं पश्चात् काशिकराजकीयसंस्कृतमहाविद्यालयेन संपादितम् । नेपाले राजकीयसंस्कृतमहाविद्यालयस्थापनानन्तरं २००८तम-वैक्रमवत्सरादेव नेपाले काष्ठमण्डपवर्तिनि सरस्वतीसदने संस्कृतपरीक्षाकेन्द्रं स्वीकृतिमलभत । तदुत्तरं पुनर्नेपालकसंस्कृतपरीक्षणपद्धतिः काशिकराजकीयसंस्कृतमहा-विद्यालयसम्वद्धा समजनि । इयमेव सरणिः २०१७तमवैक्रमवत्सरपर्यन्तं प्राचलत् । २०१८तमाद् वैक्रमवत्सरात् त्रिभुवनविश्वविद्यालयेन स्वकीया संस्कृतशिक्षणव्यवस्था संचालिता । पूर्वमध्यमात आचार्यपर्यन्ताः परीक्षा अपि तेन स्वयमेव संचालिताः । २०२१तमवैक्रमवत्सरात् पूर्वमध्यमा परीक्षा तु शिक्षामन्त्रालयपरीक्षाशाखया सञ्चालिता वर्तते । यदा त्रिभुवनविश्वविद्यालयेन स्वतन्त्रतया संस्कृतशिक्षणपरीक्षणपद्धतिः संचालयितुमारब्धा, ततः परमुपाधयोऽप्येतेन स्वयमदीयन्त । तदानीं प्रचलितायां परीक्षाप्रणाल्यां मध्यमाशास्त्र्याचार्यपरीक्षासु क्रमशः खण्डद्वयं खण्डत्रयं च व्यवस्थापितमासीत् । मध्यमपरीक्षा खण्डद्वयविभक्ता शास्त्रिपरीक्षाऽपि खण्डद्वयविभक्ता-ऽऽचार्यपरीक्षा च खण्डत्रयविभक्तेति परीक्षाणां खण्डकल्पनाऽऽसीत् । प्रतिखण्डं तत्तद्विषयेषु वार्षिकी परीक्षाऽगृह्यत । अन्तिमखण्डोत्तरणानन्तरमेवोपाधिदानं व्यधीयत । पूर्वखण्डोत्तरणा-नन्तरमेवोत्तरखण्डेऽध्ययनमङ्गीकृतमासीत् । तदित्थं परीक्षोत्तरणं नामोत्तरकक्षाप्रवेशा-धिकारप्राप्तिरित्यासीदर्थः ।

कालक्रमेण परीक्षाया उद्देश्येऽपि परिवर्तनं समजनि । तच्चेत्थं विचारयितुं शक्यते-सामान्यतः परीक्षाया उद्देश्यं च–

१. छात्राणां धारणाशक्तेः स्मरणशक्तेर्वा परिचयः ।
२. विद्यार्थिनामर्जितज्ञानावगमनम् ।
३. अधीतविषयाणामर्थावगमः सम्यग् वर्तते न वेति समीक्षणम् ।
४. अधीतपाठस्य ज्ञानमाधिकारिकमस्ति न वेति समीक्ष्य भाविपाठभारवहनक्षमतायाः समीक्षणम् ।
५. छात्रस्य कार्यक्षमताज्ञानम् ।
६. अर्जितज्ञानाश्रयेण जीवनेऽवलम्बनप्राप्तिश्चेत्यादिं ।
७. उल्लिखितेषु परीक्षोद्देश्येषु केवलं चरममेव प्राधान्येन प्रश्रयं प्राप्तवत् ।

तदुत्तरं च परीक्षैकलक्ष्यतयाऽध्ययने महत् शैथिल्यमन्वभूयत ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

२०२८तमाद् वैक्रमवत्सरात् प्रवर्तितया नवीनशिक्षाप्रणाल्याऽस्याः स्थितेः समाधानायोपायाः प्रस्तुताः। केवलं वार्षिकपरीक्षैव छात्रप्रतिभायाः कार्यक्षमतायाश्च परिचायिकाऽमन्यत ततः प्राक् । परमेतदासीदवश्यपरिवर्त्यम् । अतो नवीनशिक्षया सत्रात्मिकां पद्धतिमनुसृत्यान्तरमूल्याङ्कनपरिपाटी प्रारब्धा । प्रतिवर्षं सत्रद्वये विभक्तोऽध्ययनक्रमः। सत्रद्वय एव च परीक्षाया अपि व्यवस्थापनं व्यधायि । किं च परीक्षायामपि नवीना व्यवस्था व्यधीयत। लघूत्तरात्मका निबन्धात्मकाश्चेति विभागद्वयं विधाय प्रश्ना द्वैविध्यं नीताः । अध्येयविषयस्य कोऽप्यंशोऽस्पृष्टो न तिष्ठेदिति प्रश्ननिर्माणेऽवधानं प्रादीयत। परीक्षायां प्रदेयेष्वङ्केष्वान्तरमूल्याङ्कने लब्धानामङ्कानामपि योजनमावश्यकं व्यधीयत। आन्तरमूल्याङ्कने च मौखिकरूपेण लेखपद्धत्या गृहकार्यतया च प्रष्टव्यविषयवैविध्यं व्यवस्थाप्य छात्राणामध्ययनसम्बद्धमाधिकारिकं ज्ञानमासादयितुमन्तराऽन्तरा प्रगतिं समीक्षितुं च नवीनो विधिः प्रायुज्यत । सत्रात्मकशिक्षणपद्धतिसंचालनेन सहैव २०३०तमाद् वैक्रमवत्सरात् स्वतन्त्रतया संस्थापिते संस्कृताध्ययनसंस्थानेऽस्मिन्नधुना परीक्षाया एष एव विधिः प्रचलन्नस्ति ।

उपसंहारः

सर्वज्ञस्य परमात्मनो निःश्वसितत्वेन स्वीकृतैरपौरुषेयैर्वेदैः सहैव प्रवृत्ता सेयं संस्कृतशिक्षणपरम्पराऽन्तराऽन्तरा क्वचित् किंचिद् ध्रसन्ती क्वचिच्च किंचिद् विकसन्ती सरस्वती नदीवाधुनापर्यन्तं वहन्ती विद्यते । अध्ययनीयविषयप्राधान्यक्रमेऽपि क्वचित् किंचित् परिवर्तनं वहन्ती क्वचिच्च मूलमेव स्वरूपमनुसरन्तीयमद्यावधि संचलति। मूलतो वेदसंरक्षणैकलक्ष्यतया प्रवृत्ता संस्कृतशिक्षणपरम्परा । मध्ये च व्याकरणमपि प्राधान्यमलभत। परवर्तिनि च काले वेदव्याकरणेतरविषयाणामपि समये समये स्थाने स्थाने पार्थक्येन क्वचिन्न्यायादिदर्शनानां क्वचिच्च तन्त्रादीनामागमशास्त्राणां प्राधान्यमपि प्रावर्तत। आधुनिकयुगे संस्थागतरूपेण संस्कृतशिक्षायाः प्रवर्तनानन्तरं शिक्षाया लोकोपयोगितायाः प्रश्नः शनैः शनैः प्रधानो जातः। ततश्च वेदानां तदङ्गेषु च कल्पनिरुक्तशिक्षाख्यानामङ्गानामध्ययनं शनैः शनैर्मन्दतां गतम् । काशिकराजकीयसंस्कृतमहाविद्यालयस्य स्थापनाया अनन्तरं प्रथममध्येयविषयेष्वन्यतमरूपेण व्यवस्थापितस्यापि वेदाध्ययनस्य १८१८तमादीशवीयवत्सरतः स्थगनं व्यधायि । अनेनोदाहरणेन वेदाध्ययने प्रविष्टं शैथिल्यं स्पष्टीक्रियते । कण्ठस्थीकरणपद्धतिमनुसरतो वेदाध्ययनस्य तदानीं नामन्यत तद् गौरवम्,

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

यद् विषयान्तराध्ययनस्यामन्यत। संस्कृतशिक्षणजगत्युदीच्यां प्रायो वेदस्यौदासीन्यास्पदत्व-मवर्तत। १९२२तमादीशवीयवत्सरतः काशिकराजकीयसंस्कृतमहाविद्यालयेन यजुर्वेद-स्याध्ययनाध्यापनयोर्व्यवस्थया सह पुनर्वेदशिक्षणं प्रारब्धम्।[७९] ऋग्वेदकृष्णयजुर्वेदसाम-वेदानां सशाखानामध्ययनाध्यापने अधुनावधि दक्षिणभारते चलतः। नेपाले तु प्रायः शुक्लयजुर्वेदस्य माध्यन्दिनवाजसनेयशाखाध्यायिन एव विप्रा अभूवन्। नेपालाधिराज्यान्तर्गत-मिथिलावास्तव्यस्याऽऽदित्यशिष्यस्य ब्रह्मनिष्ठस्य महर्षेर्वाजसनेययाज्ञवल्क्यस्य शिष्यप्रशिष्य-परम्परागततयाऽत्रत्याः सर्व एव ब्राह्मणाः शुक्लयजुर्वेदस्य माध्यन्दिनवाजसनेयशाखा-ध्यायिनोऽभवन् विद्यन्ते च। वाजसनेयशाखाध्यायितयैव नैपालका वृद्धा युवानः शिशवश्च ब्राह्मणाः क्षत्रियादिभिः सर्वैः 'बाजे' इति नेपालाभाषासंवद्धया संज्ञया समभिधीयन्त इति वयं तर्कयामः।

वेदानामध्ययनाध्यापनक्रमेऽधुनापर्यन्तमपि सा कण्ठस्थीकरणप्रक्रियैव संजाता सम्प्रदायसंरक्षिणी। श्रुतिमूलयाऽनया कण्ठस्थीकरणात्मना शिक्षणप्रक्रियया कियदुपकृतं वेदाध्ययनपरम्परासंरक्षणविधाविति पाश्चात्त्यविद्वदुक्तिभिरवगन्तुं पार्यते। मैक्समूलरमहाभाग एकत्र हृदयत एतां परिपाटीं प्रशंसन् दृश्यते।[८०]

विषयान्तरेषु तु पङ्क्तिवाचनमूलाऽर्थप्रत्यायनलक्ष्या ग्रन्थाश्रितैव शिक्षणपद्धतिः प्राचलदिति प्राप्यतेऽस्मिन् विषये प्रमाणम्। पाणिनिनाऽध्ययनं वेदनं चेति प्रकारद्वय-मध्ययनसम्वद्धं स्पष्टतयोल्लिखितम्।[८१] पतञ्जलिनाऽप्यर्थज्ञानमूलमेवाध्ययनं संस्तुतम्।[८२] परवर्तिन्यपि काले सैवेयं परिपाटी व्यवहार उपयुज्यमाना श्रूयतेऽनुभूयते च।[८३] अधुनापर्यन्तमपि वेदातिरिक्तेषु विषयेषु सैव परिपाटी प्रचलति।

---

७९. सारस्वती सुषमा—प्रथमे वर्षे प्रथमेऽङ्के ११ पृ.

80. If writing had never been invented, if printing had never been invented, if India had never been occupied by England, young Brahmins in their hundreds and thousands would probably have been engaged just the same in learning and saying by heart the simple prayers first uttered on Saraswati and the other rivers of the Punjab by Vasistha, Vishwamitra and others.
R.K. Mukherjee- Ancient Indian Education. p. 216

८१. तदधीते तद् वेद–पाणिनिः ४।२।५९

८२. यदधीतमविज्ञातं निगदेनैव शब्द्यते।
अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित्। महाभाष्यम्।

८३. कुमारिलप्रभाकरसम्बद्धा 'तौतातिक'मतप्रसिद्धिदात्री कथा।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सेयं संस्कृतशिक्षा प्राच एव कालाद् धर्मरक्षाव्रतानां राजकुलानां प्रश्रयेण दानवीराणां धर्ममूलैरनुदानैर्विद्योपासकानां सच्छ्रद्धाप्रेरितैस्तपोभिश्च संरक्ष्यमाणाऽधुनावधि प्रवहन्ती विद्यते । प्राच एव कालान्मानवजीवनस्य विविधेषु पक्षेषु (व्यावहारिकेषु पारमार्थिकेषु च) उपयोगं बिभ्रत्यैहिकामुष्मिकोभयफलप्रदायित्वेन सम्मता संस्कृतविद्याऽऽन्तरेणाऽदरेण परिरक्ष्यमाणाऽवरीवृत्यतेति वर्ततेऽस्या अन्य एवेतिहासक्रमः ।

नेपाले लिच्छविमल्लशाहवंश्यभूपमहताऽऽदरेण स्वस्वसमये परिरक्षिता परिवर्धिता चेयमनेकेषामुदाराणां दातृणां महद्भिस्त्यागैः परिपोषिता पोष्यमाणा चाऽऽस्ते ।

इत्थमधुनावधि वेदाध्ययनपरम्परा सहैवान्यविषयसहकृता संस्कृतशिक्षणपरम्परा-ऽक्षुण्णतया प्रचलति । अधुनातन्यां शिक्षणपद्धतौ वेदोक्तप्राचीनशिक्षणपरम्परानुकूलाश्छात्र-नियमाः शिक्षकमर्यादा वा न व्यवहार उपयुज्यन्ते । वेदान् ब्राह्मणानि चाधीयाना अपि छात्राः प्राचीननियमबद्धा अधुना न दृश्यन्ते । अधुनातने समये छात्राणां गुरूणामपि भिन्नैव स्थितिः समजनि । अर्थप्रधानतायाः प्रवेशेन शिक्षाया उद्देश्यमपि पारमार्थिकापेक्षया लौकिकमपि फलमात्मसात्कृत्य निर्धारितं निर्धार्यमाणं च विद्यते । अत एव न केवलं वेदोन्मुखतैव शैथिल्यं गच्छन्ती वर्ततेऽपित्वन्येषां शास्त्राणामपि गाम्भीर्यार्जनमूला तात्पर्यबोध-केन्द्रिताऽध्यवसायप्रेरिता च शिक्षा शनैः शनैः क्षीणतां गच्छन्ती विद्यते । अतः परम्परा-गतस्यास्य संस्कृतशिक्षणक्रमस्य संरक्षणसंवर्धनाभ्यां कश्चन नूतनोऽवधानक्रमः सुतरा-मावश्यकीभूतो वरीवर्ति ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्दर्भग्रन्थसूची

१. अथर्ववेदः
२. अष्टाविंशदुपनिषदः (वि. सं. १९६६)
प्रकाशक – वेङ्कटेश्वरयन्त्रालय
३. अग्निपुराणम्
४. अष्टाध्यायीसूत्रपाठः– पाणिनि
५. आपस्तम्बधर्मसूत्रम्
६. आह्निकसूत्रावली
७. ईशादिदशोपनिषदः शाङ्करभाष्यसहिताःशङ्कराचार्यग्रन्थावली प्रथमो भागः (ई.१९६४)
प्रकाशक – मोतीलाल बनारसीदास
८. इतिहास-संशोधनको प्रमाणप्रमेय (वि.सं.२०१९) प्रधानसंपादक– धनवज्र वज्राचार्य
प्रकाशक – जगदम्बा प्रकाशन
९. एन्सियन्ट इन्डियन एजुकेशन (द्वितीयं संस्करणम्) –राधाकुमुद मुकर्जी
१०. ऋग्वेदः
११. ए शर्ट हिष्ट्री अफ नेपाल– नेत्रबहादुर थापा
१२. कल्याण, हिन्दू संस्कृतिअङ्क १ संख्या, २७८ पूर्णसंख्या (वि.सं. २००६)
प्रकाशक – गीताप्रेस, गोरखपुर
१३. गोपथब्राह्मणम्
१४. गोरखाको ऐतिहासिक सामग्री संपादक – तुलसीराम वैद्य, धनवज्र वज्राचार्य
प्रकाशक – नेपाल र एशियाली अध्ययन संस्थान त्रि. वि. वि.
१५. चरकसंहिता विद्योतिनीहिन्दीव्याख्योपेता (प्रथमो भागः)
प्रकाशक – चौखम्बा विद्याभवन, वाराणसी
१६. छान्दोग्योपनिषद् (सानुवादशाङ्करभाष्यसहिता)
प्रकाशक – गीताप्रेस, गोरखपुर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१७. जैमिनीयन्यायमाला– माधवाचार्यः
१८. तैत्तिरीयसंहिता
१९. निरुक्तम्-यास्कः (सन्दर्भिणोति संस्कृतटीकया सुत्रोत्रिन्याख्यहिन्दीव्याख्यया चोपेतम्)
प्रकाशक – मेहरचन्द लक्ष्मनदास
२०. नेपालको आलोचनात्मक इतिहास (वि.सं. २०२७)– ढुण्डिराज भण्डारी
प्रकाशक – प्रकाश प्रकाशन, काठमाडौं
२१. नेपालको ऐतिहासिक रूपरेखा– बालचन्द्र शर्मा
प्रकाशक – बाबू माधवप्रसाद शर्मा, वाराणसी
२२. नेपालमा शिक्षा प्रतिवेदन
प्रकाशक – कलेज अफ एजुकेशन
२३. नेपालपरिचय (वि.सं. २०३२)– त्रिभुवन विश्वविद्यालय, पाठ्यक्रम विकास केन्द्र
२४. नेपाल उपत्यकाको मध्यकालीन इतिहास (वि.सं. २०१९)– सूर्यविक्रम ज्ञवाली
प्रकाशक – रायल नेपाल एकेडमी
२५. नयाँ नेपालको इतिहास– ईश्वरीराज अर्याल
प्रकाशक – रत्न पुस्तक भण्डार
२६. निर्दशिका (प्रथमो भागः ई. १९७३)
प्रकाशक – वाराणसेयसंस्कृतविश्वविद्यालय
२७. निर्दशिका (द्वितीयो भागः ई. १९७३)
प्रकाशक – वाराणसेयसंस्कृतविश्वविद्यालय
२८. न्यायसूत्रवृत्तिः– विश्वनाथ
२९. पारस्करगृह्यसूत्रम्
३०. पाणिनिशिक्षा (परीक्षोपयोगिप्रदीपव्याख्यासहिता)
३१. पाणिनिकालीन भारतवर्ष (ई.१९६९) —वासुदेवशरण अग्रवाल
३२. प्राचीन नेपाल का राजनीतिक और सांस्कृतिक इतिहास —श्रीराम गोयल
३३. ब्रह्मसूत्रशाङ्करभाष्यम्, ब्रह्मतत्त्वविमर्शिन्यादिव्याख्यासहितम् (वि. सं. २०२१)
व्याख्याकार— स्वामी हनुमानदास
प्रकाशक –चौखम्बा विद्याभवन वाराणसी
३४. भारत का बृहत् इतिहास (प्रथम भाग) —नेत्र पाण्डे
३५. भारतीय प्राचीन लिपिमाला (द्वितीय संस्करण) —गौरीशङ्कर हीराचन्द ओझा
प्रकाशक – स्काटिश मिशन इण्डस्ट्रिज प्रेस, अजमेर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

३६. मनुस्मृतिः मन्वर्थमुक्तावल्यादिना सहिता (वि.स. १९९२)
प्रकाशक – चौखम्वा संस्कृत सीरिज, वाराणसी
३७. यजुर्वेदः
३८. याज्ञवल्क्यस्मृतिः (ई. १९६७) हिन्दीव्याख्याकार – रमेशचन्द्र पाण्डे
प्रकाशक –चौखम्बा संस्कृत सीरिज, वाराणसी ।
३९. याज्ञवल्क्यशिक्षा– शिक्षावल्लीविवृतिसमलङ्कृता (वि.सं. २०१९)
संपादक– अमरनाथ शास्त्री दीक्षित
प्रकाशक – दीक्षित कृष्णचन्द्र शर्मा, काशी
४०. दि लाइफ अफ हुएन स्याङ्ग– श्रमण हुइली
प्रकाशक– केगेन पाल ट्रेन्च ट्रूब्नर यान्ड कम्पनी, लण्डन
४१. लिच्छविकालका अभिलेख (वि. सं. २०३०)– धनवज्र वज्राचार्य
प्रकाशक– नेपाल र एशियाली अध्ययन संस्थान त्रि. वि. वि.
४२. वैदिक सम्पत्ति (वि.सं.१९८७)– रघुनन्दन वर्मा
प्रकाशक – सुरजीवल्लभ वर्मा, बम्बई
४३. विष्णुपुराणम्
४४. व्याकरणमहाभाष्यम् (नवाह्निकम्)– पतञ्जलिः
प्रकाशोद्योततत्त्वालोकटीकासमुल्लसितम्
प्रकाशक– चौखम्बा संस्कृत सीरिज, वाराणसी
४५. शतपथब्राह्मणम्
४६. सारस्वती सुषमा प्रथमे वर्षे प्रथमाङ्कः
द्वितीये वर्षे प्रथमाङ्कः
प्रकाशक – काशिकराजकीयसंस्कृतमहाविद्यालय
६७. सारस्वती सुषमा–(वि. सं. २०२४, २२ वर्ष १४ अङ्क)
प्रकाशक– काशिकराजकीयसंस्कृतमहाविद्यालय
४८. संस्कृतविश्वविद्यालयस्य प्रतिवेदनम् (वि. सं. २०२६)
प्रकाशक– प्रतिवेदनसमिति, दाङ
४९. संस्कृत साहित्य का संक्षिप्त इतिहास (ई .१९६८)– बलदेव उपाध्याय
प्रकाशक– शारदामन्दिर, वाराणसी
५०. संस्कृत व्याकरण शास्त्र का इतिहास (वि. सं.२००७)–युधिष्ठिर मीमांसक
प्रकाशक –वैदिक साधन आश्रम, देहरादून
५१. संस्कृतसंस्कृति– १ तथा २ संख्या (वि.सं. २०२९–३१)
प्रकाशक –नेपाल संस्कृतपरिषद्, काठमाडौं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

५२. संस्कृत साहित्य का संक्षिप्त इतिहास(ई.१९६७)—वाचस्पति गैरोला
प्रकाशक –चौखम्बा विद्याभवन, वाराणसी
५३. हिस्ट्री अफ बेङ्गाल– रमेशचन्द्र मिश्र
५४. हिस्ट्री अफ संस्कृत लिटरेचर– अर्थर म्याकडोनेल
५५. संस्कृतशिक्षणपद्धति – सीताराम चतुर्वेदी
प्रकाशक – नन्दकिशोर एण्ड ब्रदस,वाराणसी ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपाले संस्कृतशिक्षणमनुसन्धानं च

प्रस्तोतारः

हरिदेवमिश्रः (संयोजकः)
विद्यानाथोपाध्यायः (सदस्यः)
विष्णुराज आत्रेयः (सदस्यः)

विद्योपादानार्थकभौवादिकशिक्ष[१]धातोर्भावे ल्युटि शिक्षणशब्दो निष्पद्यते । गुरोः सकाशाद् विद्यास्वीकरणमन्तर्भावितण्यर्थमधिगम्य गुरुकर्तृकं शिष्याय विद्यादानं वा शिक्षणशब्दो बोधयति । यद्यपि संस्कृतग्रन्थेष्वनुसन्धानशब्दो विचार[२]गवेषणा[३]नुसरणा-[४] दिस्वर्थेषु प्रयुक्तो दृश्यते, तथापि संपूर्वकाद्धातोर्भावे ल्युटि सन्धानमिति पदं निष्पद्यते । सन्धानं नामाभिमुख्येन स्थापनम्,[५]अनुपश्चादाभिमुख्येन स्थापनमनुसन्धानम् । कस्यचन स्थूलवस्तुनः सकाशात् सूक्ष्मविचारनिस्सारणं तदनुसृत्य निबन्धादिलेखनमनुसन्धानशब्दस्य शाब्दिकोऽर्थः[६] । एवं चानुसन्धानशब्दात् (क) अज्ञाततथ्यस्य ज्ञापनम् (ख) गुप्तायाः

१. शिक्षविद्योपादाने । सिद्धान्तकौमुद्यां भ्वादिगणे ।

२. यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः । मनुस्मृति १२।१०६

३. देवकार्यं साधयितुं योगाग्निना स्वशरीरं ददाहेति पूर्ववृत्तकथानुसन्धेया ।
मल्लिनाथः- कुमारसंभवटीका १।१२

४. एतौ तौ मामनुसन्धत्तः-अनुसरतः— मृच्छकटिके २ अङ्कः ।

५. संदधुर्मरुत्वन्तं सख्याय हवामहे- ऋग्वेदः १,१०१, ६ ।
आभिमुख्येन स्थापयन्ति (सायणः) ।

६. निबन्ध ग्रन्थाः-१ कृत्यकल्पतरुः ११०० ई. ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सामग्र्याः प्रकाशः (ग) ज्ञातस्य तथ्यस्य परिष्करणम् (घ) सम्पादनमात्रम् (ङ) सामग्रीसंकलनमात्रमित्यादयो बहवोऽर्थाः संगृह्यन्ते । अत एवानुसन्धानपदस्यानुपदोक्तभावमाकलय्य विद्वद्भिः सूत्रवृत्तिभाष्यटीकाटिप्पण्यादयोऽनुसन्धानकुक्षौ संनिवेश्यन्ते । इदमप्यत्रावधेयं यत् पाश्चात्त्यदेशेऽवधुना प्रथितं यदनुसन्धानं नाम तत्कला (टेक्निक) रूपम्, तत्र निबन्धलेखनपद्धतिः कानिचन स्वकीयानि वैशिष्ट्यानि बिभर्ति। पौरस्त्यानुसन्धानपद्धतिश्च पूर्वोक्तस्वरूपां निर्मितिमादधतो स्वकीयलक्षणवैशिष्ट्यं ख्यापयतीति विदितमेव विद्वद्भिः[७]।

जगन्मातुर्गुह्यकाल्या जगत्पितुः पशुपतेश्च लीलाभूमिर्नेपालो जनकजानकीयाज्ञवल्क्यबुद्धप्रभृतिविशिष्टप्रतिभाजुषो विदुषः समुपाहरन् स्ववैशिष्ट्यं जगतः पुरस्तात् समुपस्थापयति। हिमवतोऽङ्केषु विस्तृतेयं पुण्यभूमिः सृष्टेरादित एवाऽऽर्याणां निवासभूमिः। हिमवतो गह्वरेषु तपस्तप्यमाना महर्षयोऽत्र मन्त्रद्रष्टारो बभूवुरिति प्रमाणमाकलयतां नेपालविदुषामुद्गारः[८]।

मन्त्रद्रष्टृत्वं हि नामानुसन्धानस्य मूर्द्धाभिषिक्तमुदाहरणम्। ऋषयो वेदसमये मानवस्य सर्वाङ्गीणविकासं शिक्षाया मुख्यमुद्देश्यं मेनिरे । ऋषयो मानवजीवनं चतुर्ष्वाश्रमेषु विभजन्ति स्म– ब्रह्मचर्यं गार्हस्थ्यं वानप्रस्थं संन्यासश्चेति । तत्र ब्रचह्मचर्याश्रमे निवसन्त आश्रमनियमान् पालयन्तो नित्यनैमित्तिककर्मानुष्ठानेन विशुद्धाशया विविधविद्याग्रहणपाटवमाकलयन्तोऽन्तेवासिनो विविधाश्रमेषूपयुक्ता आध्यात्मिकीर्भौतिकीर्विद्याश्चोपाददते स्म। गुरुमुखोच्चारणानूच्चारणपद्धत्या वेदाध्ययनमाचरन्तो गुरूक्तस्य दाढ्र्चाभ्यासं कुर्वते स्म।[९] शिक्षायाः संवर्धनाय संरक्षणाय च गुरुकुलं संस्थाप्यते स्म। कुलमिदं च सकलजनश्रद्धास्पदं राजभिः परिपोषितं सकलविधशिक्षासाधकं शान्ताश्रमपदमासीत्। यत्र विविधशास्त्रेषु निष्णातैश्छिन्नसंशयैर्वीतरागैरात्मतत्त्वज्ञानाभिमुखैर्विद्वद्भिः शिक्षा प्रदीयते स्म। एभिरेव विद्वद्भिस्तात्कालिकपद्धत्यनुसारं समुपलब्धविषयाणां व्याख्या, मीमांसा नूतनविषयाणां गवेषणादिकं कार्यं च विधीयन्ते स्म। यस्य परिणामाः संहितायाः परिबृंहणरूपा ब्राह्मणग्रन्था आरण्यकग्रन्था उपनिषदश्चाऽऽविर्बभूवुः। आरण्यकेषूपनिषत्सु च वेदानामाध्यात्मिक-

---

७. भागीरथप्रसाद त्रिपाठी — अनुसन्धानपद्धतिः १ पृ.

८. स्कन्दपुराणे हिमवत्खण्डे चत्वारिंशत्तमोऽध्यायः ।

९. गुरुवक्त्रं शृणुयान्मन्त्रं तूर्णीं पश्चादनुच्चरेत् ।
शुक्लयजुर्वेदीयमाध्यन्दिनशाखीया सम्प्रदायबोधिनी शिक्षा ५ पृ. ।
संख्यायां शिष्यसामर्थ्यमपेक्ष्य गुरुणा पुरा।
कण्डिका भागतोऽर्द्धा वा विश्लिष्याध्याप्यते सदा । तत्रैव १५ पृ. ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

पक्षस्य सुस्पष्टं विस्तृतं व्याख्यानं समुपलभ्यते ।

उपनिषत्समये नेपाले ज्ञानविज्ञानयोर्विशिष्टमन्वेषणं समजनि । राजर्षेर्जनकस्य राजधान्यां जनकपुरे देशविदेशेभ्यः समागतानामात्मतत्त्वजिज्ञासूनामात्मतत्त्वविदां च विदुषां विदुषीणां च संवादस्तात्कालिकीमस्माकं राष्ट्रे संस्कृतविद्याया उन्नतावस्थितिं स्फुटं सूचयति ।

योगी याज्ञवल्क्यो राज्ञो जनकस्य विद्वत्सभायां स्वनामधन्योऽनूचानतमः पण्डित आसीत् ।[१०] अयं च सूर्याच्छुक्लयजुर्वेदं प्राप्य तस्य प्रवर्तकस्य सतीर्थ्याश्च कृष्णयजुर्वेदस्य तैत्तिरीयशाखायाः प्रवर्तका इति विष्णुपुराणतोऽवगम्यते ।[११]

अथ च योगी याज्ञवल्क्योऽखिलान् वेदाञ्ज्ञानचक्षुषा निरीक्ष्य सकलविधसामाजिकव्यवस्थायै वेदानुकूलां स्मृतिं निर्ममौ । सा च स्मृतिरधुना याज्ञवल्क्यस्मृतिरिति नाम्ना व्यवह्रियते ।

राजर्षेर्जनकस्य सभायां याज्ञवल्क्येन सह गार्गीप्रभृतीनां संवादस्योपनिषत्सु बहुर्चचितत्वात् तदानीं नारीवर्गोऽपि शिक्षाया विशिष्टः प्रचारः सुस्पष्टं निश्चीयते ।[१२] छान्दोग्योपनिषदि वेदचतुष्टयीतोऽतिरिक्ता वेदसहचरितास्त्रयोदशविद्याः श्रूयन्ते ।[१३] तेष्वेतेषु वेदशरीरेषु वेदाङ्गेषु विद्यासु च मन्त्रोपदिष्टमेव तत्तद्विषयभेदेन प्रकरणभेदेन च प्रस्फुटीक्रियते स्म । परमत्रापि प्राक्तनी वैदिकी शैली न परित्यक्ताऽभूत् । सङ्केतरूपेणैव मन्त्रशल्यैव च तत्तदर्थप्रतिपादनं सर्वत्र प्रस्तुतमभूत् ।

आर्याणां जीवनविकासक्रमः पुराणेभ्योऽवगम्यते । पौराणिकविषयगवेषणायां

---

१०. ए एवानूचानतम इति निश्चित्य साष्टांगं प्रणनाम । —याज्ञवल्क्यस्मृति भूमिका २ पृ.

११. विष्णुपुराणम् ३।५ ११,१२,२७,२८

१२. बृहदारण्यकोपनिषद् २।४ याज्ञवल्क्यमैत्रेयीसंवादः ।
बृहदारण्यकोपनिषद् ४।१ जनकयाज्ञवल्क्यसंवादः ।
···एवं वा अरेऽस्य महतो भूतस्य निःश्वसितमेतद् यद् ऋग्वेदो यजुर्वेदः सामवेदोऽथर्वाङ्गिरस इतिहासः पुराणं विद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानानि व्याख्यानान्यस्यैवैतानि सर्वाणि निःश्वसितानि । —बृहदारण्यकोपनिषद् २।४।१०

१३. ऋग्वेदं भगवोऽध्येमि यजुर्वेदं सामवेदमाथर्वणं चतुर्थमितिहासपुराणं पञ्चमं वेदानां वेदं पित्र्यं राशिं दैवं निधिं वाकोवाक्यमेकायनं देवविद्यां ब्रह्मविद्यां भूतविद्यां क्षत्रविद्यां नक्षत्रविद्यां सर्पदेवजनविद्यामेतद्भगवोऽध्येमि । —छान्दोग्योपनिषद् ७।१।२

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपालदेशीयैर्विद्वद्भिः किं किं योगदानमकारीत्यपि गवेषणीयो विषयः। नेपालदेशीय-धार्मिकक्षेत्राणां धार्मिकसामाजिकप्रवृत्तिविषयाणां च प्राशस्त्येन पुराणादिषु[१४] वर्णतात् प्रस्फुटीभवति यत् पुराणनिर्मात्रा व्यासेन नेपालीयानखिलान् विषयाननुसन्धायैव पुराणानि व्यरचिषत। परमत्रेदमप्यवधार्यं यत् ई०पू० ६०० शताब्द्यां गौतमबुद्धः स्वजन्मना नेपालभूमिमलञ्चकार। अयं महात्मा तपोबलेनावाप्तबुद्धत्वो बहुजनहिताय बहुजनसुखाय च सांङ्ख्ययोगोपनिषत्स्थसिद्धान्तान् युगानुरूपं व्याख्याय नवीनं धर्ममाविश्चकार। अयं च धर्मः स्ववैशिष्ट्येन विविधदेशवासिनां मनांस्यनुरञ्जयंस्तेषां कर्तव्याकर्तव्यमार्गं च प्रदर्शयञ्जगति परमप्रतिष्ठामवापावाप्नोति च। एतत्कालं संजातानुसन्धानेन नेपालः सर्वं मणीयतामभजत भजते च। समयेऽस्मिन् प्राक्तनास्तत् सामयिका वा वेदाङ्गप्रवक्तॄणां दर्शन-सूत्रकाराणां चैकदेशमवलम्ब्य लोकदृष्टिमाक्रष्टुं कृता अपि प्रयत्नाः साफल्यं नाभजन्, प्रत्युताङ्गविस्तारो मतभेदविस्तारश्च वैदिकविज्ञानतिरोधानायैवाकल्पत। वेदसमयतोऽवि-च्छिन्नरूपेण समायान्ती संस्कृतशिक्षणपद्धतिर्लोकरुचिमनुसृत्य शनैः शनैः शास्त्रार्थपद्धतिं गृह्णाति स्म।

वेदकालतो नेपालदेशेऽविच्छिन्नरूपेणाऽऽयान्ती संस्कृतशिक्षणानुसन्धानयोर्गतिः किरातसमयेऽवरुद्धेव संलक्ष्यते। प्रामाणिकेतिवृत्तस्य गवेषणीयतया समयेऽस्मिन् समुपलब्ध-सामग्रीतः किमपि निश्चेतुं नशक्यते। किराताः शिवभक्ताः[१५] शिवलिङ्गप्रतिष्ठापकाश्चेतो-तिहासविदां मतम्। एतावता परिलक्ष्यते यत् किराता अवश्यमेव संस्कृताध्ययने प्रवृत्ता इति। किरातकविविरचितं शिवस्तोत्रं[१६] तन्निर्मातुर्दर्शनाभिज्ञत्वं शब्दविन्यासे नैपुण्यं पद्यनिर्माणे प्रौढिं चाभिव्यञ्जयन्नुक्तकल्पनां परिपोषयति।

लिच्छविसमये संस्कृतभाषाया विद्यायाः कलायाश्च नेपाले समुत्कर्षः संस्कृतभाषानुरागिणां विद्याप्रेमिणां कलोपासकानां च मनांस्यनुरञ्जयति। नेपालस्य

---

१४. स्कन्दपुराणे हिमवत्खण्डः। विष्णुपुराणम्। श्रीमद्भागवतम्। देवीभागवतम्।

१५. कार्तिकेयेश्वरो यत्र सुन्दर्यद्रिसुशेखरे। किरातैः सेवितो नित्यं तन्नेपालो विराजते।

—हिमवत्खण्डे ७०।४०

१६. एषा किरातकविना कविनायकेन पुण्या स्तुतिः पशुपते रचिता हिमाले।

यस्मिन् किरातकुलदैवतमस्ति शम्भुः सिद्धाचले मृगवपुः पशुपाशनाशी॥

—हिमवत्खण्डे परिशिष्टे ३९ पृष्ठे २ श्लोकः।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

मन्दिरपरिसरादौ शताधिकाः केवलं संस्कृतभाषायामेवोपनिबद्धाः शिलालेखास्तत्समयोद्भवानां राज्ञां संस्कृतवाङ्मयानुरागं परिपोषयति ।[१७] शिलालेखेषु सुललितामरवाण्यां गुणालङ्कारमण्डितानि रसभावसमन्वितानि सुमधुरभावशैलीपरिपूर्णानि विविधवृत्तेषु निर्मितानि गद्यपद्यानि तदानीन्तनानां संस्कृतविदुषां वैदग्ध्यमावेदयन्ति ।[१८] संस्कृतभाषा तदानीं राजभाषापदवीमलञ्चकारेतीतिहासविदां समुदाचारः । लिच्छविराजा न केवलं प्रतिभाजुषां संस्कृतविदुषामाश्रयदातारोऽपि तु विभिन्नशास्त्रेषु स्वयमपि प्रतिभाभाजो भवन्ति स्म । संस्कृतस्य विशिष्टो विद्वान् राजांशुवर्मा संस्कृतभाषायाः स्वरूपस्य रक्षायै सारल्येन तज्ज्ञानाय च शब्दशास्त्रस्य नूतनं मौलिकं ग्रन्थं प्रणिनायेति[१९] हुनसाङ्गयात्राविवरणतोऽवसीयते । ततश्चेदमपि प्रस्फुटी भवति यल्लिच्छविकाले नेपाले संस्कृतस्य विशिष्टः प्रचार आसीत् ।[२०] राज्ञा जयदेवेनापि प्रसादगुणयुक्तानि सुललितभावभाषामण्डितानि संस्कृतभाषायां पञ्च पद्यानि स्वयमेव व्यरचिषत ।[२१] इतराणि च तत्रत्यानि पद्यानि ख्यातकीर्तिना बुद्धकीर्तिना निरमायिषत । इदमपि ज्ञायते यद् राजपुत्री विजयवती विविधकलासु विद्यासु च प्रगाढं प्रागल्भ्यं लेभे ।[२२] एतावताऽस्मिन् समये नारीशिक्षाऽपि लब्धावसरेत्यपि निश्चीयते । अन्येऽपि विद्वांसः स्वपाण्डित्यं प्रदर्शयन्तः संस्कृतसाहित्यरत्नाकरस्य परिपूर्त्यै अमूल्यरत्नस्वरूपाणि काव्यनाटकादीनि निर्ममुः । बौद्धशैवादीनां धार्मिकग्रन्थानां सुरभारत्यां निबद्धानां सम्पादनादिकं कार्यं नेपाले तात्कालिकं संस्कृतवाङ्मयस्य सर्वाङ्गीणं विकासं ख्यापयति ।

संस्कृतशिक्षणपद्धतिरपि प्राक्तनीं शैलीं शनैः शनैः परित्यजति स्म । तदानीन्तना विद्याः केवलं शब्दप्रधानतां गताः । तर्कव्याकरणसाहित्यादयः शब्दाडम्बरोन्मुखा लोकेभ्योऽरोचन्त । महांस्तत्र ग्रन्थविस्तारः प्रावर्धत । जल्पक्रिया कवित्वप्रक्रिया च विनोदायालम् । बौद्धानां विहारो देवालयः संस्कृतविदुषां गृहाणि च पाठशाला प्रायाण्यभूवन् ।

नेपाले मल्लकालः संस्कृतकाव्यनाटकादीनाममूल्यग्रन्थाञ्जगतः पुरस्तादुपस्थापयन्

---

१७. लिच्छविकालीन अभिलेख ने. ए. अ. सं. त्रि. वि. वि.

१८. " " " "

१९. बुद्धिस्ट रेकर्डस् अफ द वेस्टर्न वर्ल्ड, द्वितीयो भाग ८१ पृ.

२०. पशुपतिमन्दिरस्थो द्वितीयजयदेवस्याभिलेखः ।

२१. लिच्छविकालका अभिलेख ।

२२. विजयवत्याः सूर्यघाटस्थितोऽभिलेखः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

स्वकीयं वैशिष्ट्यं सूचयति। समयेऽस्मिन्नप्युत्कीर्णसंस्कृतगद्यपद्यानां शिलालेखानां बाहुल्यमुपलभ्यते। मल्लराजा न केवलं संस्कृतानुरागिणोऽपि तु संस्कृतवाङमयेष्ववाप्त-प्रागल्भ्या आसन्।[२३] संस्कृतस्य विशिष्टो विद्वान् नरेन्द्रो जगज्ज्योतिर्मल्लः संस्कृत-वाङ्मयस्य वैदग्ध्यप्रख्यापकान् पञ्च ग्रन्थान् निर्ममौ। राजा जयप्रतापमल्ल आत्मानं कवीन्द्र इत्युपाधिनाऽलञ्चकार। विविधशिलालेखेष्वङ्कितानि सुललितभावभाषागुणालङ्का-रादिविभूषितानि संस्कृतभाषायां निबद्धानि पद्यानि राज्ञोऽस्य कवीन्द्र इत्युपाधिं समर्थयति। प्रबोधचन्द्रोदयनाटकस्य निर्माता जगज्जयमल्लो नाटकेऽस्मिन्नात्मनः प्रबन्धकाव्यशास्त्रेषु वाचस्पतित्वं प्रतिपादयति।[२४] एवमेवान्येऽपि मल्लराजा बहुमूल्यग्रन्थान् निर्ममुः। ते च तात्कालिकस्य राज्ञो विद्यानुरागित्वं शास्त्रेषु प्रगल्भपाण्डित्यं च द्योतयन्ति। इमे मल्लराजा विशिष्टप्रतिभावभासिनां संस्कृतविदुषामाश्रयदातार आसन्। अस्मिन् समये भारतवर्षस्य विभिन्नप्रान्तेभ्यः संस्कृतस्य विशिष्टविदुषो नेपालदेशमानाययति स्म। तैश्च नेपाले तन्त्र-विद्यायाः शिल्पविद्यायाः कलाप्रभृतीनां च विकासेऽमूल्यं योगदानं व्यधायि। अधुनाऽस्माकं पुस्तकालयेषु मल्लकालिका विविधलिपिषु हस्तलिखिता विविधविषयका ग्रन्थास्तात्का-लिकानां नेपालोद्भवानां संस्कृतविदुषां तेषु तेषु विषयेषु विशिष्टाभिरुचीः सुस्पष्टं प्रख्यापयन्ति। नार्योऽपि संस्कृतशिक्षोपादान आत्मगौरवं मन्यमानाः संस्कृतविद्यासूत्कर्षं भजमानाः संस्कृतपद्यादिनिर्माणैः स्ववैदग्धं प्रकटयन्ति स्म।[२५] न केवलं राजान एवान्येऽपि विशिष्टप्रतिभाजुषो नेपालीयविद्वांसः संस्कृतभाण्डागारस्य परिपूर्त्यां अलङ्कृतभाषा भावशैलीभिरन्वितान् रसाभिव्यञ्जनसमर्थान् काव्यनाटकादीनन्यांश्च बहुमूल्यग्रन्थान् निर्ममुः। एतत्कालिकेषु कतिपयेषु नाटकेषु नेवारीसंस्कृतभाषायां कथनोपकथनानीतरसंस्कृतनाटकेभ्यो वैलक्षण्यमाकलयन्ति चमत्कुर्वन्ति चेतसो विदुषाम्।

अत्रापि शिक्षणपद्धतिर्लोकरुचिमनुसृत्य लिच्छविकालिकीं शैलीमेव किञ्चिद् वैशिष्ट्येन सह स्वीचकार। तर्कव्याकरणसाहित्यादयः शब्दाडम्बरोन्मुखाः शब्दप्रधानतां भजन्ते स्म। शास्त्रार्थप्रणाल्या शास्त्राणामध्ययनाध्यापनं लोकेभ्योऽरोचत। राजसभायां

---

२३. कल्चरल हेरिटेज अफ नेपाल–द लिटरेरि हेरिटेज अफ नेपाल। — जयन्त मिश्र

२४. कीर्त्या चन्द्रमिव प्रतापनिकरैश्चण्डांशुवत् संगरे।
वीरः पार्थ इव प्रबन्धकविताशास्त्रेषु वाचस्पतिः॥
— प्रबोधचन्द्रोदयनाटकम्

२५. लालमती प्रतापमल्लस्य राज्ञी संस्कृतविदुषी।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शास्त्रार्थयोजनं मनोविनोदाय भवति स्म। विहारो देवालयसंस्कृतविदुषां गृहाणि च प्रधानतः पाठशालाप्रायाण्यभूवन् ।

शाहवंशीयभूपालैर्नेपालस्य विभिन्नभागेषु संस्कृतवाङ्मयस्य शिक्षणगवेषणादिकार्याणामुन्नयनाय विशिष्टः प्रयत्नो व्यधायि विधीयते च। संस्कृतानुरागिणः शाहवंशीयराजाः संस्कृतविद्यासु स्वयमपि निष्णाताः संस्कृतविदुषामाश्रयदातारश्च भवन्ति स्म । वृहन्नेपालस्य प्रतिष्ठापकः श्री ५ पृथ्वीनारायणशाहदेवो दिव्योपदेशप्रदानेन स्वस्मिन् संस्कृतराजनीतिनीतिशास्त्रादीनां च विशिष्टं वैदुष्यं सूचयति स्म । अस्य महात्मनो दिव्योपदेश इदानीमपि स्ववैशिष्ट्येन विदुषो विस्माययति। अस्यैवाऽऽश्रितो विशिष्टप्रतिभान्वितो ललितावल्लभो भक्तविजयपृथ्वीन्द्रविजयनाम्नी द्वे काव्ये प्रणिनाय।[२६] इमे न केवलमैतिहासिकं महत्त्वमपि तु भावभाषालङ्कारादिभङ्गिभिः साहित्येऽपि विशिष्टं स्थानं बिभृतः। अपरोऽपि कवितानिकषोपलस्य निर्माता लक्ष्मणकविः श्री ५ पृथ्वीनारायणशाहदेवस्य प्रतापसिंहशाहस्य च विजयगाथां सुललितमधुरपद्यैः समुपस्थापयन् स्वकीयं वैदुष्यं ख्यापयति । विविधग्रन्थनिर्माता वाणीविलासः स्ववैदुष्येण स्वकीयं नामान्वर्थं व्यधत्त। एवमेव विविधशास्त्रचिन्तनानुशीलनावाप्तवैदुष्यैरन्यैरपि शाहवंशीयभूपालैः संस्कृतभाषायां पुरश्चर्यार्णववाजिरहस्यसत्कर्मरत्नावलिप्रभृतयो बहुमूल्यग्रन्थाः स्वयमेव निरमायिषत । अन्येऽपि बहवो नेपालीयविद्वांसोऽस्मिन् समये विविधविषयिकाभिः स्वकीयामूल्यकृतिभिः संस्कृतसाहित्यस्याभिवृद्धयेऽमूल्यं योगदानमकुर्वन् कुर्वन्ति च।

इदमप्यत्रावधेयम्– यदस्मिन्नेव समये पाश्चात्त्यविदुषां नूतनपद्धत्या संस्कृतवाङ्मयस्याध्ययनेऽनुसन्धाने च समुत्साहः समुत्पद्यते स्म। मैक्समूलर–कीलहार्न–वेवर–मेकडोनल–विन्टरनीज पार्जिटर–कीथप्रभृतयो विद्वांसः संस्कृतभाषायां निबद्धानां वैदिकलौकिकविषयाणां पाश्चात्त्यपद्धत्या गवेषणं व्यदधुः। तत्परिणामस्वरूपं भारतवर्षे संस्कृतसाहित्यस्याप्यध्ययनगवेषणानुशीलनादिकमैतिहासिकतुलनात्मकादिपद्धत्या प्रारब्धम्। तदानीं भारतवर्षे आङ्ग्लपाठशालासु महाविद्यालयेषु चानयैव पद्धत्या संस्कृताध्ययनाध्यापनानुसन्धानादीनां व्यवस्था समजनि।

शाहवंशस्य संस्कृतानुरागिणां राज्ञां राणाप्रधानमन्त्रिणां च संरक्षकत्वे स्थितो नेपालः संस्कृतविद्यायाः संरक्षणाय संवर्धनाय चास्मिन् समये समुल्लेखनीयं योगदानं

२६. नेपालको मध्यकालीन इतिहास सूर्यविक्रम ज्ञवाली ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

व्यधत्त । प्राचीनपद्धत्याऽध्ययनाध्यापनाय संस्कृतस्य पाठशाला देशस्य विभिन्नभागेष्वतिष्ठिपत् । स्वगृहेषु संस्कृतं पाठयद्भ्यो विद्वद्भ्यो विविधं सौविध्यं च प्रादत्त । पाश्चात्त्यविद्वद्भिरुद्भावितां भारतवर्षे प्रचलितां संस्कृताध्ययनाध्यापनस्य नवीनप्रणालीमप्यानाययति स्म । नेपालिसंस्कृतेः संस्कृताश्रिततया सर्वेषां शिक्षितानां संस्कृतस्य परिचयो जायतामिति भावनयाऽऽङ्ग्लमाध्यमिकविद्यालयेषु नवीनप्रणाल्या संस्कृतस्याध्ययनमनिवार्यतामलभत । संस्थापिते त्रिचन्द्रमहाविद्यालय उच्चकक्षायामपि नवीनपद्धत्यैच्छिकरूपेण संस्कृताध्ययनाध्यापनस्य व्यवस्था समजनि ।

२००७ वैक्रमाब्दे नेपाले समायाते प्रजातन्त्रे शिक्षायाः प्रचाराय प्रसाराय च शासनं समुल्लेखनीयं यत्नं समाश्रयते स्म । देशस्य सर्वस्मिन् भागे सर्वजनहिताय प्राथमिकविद्यालया माध्यमिकविद्यालया महाविद्यालयाश्चाऽऽवश्यकतानुरूपं संस्थापिता अभूवन् । अस्मिन्नेवावसरे राष्ट्रपितुः स्व. श्री ५ त्रिभुवनवीरविक्रमशाहदेवस्य करकमलाभ्यां संस्कृतवाङ्मयस्योच्चकक्षायामध्ययनाध्यापनाय राजकीयसंस्कृतमहाविद्यालयस्य संस्थापनमभूत् । अत्र च वेदव्याकरणदर्शनज्यौतिषप्रभृतिविषयाणामुच्चकक्षास्थच्छात्राणामध्ययनव्यवस्थाऽपि समजनि । शासनसंरक्षिता शिक्षेयं सवृत्तिका निःशुल्का चाऽऽसीत् । अस्ति च संस्कृतशिक्षायाः समुन्नत्यै समये समये च विभिन्नसमितयोऽपि संघटितास्तदनुसारं सुधारकार्याण्यप्यभूवन् । संस्कृतविद्वांसोऽपि विविधविषयिकाभिर्युगानुरूपाभिः स्वकृतिभिः संस्कृतसाहित्यं विभूषयन्ति स्म ।

विशिष्टप्रतिभाजुषा विदुषा स्व. श्री ५ महेन्द्रवीरविक्रमशाहदेवेन शिक्षाया विकासाय विहितो यत्नः शिक्षाया इतिहासेऽविस्मरणीयतां भजते । विभिन्नविषयाणामुच्चकक्षास्वध्ययनाय छात्राः स्वाधीतविषयेषु गाम्भीर्यलाभाय प्राध्यापकाश्च विदेशेषु प्रेष्यन्ते स्म । स्वसंस्कृत्यनुकूलां स्वराष्ट्रानुकूलां च शिक्षां प्रदातुमस्मिन्नेवावसरे त्रिभुवनविश्वविद्यालयस्य स्थापनाऽभूत् । संस्कृतस्य प्रचाराय प्रसाराय च विशिष्टो यत्नो विधीयते स्म ।

प्राचीनपद्धत्या संस्कृतमहाविद्यालयेषु नवीनपद्धत्या चाऽऽङ्ग्लमहाविद्यालयेषु प्रचलितोभयरूपाऽपि संस्कृतशिक्षा यथावत् स्नातकोत्तरशिक्षां यावदनेनैव विश्वविद्यालयेन सञ्चाल्यते स्म । अनन्तरं च संस्कृतानुरागिभिर्विद्वद्भिर्नेपाले स्वतन्त्रसंस्कृतविश्वविद्यालयस्याऽऽवश्यकताऽन्वभावि । नेपालस्य दाङप्रदेशे स्वदेशीयानां भारतीयानाञ्च संस्कृतस्य विशिष्टविदुषां सम्मेलनमेकमायोजि । तत्र च स्व. श्री ५ महेन्द्रवीरविक्रम-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शाहदेवस्याभिभाषणं नेपाले संस्कृतस्य महत्त्वमावश्यकत्वं च स्पष्टं सूचयति।[२७] वैदिक-कर्मकाण्डस्य शिक्षायै वेदवेदाङ्गविद्यालयस्य स्थापनं राष्ट्रियसंस्कृतेः स्वरूपस्य विशिष्टज्ञानायानुसन्धानार्थं विशेषवृत्तेर्व्यवस्था च राज्ञोऽस्य संस्कृतानुरागं व्यञ्जयतः।

वर्तमानः श्री ५ महाराजाधिराजो राष्ट्रस्य सर्वाङ्गीणविकासाय रात्रिन्दिवं प्रयतमानो वरीवर्तीति वयं महद्गौरवमनुभवामः । अस्य राज्ञो राज्यारोहणसमयादेव संस्कृतशिक्षाक्षेत्रे महत्त्वपूर्णं कार्यजातं सम्पन्नं सम्पत्स्यमानं च वर्तते । यथा –

क) दाङमण्डले संस्कृताध्ययनसंस्थानस्य संस्थानाध्यक्षकार्यालयस्य स्थापनं जातम्।

ख) श्री ५ महाराजाधिराजेन श्री ५ बडामहाराज्ञ्या च यथासमयं तत्र स्वयमेवोपस्थाय निर्माणकार्यस्य निरीक्षणं समस्यानामध्ययनं तेषां समाधानायोपयुक्तं निर्देशनादिकं च प्रदत्तम् ।

ग) राष्ट्रियशिक्षापद्धतेर्योजनायाः प्रारम्भानन्तरं संस्कृतशिक्षा पूर्णतो निःशुल्का जाता । छात्राणां भोजनद्रव्यादिवृत्तीनां व्यवस्था न केवलं यथावत् स्थिताऽपि तु तत्राऽऽवश्यकसुधारोऽपि विहितः।

संस्कृतमाध्यमिकशिक्षकाणां कृते शिक्षणप्रशिक्षणकार्यक्रमः प्रारब्धो येन संस्कृतशिक्षकैः सेवायाः स्थायित्वस्यावसरो लब्धः।

संस्कृतशिक्षामूलत एव शृङ्खलाबद्धा भूत्वा विकासपथमधिरोहत्विति लक्ष्यीकृत्य विद्यापीठसमीपवर्तिनः संस्कृतमाध्यमिकविद्यालयास्तत्तद्विद्यापीठेष्वेवान्तर्भाविताः । वैयक्तिकरूपेणाऽऽश्रमविद्यालयस्थापनासौविध्यं च लब्धम् ।

घ) संस्कृतग्रन्थभाण्डागारमनुसन्धानकुञ्चिकयोद्घाटय तत्रत्यस्य ज्ञानराशेः सर्वत्र प्रचाराय वर्तमानः श्री ५ महाराजाधिराजो निरन्तरं प्रोत्साहयति । अस्यैव फलस्वरूपं संस्कृताध्ययनसंस्थानं मानविकी तथा सामाजिकशास्त्राध्ययनसंस्थानस्य संस्कृत-शिक्षणसमितिः संस्कृतानुसन्धानकार्ये समुद्यते स्तः । आभ्यामनुसन्धानकार्यक्रमसञ्चालनाय विविधाः परियोजनाः संञ्चालिताः संञ्चाल्यमानाश्च सन्ति । अद्य संस्कृतशिक्षका अपि संस्कृतानुसन्धानकार्ये व्यापकरूपेणाऽऽकृष्टाः सन्ति सक्रियतां च भजन्ते ।

२७. दाङविद्वत्सम्मेलनस्य प्रतिवेदनम् (वि. सं. २०२४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

एता: खलु वर्तमाननेपालभूपालस्य श्री ५ वीरेन्द्रवीरविक्रमशाहदेवस्य शासनस्य संस्कृतक्षेत्रे महत्त्वपूर्णा उपलब्धयः ।

राष्ट्रस्य सर्वाङ्गीणविकासाय प्राचीनशिक्षापद्धतेरपर्याप्ततामनुभवद्भिः शिक्षाविद्भिः शासनेन चाऽऽधुनिकराष्ट्रियावश्यकतापरिपूर्त्यै नवीना शिक्षापद्धतिर्निरधायि । २०३० तमे वैक्रमाब्दे राष्ट्रस्य विविधशिक्षायाः पाठशालासु महाविद्यालयेषु च स्ववैशिष्टयमाकलयन्ती नवीनशिक्षापद्धतिः स्थानमभजत । पद्धत्याऽनयाऽध्ययनाध्यापने महत् परिवर्तनमानीयते स्म । उच्चकक्षासु समालोचनप्रधानस्याध्यापनस्य व्यवस्था समजनि । स्नातकोत्तरकक्षासु चानुसन्धानप्रविधिज्ञानाय पाठघण्टां निश्चिनोति स्म । छात्रेषु गवेषणशक्तेरुन्मेषायानुसन्धानगोष्ठीप्रवचनगोष्ठ्यादीनां व्यवस्था भवति स्म। सामान्यतः सर्वेषु विषयेषु स्नातकोत्तरपरीक्षोत्तीर्णतायै शोधप्रबन्धलेखनस्य तत्र निर्धारिताङ्कप्राप्तेश्चानिवार्यतां व्यधत्त ।

पद्धत्यामस्यामपि संस्कृतशिक्षा विशिष्टं स्थानमग्रहीत् । मानविकी तथा सामाजिकशास्त्राध्ययनसंस्थानान्तर्गतकतिपयमहाविद्यालयेषु संस्कृतशिक्षणस्य व्यवस्था जाता। स्नातकोत्तरकक्षायामत्राप्यनुसन्धानप्रविधेः प्रशिक्षणाय पाठसमयस्य निर्धारणं जातम् । गोष्ठीप्रवचनादीनामायोजनं च विहितम् । लघुशोधप्रबन्धलेखस्य च स्नातकोत्तरपरीक्षोत्तीर्णतायामनिवार्यता निरधायि । अधुना च पीएच. डी. उपाधिप्राप्तये निम्नाङ्कितविषयेषु स्वकीयं स्वकीयमनुसन्धानकार्यं षड्गवेषकाः सम्पादयन्ति –

१. आर्यशूरस्य जातकमालायाः समालोचनात्मकमध्ययनम् ।
२. वैदिकस्वरविवेचनम् ।
३. पं. छविलालसूरिणः कृतिर्व्यक्तित्वं च ।
४. औपनिषदस्य दर्शनस्यैकमध्ययनम् ।
५. षोडशसंस्कारविमर्शः ।
६. लिच्छविकालिकपद्यसाहित्यस्य वैशिष्टयम् ।

समागतायां नवीनशिक्षाप्रणाल्यां प्राचीनपद्धत्या प्रचलितायाः संस्कृतशिक्षायाः संवर्धनाय संरक्षणाय च स्वतन्त्रस्य संस्कृताध्ययनसंस्थानस्य स्थापनं समजनि । संस्थानस्यास्यानुशासने चत्वारि विद्यापीठानि सन्ति । इमानि विद्यापीठानि धरानमटिहानीकाष्ठमण्डपदाङ्प्रदेशेषु सन्ति । एषु धरानमटिहानीस्थयोर्विद्यापीठयोः स्नातकस्तरपर्यन्तं दाङ्स्थविद्यापीठे स्नातकोत्तरस्तरपर्यन्तं काष्ठमण्डपस्थविद्यापीठेऽनुसन्धानस्तरपर्यन्तं

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

शैक्षिककार्यक्रमाः प्रचलन्ति । एषु विद्यापीठेषु वेदव्याकरणनव्यन्यायप्राचीनन्यायशाङ्कर-वेदान्तधर्मशास्त्रसाहित्यदर्शनपूर्वमीमांसापुराणेतिहासज्यौतिषविषयाणां शिक्षणानुसन्धान-कार्यक्रमौ प्रचलतः ।

त्रिभुवनविश्वविद्यालयस्य सामान्यनीत्यनुसारं संस्थानेनानेनापि छात्रेष्वनुसन्धान-प्रतिभोन्मेषः शिक्षाया मुख्यतममुद्देश्यममन्यत । स्नातकोत्तरपरीक्षोत्तीर्णताया अनुसन्धान-प्रविधिज्ञानं लघुशोधप्रबन्धलेखनं चाऽऽवश्यकत्वेन निरधायिषाताम् । उद्देश्यस्यास्यावाप्तये स्नातकोत्तरकक्षायां छात्राणामनुसन्धानप्रविधिज्ञानाय पाठघण्टा निर्धारिता । तज्ज्ञानस्य दाढर्याय गोष्ठीप्रवचनादीनां समायोजनं विधीयते । अधुना संस्थानेऽस्मिन् स्नातकोत्तर-कक्षोत्तीर्णतायै स्वस्वविषयेषु लघुशोधप्रबन्धलेखनाय छात्रैर्नामानि पञ्जीकारितानि । लघुशोधप्रबन्धविषयाश्च निम्नाङ्किताः सन्ति ।–

१. वेदस्यापौरुषेयत्वम् ।
२. वैयाकरणाभिमता शक्तिः ।
३. कारकविवेचनम् ।
४. स्फोटविवेचनम् ।
५. पाणिनीयसूत्रसमीक्षा ।
६. वैशेषिकदर्शनस्य वैशिष्टचम् ।
७. प्राचीनाचार्याणां रेखागणितज्ञानम् ।
८. वीजगणिते भास्कराचार्यस्य वैशिष्टचम् ।
९. श्रीमद्भागवते शृङ्गाररसविस्तारः ।
१०. गीताया निष्कामकर्मविचारः ।
११. नक्षत्राकृतिनिर्धारणम् ।
१२. प्रमाणस्वरूपविवेचनम् ।
१३. अलङ्कारसम्प्रदायरीतिसम्प्रदाययोस्तुलनात्मकमध्ययनम् ।
१४. भरतनाटचशास्त्रेऽलङ्कारस्य स्थानम् ।
१५. दण्डिनो मते काव्यस्य लक्षणम् ।
१६. भामहमते काव्यस्य स्वरूपम् ।
१७. अलङ्कारसम्प्रदायो व्यङ्ग्यार्थविवेचनं च ।
१८. नाटकसम्बन्धिनीभामहस्य मान्यता ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१९. हिमवत्खण्डस्य सांस्कृतिकं गौरवम् ।

२०. महाभारतस्य शान्तिपर्वणि राजनीतिः ।

२१. श्रीमद्भागवते करुणो रसः ।

२२. नेपालीसमाजे मार्कण्डेयपुराणान्तर्गतदुर्गासप्तशत्या महत्त्वम् ।

२३. शाङ्करवेदान्ते मायामीमांसा ।

२४. राजनीतौ धर्मशास्त्रस्योपयोगिता ।

२५. साङ्ख्यानां प्रकृतिपुरुषसिद्धान्तः ।

२६. न्यायशास्त्रस्य सर्वशास्त्रोपकारकत्वम् ।

In addition to this, comes another important consideration. If *Ketu* would be understood as being the descending node of the lunar orbit, or as *Rahu*'s body, which is claimed in the pertinent literature, then he would be indispensable (just as the sun's acolyte *Dandanayaka* requires *Pingala*, Visnu's *Cakrapurusa* requires *Gadadevi*, etc.). The absence of *Ketu* thus means nothing else than that *Ketu* remains what he was from the beginning: the comet god. *Rahu*, however, repre-

51. Cf. description in the Buddhist *Kriyasamgrahapanjika*: *meghasthardha-kayah* (PAL and BHATTACHARYYA, *op. cit.*, p. 68). For *simhasana* cf. MITRA, *op. cit.*, pp. 33 f., 36.
52. Usual sequence is *Surya*, *Soma*, *Mangala*, *Budha*, *Brhaspati*, *Sukra*, *Sani*, *Rahu* and *Ketu*.
53. On the wall of the Visvesvara-temple also the *dikpalas* are depicted and as small stone reliefs inserted into the brick walls: *Indra* (eastern wall, right), *Agni* (eastern wall, left); *Yama* (Southern wall, right), *Nirrti* (southern wall, left); figures on the western wall missing; *Kubera* (northern wall, right), *Isana* (northern wall, left).
54. *Ketu* is in each case below right.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

sents the ascending and descending nodes of the lunar orbit, head and tail of the dragon.

Not a single textual description of the planets corresponds to the main characteristics of the wooden reliefs under consideration. The basic artistic conception of the reliefs rests upon an assimilation of the planets into the traditional mode of depicting the sun-god with a chariot drawn by (seven) horses (and attendant figures in pairs).

This conception reminds one, indeed, of an ancient Puranic-cosmographic tractatus, which assigns a team of horses to all planets;[55] in literary iconography, this idea was picked up only by the VdhP III,64;[56] in the artistic practice of India, it was never utilized. Only late, in the 17th century, we find the realization of the idea of a wagon for all planets, and indeed, with draught-animals which partially already in more ancient time, textually and/ or in images had been developed as mounts or accompanying animals of the individual *grahas*.[57]

The comparison of the *Astagrahas* on Hindu temples in Patan with iconographic texts makes clear that here or there exists a specific closeness to the Buddhist texts of Bengal and Nepal. This is only surprising on first sight. On the one hand, we know that Tantric Buddhism and Tantric Hinduism have a tendency to assimilate and exchange individual gods and groups of deities; on the other is to be considered that up until now we hardly know Hindu iconographic texts concerning the world of the gods in late Hinduism in Nepal, a gap which perhaps can be closed by the manuscript search of the Nepal-German Manuscript Preservation Project.

55. KIRFEL, *Kosmographie*, pp. 130, 137, 141 f.
56. Cf. MITRA, *op. cit.*, p. 31.
57. For discrepancies between literal *vahanas* and extant *navagraha*-cum-*vahana* lintels cf. MITRA, *op. cit.*, pp. 18 sqq., pls. VIII-XI, and PAL and BHATTACHARYYA, *op. cit.*, pp. 43 sqq.

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Fig. 1 Viśveśvara temple (foreground) and Bhimsen temple (background), Patan, view from SE

Fig. 2 Viśveśvara temple, eastwall, right: Moon/Candra

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Fig. 3 Hariśaṅkara temple, eastwall, right: Moon/Candra

Fig. 4 Viśveśvara temple, eastwall, left: Sun/Sūrya

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Fig. 5 Hariśaṅkara temple, eastwall, left: Sun/Sūrya

Fig. 6 Viśveśvara temple, southwall, right: Mars/Maṅgala

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Fig. 7 Hariśaṅkara temple, southwall, right: Mars/Maṅgala

Fig 8 Viśveśvara temple, southwall, left: Mercury/Budha

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF



Fig 9 Hariśaṅkara temple, southwall, left: Mercury/Budha

Fig. 10 Viśveśvara temple, westwall, right: Jupiter/Bṛhaspati

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Fig. 11 Hariśaṅkar temple, westwall, right: Jupiter/Bṛhaspati

Fig. 12 Viśveśvara temple, westwall, left: Venus/Śukra

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Fig. 13 Hariśaṅkara temple, westwall, left: Venus/Śukra

Fig. 14 Viśveśvara temple, northwall, right: Saturn/Śani

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Fig. 15 Hariśaṅkara temple, northwall, right: Saturn/Śani

Fig. 16 Viśveśvara temple, northwall, left: Rahu

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Fig. 17 Hariśaṅkara temple, northwall, left: Rahu

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Fig. 18 Sūrya + astagrahas (Ketu right below) in the west of Indreśvara temple complex, Panauti

all photos by the author

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

नेपाले संस्कृतानुसन्धानक्षेत्रे सामयिकसमस्यानां सर्वेक्षणम्

प्रस्तोतारः

सरस्वतीप्रसादघिमिरे (संयोजकः)

दुर्गाप्रसाददवाडी (सदस्यः)

बाबुरामशर्मा पोखे्रल (सदस्यः)

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युस्तं नमामो गजाननम् ॥

श्रीमन्तः संस्कृताध्ययनसंस्थानाध्यक्षमहोदयाः !
शर्मण्यदेशादागताः संस्कृतानुशीलनपरायणा मान्या अतिथिमहोदयाः !
विविधविद्याविद्योतितान्तःकरणाः समुपस्थिता विद्वांसो विदुष्यश्च ।

अद्य महदिदं प्रमोदस्थानं यन्नेपाले संस्कृतवाङ्मयस्य वैज्ञानिकदृष्टयाऽध्ययनानुसन्धानप्रवर्धनप्रचाराणां कृते सम्पादनीयेषु कार्येष्वेकतमस्मिन् कार्ये नैपालकजर्मनविद्वद्गोष्ठयां समवेताः स्मो वयम् । तत्र तावत् संस्कृतविद्यानुरागार्द्रहृदयानां संस्कृतवाङ्मय-

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संवर्धने दत्तचित्तानां संस्कृतस्य प्राणभूतानां श्रीमतां तत्रभवतां पञ्चश्रीकाणां वीरेन्द्रवीरविक्रमशाहदेवानां सदिच्छानुसारं संस्कृतवाङ्मयस्य संवर्धनाय शिक्षाराज्यमन्त्रिणः शिक्षासहायकमन्त्रिण उपकुलपतिमहाभागास्त्रिभुवनविश्वविद्यालयस्य शिक्षाध्यक्षमहाभागाः संस्कृताध्ययनसंस्थानाध्यक्षमहोदयाश्च सदैव बद्धपरिकराः सन्तीत्यत्र नास्ति सन्देहलेशः। यद्यप्यत्र संस्कृतस्योत्थानायानेकवारं प्रयत्नाः सञ्जातास्तेष्वेवायमेकतमः प्रयत्नस्तथाऽप्यद्य यथा वैज्ञानिकदृष्ट्या पठनपाठनानुसन्धानादि कर्मसु सक्रियता दृश्यते न तथेतः पूर्वम्। अस्मिन्नवसरे पवित्रेऽस्मिन् कर्मणि स्वल्पमपि सेवावसरं लभमाना वयं प्रथममेवातिमात्रं कृतज्ञतामावेदयामः।

नूनं सुविदितमेव भवतां यदयं नेपालदेशः सुचिरादेव प्रशस्तमायतनं संस्कृतविद्यानाम्। यासाम्–

अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः।
धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश॥

इति संक्षेपेणोद्देशः। आसां विद्यानामत्राध्ययनाध्यापनानुसन्धानादिकं पूर्वं सम्यगनुष्ठीयते स्मेति भवन्तो जानन्त्येव। अधुनैव पठ्यमानैः कार्यपत्रैस्तत्र पुनरुद्बोधोऽपि संभाव्यते। कालक्रमात् तत्राधीतिबोधाचरणप्रचारणेषु ह्रासो जातोऽस्ति। अनुसन्धानक्षेत्रे तु विशेषेण शैथिल्यं संजातमिव दृश्यते। अतस्तदर्थं संस्कृतस्योत्थापनाय प्रारब्धे प्रयत्ने संस्कृतानुसन्धानक्षेत्रे काः समस्या इत्येतस्मिन् प्रसङ्गेऽस्माभिरिदं कार्यपत्रं यथाशक्ति विचार्योपस्थापितम्।

प्राक्कथनम्

संस्कृतभाषाया अपरं नामामरवाणीति। इयममराणां वाण्यमरवाणी च। जीवितैषा भाषा जीवति जीविष्यति च। अस्यां भाषायामधुनाऽपि महाकाव्यादीनि लिख्यन्ते। वैज्ञानिका विषया उपस्थाप्यन्ते। दार्शनिकाश्चर्चाः क्रियन्ते। जन्मतो मरणपर्यन्तं तथा मरणानन्तरमप्यस्यां भाषायां व्यावहारिकं कार्यं प्रचलति। हिन्दूसमाजस्य हिन्दूसामाजिकसंस्थानां चाध्ययनं संस्कृताध्ययनेन विनाऽपूर्णमेव भवति। अस्माकमार्याणां संस्कृतिः संस्कृते सुरक्षिता वर्तते। संस्कृते न केवलं साहित्यमपि तु स्वरशास्त्रं लिपिशास्त्रं रत्नशास्त्रं सूपकर्म (गृहविज्ञानम्) चित्रक्रियोद्यानविज्ञानं लौहक्रिया कृषिकर्म पशुपालनं मणिमन्त्रौषधरसायनविज्ञानादीनि सर्वाण्येव विज्ञानानि

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

वर्तन्ते । न केवलं मानवस्य कृते सर्वस्यैव प्राणिजातस्य कृते रोगोपचारव्यवस्था प्राप्यते। संस्कृतशास्त्रेषु वृक्षायुर्वेदपश्वायुर्वेदयोर्विवेचनं वर्तते संस्कृतग्रन्थेषु ।[१] न केवलमेतावदेव, शृङ्गारप्रसाधनादीनामपि संस्कृतवाङ्मये सम्यग् वर्णनं कृतं दृश्यते । कथं तेषां विधानं भवतीति पुराणेषूद्यानविज्ञानस्य वर्णनं प्राप्यते । सुवर्णरजतादीनां खनितो निःसारणं तैश्च धातुभी रसभस्मादीनां निर्माणमप्युपलभ्यत आयुर्वेदादि शास्त्रेषु ।[२] इत्थमेव संस्कृते विवेचितायां वास्तुविद्यायां मन्दिरभवनादि निर्माणविधेः सम्यग् वर्णनं दृश्यते ।[३] आर्याणामाचाराणां प्राच्यदर्शनानां च ज्ञानस्य निधिः संस्कृतमेव दर्शनक्षेत्रे प्राच्यदर्शनं ज्ञानस्य परां कोटिमाटीकत इति सर्वेषामेव मतम् । एवमितिहासदृष्ट्या संस्कृतवाङ्मयेतिहासपर्यालोचने कृते संस्कृतवाङ्मयात् प्राचीनतरं किमपि वाङ्मयं नोपलभ्यत इति तु सर्वैरेव स्वीकृतम् ।

किं च वेदानामनादित्वेनापौरुषेयत्वेन च संस्कृतवाङ्मयस्य सर्वप्राचीनत्वमस्माकं जीवने सर्वत्रोपयुज्यमानत्वाद् व्यापकत्वं करालेऽप्यस्मिन् काले संस्कृतवाङ्मयस्याधुनाऽपि निर्माणाध्ययनानुशीलनादिकार्याणां क्रियमाणत्वादविच्छिन्नत्वं च सिद्ध्यन्ति ।

राष्ट्रस्य समृद्धये भौतिकविकासेन सहाऽऽध्यात्मिकविकासोऽपि परमावश्यको भवति । राष्ट्रस्य सर्वे जनाश्चारित्रेण युक्ताः सर्वभूतहितेरता विद्वांसः स्वधर्माग्रहग्रहिलाः स्वसंस्कृतिपरम्परारक्षकाः राष्ट्रभक्ताश्च स्युरिति कस्यापि राष्ट्रस्याभीष्टं भवति । संस्कृतशिक्षायामेतादृशीं जनशक्तिमुत्पादयितुं क्षमता वर्तते । संस्कृतस्येमं महिमानमवगत्य सम्पूर्णस्य विश्वस्यानेके विद्वांस आकृष्टाः सन्तः संस्कृताध्ययनानुशीलनादिकार्येषु प्रयत्नशीलाः संजाताः । पाश्चात्यविदुषां संस्कृताध्ययनेन सर्वत्र संसारे संस्कृतस्य महत्त्वमुपयोगित्वं च प्रस्रियते । संस्कृतक्षेत्रे पाश्चात्यविदुषां मध्ये शर्मण्यदेशविदुषामवदानं महत्त्वपूर्णं विद्यते । माक्समूलरमहाभागेन वेदानां सपरिश्रमं सम्पादनं भाष्यं च विधाय मोक्षमूलर इति बहुमान-सूचकं नामार्जितम् । इत्थमनेकैर्महापुरुषैः संस्कृतेऽनुसन्धानात्मकानि कार्याणि कृतानि दृश्यन्ते । किन्त्वस्माभिर्विगते निकटसमये संस्कृतसम्बधीनि बहूनि तत्त्वानि विस्मृतानि,

१. अग्निपुराणम्- अ. २८८–२९० । गरुडपुराणम्- अ. २०१ । मत्स्यपुराणम्– अ. २४ तथा गरुडपुराणम् अ. ५६, २०२ ।

२. गरुडपुराणम्– अ. ८६ ।

३. मत्स्यपुराणम्– अ. २५२– २७० । अग्निपुराणम्– अ. ४०, ९३, ९४, १०५, १०६, २४७ । विष्णुधर्मोत्तरपुराणम्– अ. २ ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

कस्मिंश्चिद्देशे शास्त्रीयं ज्ञानं कथंचिद् रक्षितम् । संस्कृतशास्त्राणामनुसन्धानेनास्माकं दर्शनानां धार्मिकाचाराणां व्याकरणस्य वर्णमालायाश्चाऽऽधुनिकविज्ञानसम्मतत्वं साधयितुं शक्यते ।[४] अनुसन्धानस्य तदर्थमावश्यकता तु भवत्येव । अधुना विचाराणां संघर्षस्य युगे केवलं तथ्योपस्थापनमेव न पर्याप्तम् । तदर्थं तर्कस्याऽऽवश्यकता भवति । युक्तयः स्थापनीया भवन्ति । नैतत्कार्यमनुसन्धानेन विना शक्यम् । अस्माकं प्राचीनं विज्ञानमस्माभिर्विस्मृतम् । कला अपि विस्मृतप्राया विद्यन्ते । अस्माकं कलासु किञ्चित् तादृशं सौष्ठवं विद्यते, येन वैदेशिकाः पुनः पुनरत्राऽऽगत्य ताः कला दृष्ट्वाऽऽत्मानं धन्यं मन्यन्ते । अन्यथा वास्तुकला मूर्तिकलाश्चित्रकलाश्च केन तुलनीयाः स्युः ? आसां कलानामुद्धार आवश्यकः । तदुद्धारस्य कृते संस्कृतग्रन्था गवेषणीया एव । अस्माभिर्विश्वस्य पुरतः स्वसंस्कृते-र्वैशिष्ट्यमुपस्थापनीयमेव । किं च विश्वस्यैव कल्याणायास्माकं कलानां वास्तुविज्ञानस्य दर्शनस्य साहित्यस्य पुराणस्याऽऽयुर्वेदस्य वेदस्य ज्यौतिषशास्त्रस्य धर्मशास्त्रस्य चोत्कृष्टानि तत्त्वानि तत् तद् ग्रन्थेभ्यो निष्कृष्य विश्वस्य पुरत उपस्थापनीयानि । अस्माकं देशे धर्मसहिष्णुतया सह स्वधर्माग्रहोऽपि विद्यते । तादृशः स्वभावः स्वग्रन्थेषु कुत्रोपलभ्यत इत्याद्यपि स्थापनीयमेव । एतत् सर्वं संस्कृतानुसन्धानेनैव शक्यम् ।

विश्ववाङ्मये लिखितरूपेण च प्राप्यं प्राचीनतमं वाङ्मयं संस्कृतवाङ्मयमेव यस्याध्येतारो ज्ञातारश्च विश्वस्य कोणे कोणे समुपलभ्यन्तेऽधुनाऽपि । संस्कृते-ऽनुसन्धानकार्यमतिप्राचीनकालत एव संजातं दृश्यते । वेदार्थानुसन्धानं पूर्वैः पूर्वतरैः कृतमाधुनिकैरपि तदर्थानुसन्धानाय प्रयत्यते । संस्कृतवाङ्मये प्राचीनानामितिहास-पुराणधर्मशास्त्रादीनां निर्माणं वेदार्थानुसन्धानेनैव संजातम् । धर्मस्य ज्ञापको वेद एव । धर्मानुसन्धाने तर्क आश्रयणीयो भवति । परन्तु स तर्को वेदानुकूल एव भवितुमर्हति ।[५] अनुसन्धानशब्दो न नवीनोऽमुनाऽप्यस्य शब्दस्य प्रयोगो विहितः । पूर्वं साधारणरूपेण ज्ञातस्य विषयस्य पश्चाद् विशेषरूपेण ज्ञानसंपादनं प्राप्य सामग्रीतः सूक्ष्मविचारोद्भावन-मनुसन्धानमिति कथयितुं शक्यते ।

---

४. (क) प्राच्य दर्शन र विज्ञान– धर्मसन्देश ३।२
(ख) सनातन धर्म र सापेक्षवाद– ,, ,, ४।१
(ग) देवनागरी वर्णमालाको वैज्ञानिकता– ,, ,, ३।१

५. आर्षं धर्मोपदेशं च वेदशास्त्राविरोधिना ।
यस्तर्केणानुसन्धत्ते स धर्मो वेद नेतरः ॥
– मनुस्मृतिः १२। १०६

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

आधुनिके वैज्ञानिके युगे सर्वत्रानुसन्धानस्य प्राधान्यं प्राप्यते । कार्यं तु प्राचीनमेव किन्तु प्रविधौ नवीनता संजाता दृश्यते । यथा– दर्शनस्य हेयं हेयहेतुर्हानं हानोपायश्चेति चत्वार्यङ्गानि भवन्ति तथैव प्राचीनशोधप्रविधावपि चत्वार्येवाङ्गानि दृश्यन्ते ।[६] प्रथममङ्गं समस्याया उपस्थापनं यथा– अथ शब्दानुशासनं यथा-- वाऽथ योगानुशासनम् । द्वितीयमङ्गं सा समस्या कथमागतेति विवेचनं यथा– केषां शब्दानां को योग इत्यादिकम् । तृतीयमङ्गं समस्यानां समाधानं कथं भवतीति विवेचनं यथा– योगोपायाः के ? शब्दानां विवेचनं कथं कर्तव्यमित्यादिकम् । चतुर्थमङ्गं समस्यानां समाधानं यथा– साङ्गयोगस्य विवेचनं कथं शब्दानां सिद्धिरिति विवेचनं च । इत्येवं रीतिमादायैव पाणिनीयव्याकरणादीनि शास्त्राणि विवेचितानि । नवीनानुसन्धानविधावपि प्रथमे सोपाने समस्याया अध्ययनम् । द्वितीये सोपाने सम्बद्धसूचनानां सङ्ग्रहः । तृतीये सोपाने प्राप्तसूचनानां विश्लेषणं चतुर्थे च सोपाने नवीनवस्तु स्थापनं तस्य व्याख्यानं च । एवं चाऽऽधुनिकशोधप्रविधौ बहुष्वंशेषु प्राचीनप्रविधौ च साम्यं दृश्यते । अस्माकमयं देशो नेपालः संसारस्य भूत्यै संस्कृतानुसन्धानमादायैव किंचिद् दातुं प्रभवति । अन्येषु विषयेषु त्वन्येषु देशेष्वपि प्रचलत्येवानुसन्धानकार्यम् । अस्माकं राष्ट्रं हिन्दूराष्ट्रत्वेनोद्घोषितं संविधानानुसारम् ।[७] हिन्दूराष्ट्ररूपेणापि संस्कृतवाङ्मयस्य संरक्षणं संवर्धनं च नेपालदेशस्य परमं कर्तव्यं संजातं वर्तते । संस्कृतवाङ्मयस्य रक्षायै संवर्धनाय च तत्रत्यानां लोकहितकराणां विषयाणामनुसन्धानमावश्यकम् । नेपाले संस्कृतक्षेत्रेऽनुसन्धानात्मकं कार्यं पूर्वमपि कृतमधुनाऽपि किंचित् क्रियमाणं विद्यते । नेपाले बह्व्यः पत्रिकाः संस्कृते नेपालराष्ट्रभाषायां च प्रकाशिताः । यासां भाषादृष्टया विषयदृष्टया च संस्कृतानुसन्धानक्षेत्रे प्रभूतं महत्त्वं विद्यते, नवीनप्रविध्यनुसारं ता

---

६. हेयं दुःखमनागतम्– पातञ्जलयोगदर्शनम् २।१६
द्रष्टृदृश्ययोः संयोगो हेयहेतुः– ,, २।१७
तदभावात् संयोगाभावो हानं तद् दृशेः कैवल्यम्– २।२५
विवेकख्यातिरविप्लवा हानोपायः ,, २।२६
मानचित्ररूपेणेत्थं दर्शयितुं शक्यम्–

अनुसन्धानकार्यम्

प्रथमसोपानम्	द्वितीयसोपानम्	तृतीयसोपानम्	चतुर्थसोपानम्
(समस्याध्ययनम्)	(संबद्धसूचनासंग्रहः)	(प्राप्तसूचना विश्लेषणम्)	(नवीनवस्तुस्थापनम्)

७. नेपालको संविधान [सं. २०२५ भाग १, धारा ३ (१)] ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

अनुसन्धानपत्रिकाः कथयितुं न शक्यन्त इति त्वन्यत् । ताश्च सुरभिहैमवत्यादयः ।[८] संस्कृतेऽनुसन्धानं प्राचीनकाले पर्याप्तं जातमित्यत्र नास्ति सन्देहः परमाधुनिकवैज्ञानिकप्रविध्यनुसारं नवीनं शोधकार्यं तु पाश्चात्त्यदेशेष्वेव प्रारब्धं संस्कृतक्षेत्रेऽपि । एष नवीनः प्रविधिरत्र सम्यक्तया प्रयोक्तुं न पारितम् । एवमेव भौतिकसाधनाभावेनाप्यत्रानुसन्धानस्य सम्यक् प्रगतिर्नजातेति मतमस्माकम् । एवमेवाऽऽर्थिकशैक्षिकसम्बन्धिन्यादयोऽनेकाः समस्याः पुरतो दृष्टाः । अस्माभिः सवर्गीकरणमत्रोपस्थाप्यन्ते । आसां समस्यानां वर्गीकरणं बोधसारल्याय जटिलसमस्यानां साधारणसमस्यातः पृथक्करणाय समस्यानां मध्ये का समस्या प्रथमं ग्राह्यौ तस्या निर्णयाय सारल्याय च विहितम् । समस्यानां वर्गीकरणमधोनिर्देशानुसारं विद्यते ।

१. भौतिकसाधनसम्बन्धिन्यः समस्याः ।
२. शैक्षिकसमस्याः ।
३. आर्थिकसमस्याः ।
४. प्रविधिसम्बन्धिन्यः समस्याः ।
५. अनुसन्धानभाषासम्बन्धिन्यः समस्याः ।
६. प्रकाशनसम्बन्धिन्यौ समस्ये ।
७. कार्यान्वयनसम्बन्धिन्यः समस्याः ।
८. प्रोत्साहनसम्बन्धिन्यौ समस्ये ।
९. प्रशासनसम्बन्धिन्यौ समस्ये ।
१०. सङ्घटनसम्बन्धिन्यः समस्याश्च ।

---

८. नेपाले संस्कृतक्षेत्रेऽनुसन्धाने साहाय्यकरणे यत् किंचिदुपयोगिन्यः पत्रिकाः–
क. सुरभिः (संस्कृतभाषामयी)
ख. हैमवती (,, ,,)
ग. जयतु संस्कृतम् (संस्कृतभाषामयम्)
घ. मर्यादा (नेपालीभाषामयी)
ङ. पूर्णिमा (,, ,,)
च. धर्मदर्शन (,, ,,)
छ. हिमवत्संस्कृति (,, ,,)
ज. पुरातत्त्वविभागतो निःसृता पत्रिका च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१. संस्कृतानुसन्धानसमस्याः

१. भौतिकसाधनसम्बन्धिन्यः समस्याः–

१.१. पुस्तकालयसम्बन्धिन्यः

अस्माकं देशे बहवः पुस्तकालयाः सन्ति । तेषु राष्ट्रियपुस्तकालयो राष्ट्रियाभिलेखालयः केसरपुस्तकालयस्त्रिभुवनविश्वविद्यालयकेन्द्रीयपुस्तकालयो मदनपुस्तकालयः संस्कृताध्ययनसंस्थानविद्यापीठपुस्तकालयाश्च संस्कृतानुसन्धातॄणां कृते उपयोगिनः सन्ति । किन्त्वेतेषु पुस्तकालयेषु शोधकर्तॄणां कृते प्रायः सौविध्यं नास्ति ।[६] तद्यथा–

(क) पुस्तकालयेष्वसौविध्यम्

एतेषु पुस्तकालयेष्वनुसन्धानकर्तारो यथासमयं पुस्तकानि न प्राप्नुवन्ति । यतो हि तत्र पुस्तकानां वर्गीकरणं प्रायो नास्ति । किञ्च पुस्तकालयेष्वनुसन्धानकर्तॄणां कृते पृथक् कक्षस्य व्यवस्था प्रायो नास्ति । उपनिवेशनस्य पुस्तकाधानस्य च व्यवस्थाऽपि समीचीना न विद्यते ।

(ख) अतिप्राचीनसूक्ष्माक्षरपुस्तकाध्ययनार्थं सहायकयन्त्राभावः

अभिलेखालये प्रायो हस्तलिखितग्रन्था वर्तन्ते । तेषु केचन ग्रन्थाः कीलाक्षरैर्लिखिताः केचन नेवारीलिप्याम् । एवंविधानां ग्रन्थानां नवेषणाकार्यमतीव कठिनम् । एवं च भूर्जपत्रताडपत्रताम्रपत्रादिषु लिखिता अभिलेखाः सन्ति । तेषां सूक्ष्मनिरीक्षणयन्त्र (माइक्रसकोप) साहाय्येन सूक्ष्मचित्रणयन्त्र (माइक्रोफिलम) साहाय्येनाध्ययनं कर्तुं शक्यते । तथैव ज्यौतिषशास्त्रस्याध्ययनं दूरदर्शनयन्त्रादिसाहाय्येन कर्तुं शक्यते । तादृशानां यन्त्राणामत्राभावो विद्यते ।

(ग) वैज्ञानिकसूचिसमस्या

अभिलेखालये प्रायो हस्तलिखितग्रन्था विद्यन्ते । तेषु केचनाऽऽद्यन्तरहितास्त्रुटितपत्रा वा लभ्यन्ते । तेषां सूचीनिर्माणकार्यमतीव कठिनम् । पुस्तकालयेषु स्थितानां पुस्तकानां यावद् वैज्ञानिकं वर्गीकरणं न भवति तावदनुसन्धानकार्यं कठिनम् । विषयलेखकवर्णक्रमानुसारं वर्गीकरणाभावेन विषयसूची वैज्ञानिकी न जायते । तेन शोधार्थिभिः सुखेन ग्रन्था न लभ्यन्ते ।

---

६. डा० भिद्सेल एवं प्रा० सरस्वतीप्रसादघिमिरेद्वयोः संयुक्तं प्रतिवेदनम् — (२०२४)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(घ) दुर्लभपुस्तकाप्रकाशनम्

अभिलेखालयादिपुस्तकालयेषु दुर्लभा ग्रन्था विद्यन्ते। तेषां प्रकाशनं यावन्न जायते तावत् संस्कृतानुसन्धानस्य कार्यं न सम्यक् सम्पन्नं भवति ।

१. २. प्रयोगशालाया वेधशालाया वाऽभावः

संस्कृते वैज्ञानिकविषयाणां ज्यौनिषादीनामनुसन्धानाय प्रयोगशालाया वेधशालाया वाऽपेक्षा भवति । यज्ञपात्रादीनां वैदिकयज्ञादीनां च प्रायोगिकं ज्ञानं प्रयोगशालाया यज्ञशालाया वाऽभावे सर्वथाऽसम्भवम् ।

१. ३. आवश्यकपुस्तकानां न्यूनता

अध्यापकेषु योग्येषु सत्स्वपि यावत्पर्याप्ताध्ययनसामग्री नोपलभ्यते तावन्न शक्यतेऽनुसन्धानकार्यं सम्यक् सम्पादयितुम् । तत्तद्विषयानुसन्धानकर्तॄणां तत्तद्-विषयकपुस्तकाभावेनानुसन्धानकार्ये काठिन्यं जायते। किञ्च नवीनपद्धत्याऽनुसंहितानां ग्रन्थानामभावेनाप्यनुसन्धानकार्यावरोधो जायते । तादृशपुस्तकानामत्र न्यूनता वर्तते।

२. शैक्षिकसमस्याः

२. १. निर्देशकानामपर्याप्तता

नेपाले यद्यपि संस्कृतविदुषामभावो नास्ति । तथाऽप्याधुनिकरीत्या कृतानुसन्धानामनुसन्धित्सूनां मार्गनिर्देशकानामपर्याप्तता विद्यते।[१०] येऽप्यत्र विद्यन्ते संस्कृते कृतानुसन्धानास्तेऽपि परिगणिताः कार्यान्तरे व्यापृताश्च। यद्यप्यत्र प्राचीनरीत्याऽनुसन्धानं प्रचलदस्ति तथाऽपि नवीनप्रविध्यनुसारं निर्देशकानामपर्याप्तत्वेनानुसन्धानकार्यं सम्यक् सम्पादयितुं न शक्यते ।

२. २. आवश्यकानुसन्धेयविषयशिक्षणन्यूनता

संस्कृताध्ययनसंस्थाने नेपालस्य कृत आवश्यकानामपि केषांचिद् विषयाणा-मध्यापनमधुनाऽपि न प्रारब्धं विद्यते। शैवागमस्य (प्रत्यभिज्ञादर्शनस्य) तन्त्रस्य बौद्धदर्शनस्य सांख्ययोगस्य चाध्यापनार्थं पृथग्विभागाः स्युरिति पूर्वमत्रत्यैरुपकुलपतिमहोदयैरपि कथितमासीत् ।[११] तादृशविषयशिक्षणव्यवस्थाऽत्र न विद्यते । तथैवाऽऽयुर्वेदविभागश्च

---

१०. संस्कृतानुसन्धानदक्षसमितेः प्रतिवेदनम्- संयोजको विद्यानाथोपाध्यायः (२०३५)
११. त्रि. वि. वि. दीक्षान्तसमारोहावसर उपकुलपतिरुद्रराजपाण्डेयमहोदयानामभिभाषणम् (२०२६)

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृताध्ययनसंस्थानात् सर्वथा पृथग्भूतस्तिष्ठति । तत्र चाध्ययनमधुना प्रमाणपत्रस्तरतः स्नातकस्तरपर्यन्तं प्रारब्धमेव वर्तते । किञ्च तत्र पाश्चात्त्यचिकित्सापद्धतिर्मिश्रिता वर्तते । विशुद्धायुर्वेदविज्ञानस्याध्ययनाध्यापनानुसन्धानमेवंविधेनाध्ययनेन विलुप्तमिति वहुत्र दृष्टचरम् । अतो नवरससदृशायुर्वेदौषधानसन्धानसमर्थस्याऽऽयुर्वेदाध्ययनस्य संरक्षणं कथं स्यात् ?

२. ३. विषयानुसन्धानासनापेक्षा

अध्यापनातिरिक्तसमये प्रतिविषयं शिक्षणसमित्यध्यक्षनिर्देशने विषयानुसन्धानासनमपेक्ष्यते सम्यगनुसन्धानकार्यसंचालनार्थम् । येन विषयशिक्षकाः स्वविषयानुसन्धाने संलग्नाः स्युः । अस्यात्रापेक्षा वर्तते ।

२. ४. पाठचक्रमपरिष्कारापेक्षा

नवीनशिक्षायोजनायां कार्ये प्रयुक्तायां नवीनशिक्षायोजनोद्देश्यानां पूरकः प्राचीनपाठचक्रमापेक्षया वैज्ञानिकप्रविधियुक्तश्च समयसापेक्षः पाठचक्रमः संस्कृतक्षेत्रेऽपि निर्मितः । तत्रोपेक्षितानामुद्देश्यानां निवेशं कृत्वा तेषां स्पष्टीकरणायापि प्रयासो विहित एव । तथापि यावदभीष्टमनुसन्धानपरको नेपालोन्मुखश्च पाठचक्रमो जात इति कथयितुं न शक्यते । अतोऽनुसन्धानाभिवृद्धये पाठचक्रमेऽधुनाऽपि परिष्कारोऽपेक्ष्यते ।

३. आर्थिकसमस्याः

३. १. आन्तरिकं काठिन्यम्

अस्मिन्नर्थप्रधाने युगेऽनुसन्धातारः प्रायः स्वकीयेन व्ययेन शोधकार्यं सम्पादयितुं न पारयन्ति । शोधकर्तुर्मानसिकी स्थितिरपि तादृशी न भवति येन कारणेन शोधकर्ता स्वयमेव तत्र संलग्नो न भवति ।

३. २. विद्वद्वृत्तेरपेक्षा

विद्वद्वृत्तेरभावेऽनुसन्धानस्य कार्यं प्रायः सम्यक् संचालितं न दृश्यते । यैः स्वतन्त्ररूपेणानुसन्धानकार्यमारब्धं तैः पदे पदे विघ्नमनुभूयानुसन्धानकार्यं प्रायः परित्यक्तं दृश्यते । अतोऽनुसन्धानकार्यार्थं पर्याप्तविद्वद्वृत्तेरपेक्षा भवति ।

३. ३. जीविकाप्राप्तिशङ्का

संस्कृताध्येतारः आत्मानमनुपेक्षितमनुभवितुं न समर्थाः । तेषां मनसि वर्तमाना

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतमधीत्य किं करणीयमित्याशङ्का न निवृत्ता । तेषामीदृशो भावो संस्कृतानुसन्धानक्षेत्रे सोत्साहमग्रे सर्तुं प्रतिबन्धकः ।[१२]

४. प्रविधिसम्बन्धिन्यः समस्याः

४. १. नवीनप्रविधेर्ज्ञानम्

यद्यपि पूर्वैरपि संस्कृतविद्वद्‌भिरनुसन्धानं विहितम् । यथा पाणिनीयसूत्रेषु कात्यायनेन पतञ्जलिना कैयटेन नागेशेन च वार्तिकभाष्यप्रदीपोद्योतनिर्माणेनानुसन्धानकार्यमेव कृतम् । तथाऽप्याधुनिके काले नूतनप्रविधेरज्ञानेन नवीनविदुषामनुसन्धानकार्ये काठिन्यमापतितुं वर्तते ।

४. २. प्राचीननवीनपद्धतिसमन्वयापेक्षा

अत्र संस्कृताध्ययनसंस्थाने प्राचीनपद्धतिं नवीनप्रणाल्या सह संयोज्याध्यापनं संचाल्यते । प्राचीनपद्धतिरपि संरक्षणीयाऽन्यथा प्रौढपाण्डित्यमेव समाप्तिं यायात् । नवीनैः पाश्चात्यविद्वद्‌भिरपि संस्कृते महत्कार्यं कृतम् । अतोऽत्र केषांचित् पाश्चात्यविदुषां सम्पर्कादनुसन्धानक्षेत्रे नवीनप्राचीनपद्धतिसमन्वयोऽपेक्ष्यते ।

४. ३. अध्ययनशोधकार्यसामञ्जस्यापेक्षा

सैद्धान्तिकाध्ययनं प्रारम्भत उच्चकक्षापर्यन्तं प्रवहमानं सदध्येतॄणां कृते सुकरं भवति । अनुसन्धानकार्यं तु सर्वथा नवीनमिव प्रवेष्टुमशक्यं प्रतिभाति । अतस्तयोः सामञ्जस्यमपेक्षितं वर्तते ।

५. भाषासम्बन्धिन्यौ समस्ये

५. १. वैदेशिकभाषाज्ञानम्

जर्मनदेशभाषाऽऽङ्ग्लभाषा फ्रान्सभाषा भोटचीनजापानब्रह्मदेशभाषा वाऽत्रत्यैः संस्कृतविद्वद्भिः प्रायो न ज्ञायन्ते । तेन वैदेशिकविद्वद्भिः कृतस्य कार्यस्य ज्ञानं न जायते नेपालविदुषाम् । अतोऽनुसन्धाने काठिन्यमायाति ।

---

१२. संयुक्तप्रतिवेदनम्– कार्यमूलसमितेः (२०३४) त्रिभुवनविश्वविद्यालयस्य मानविकयध्ययनसंस्थानान्तर्गतायाः ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

चीनजापानब्रह्मादयो देशा बौद्धधर्मप्रधानाः । तेषु देशेषु संस्कृतबौद्धदर्शनग्रन्थानां तत्तद्देशभाषास्वनुवादो जातः । बौद्धदर्शनेऽपि नेपाले पर्याप्तमनुसन्धानं कर्तव्यमेव । अतश्चीनजापानब्रह्मादिदेशभाषाज्ञानेनानुसन्धाने काठिन्यमायाति ।

५. २. पालिप्राकृतभाषाज्ञानम्

वयं तावत् स्वनिधिभूतायाः समन्वयात्मकसंस्कृते रक्षां कर्तुमसमर्था भविष्यामो यावत् पालिप्राकृतादिभाषाणां बौद्धजैनादिसम्प्रदायेषु समादृतानां ज्ञानं न विधास्यामः । अतः पालिप्राकृतभाषाज्ञानमनुसन्धानाय परमावश्यकम् । बौद्धसम्प्रदायस्य वाङ्मयं पालिभाषायामपि वर्तते । अतः पालिप्राकृतभाषाज्ञानमप्यनुसन्धानकार्याय समस्यारूपम् ।

६. प्रकाशनसम्बन्धिन्यौ समस्ये

६. १. अनुसन्धानपत्रिकाणामप्राप्तिः

भारतदेशे संस्कृतमय्यः संस्कृतानुसन्धानसम्बन्धिन्यश्चानेकाः पत्रिकाः प्रकाश्यन्ते । यथा राजकीयैशियासमितिपत्रिका (दि जर्नल अफ दि रायल एशियाटिक सोसाइटी) विहारानुसन्धानसमितिपत्रिका (दि जर्नल अफ दि बिहार रिसर्च सोसाइटी) दार्शनिकत्रैमासिकी (फिलासफिकल क्वार्टर्ली) ब्रह्मविद्या भारती मञ्जूषा संस्कृतरत्नाकरो विश्वभारत्यादयः पत्रिका निःसृताः परं ता अत्र न प्राप्यन्ते ।

अस्माकं देशेऽनुसन्धानात्मिकानां संस्कृतपत्रिकाणां प्रकाशनं प्रायो न जातम् । काश्चित् संस्कृतपत्रिका अत्र निःसृताः ।[१३] किन्त्वेता अनुसन्धानप्रधाना नाऽऽसन् । अतोऽनुसन्धानात्मिकायाः संस्कृतपत्रिकायाः प्रकाशनाभावोऽनुसन्धानक्षेत्रे काठिन्यमुत्पादयति ।

६. २. अनुसंहितस्याऽऽङ्ग्लादिभाषास्वनुवादं विधाय प्रकाशनम्

अनुसन्धानकार्यं संस्कृते स्यादित्यावश्यकमेव । किञ्च तस्य प्रकाशनमाङ्ग्लभाषायां राष्ट्रभाषायां जर्मनादिभाषास्वपि स्यादित्यावश्यकमेव । अतः सर्वस्य राष्ट्रस्य विश्वस्य च लाभः स्यात् । अतोऽनुसंहितस्य भाषान्तरप्रकाशनेनानुसन्धानक्षेत्रे सङ्कोचो जायते ।

७. कार्यान्वयनसम्बन्धिन्यः समस्याः

७. १. अनुसन्धानवातावरणस्याभावः

यद्यप्यत्राध्ययनसंस्थानेऽनुसन्धानकार्यमधुना प्रगतिमार्गे प्रवृत्तम् । तथापि

---

१३. (क) जयतु संस्कृतम् (ख) सुरभिः (ग) हैमवती ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

तत्कार्यमधुना प्रारम्भ एव वर्तत इति कथयितुं शक्यते । यतो ह्यत्रानुसन्धानस्य कृते गोष्ठीनां विद्वत्संमेलनानामायोजनं प्रायो नाभूत् । येनानुसन्धानवातावरणस्यात्रापर्याप्तता संजाता । अतोऽनुकूलवातावरणाभावोऽयमनुसन्धातॄणां काठिन्यं वर्धयति ।

७. २. इतरसंस्कृतानुसन्धानसंस्थाभिरसम्बन्धः

अस्माकं विश्वविद्यालयस्यान्याध्ययनसंस्थानस्थाः केचन शिक्षका विदेशं गत्वाऽनुसन्धानं व्यदधुर्विदधति च । त्यज्यतां पाश्चात्त्यदेशस्य कथा भारत एवानेकशः संस्कृतानुसन्धानसंस्था वर्तन्ते ।[१४] ताभिः सह प्रायोऽस्माकं परिचयो नास्ति । तत्रत्यानुसन्धानादिकार्याणां ज्ञानमस्माकं नास्ति । एतेनानुसन्धानकार्ये प्रवीणता नाऽऽयाति ।

---

१४. (क) कामरूपानुसन्धानसमितिः- गौहाटी
(ख) विहारानुसन्धानसमितिः- पटना
(ग एशियासमितिः- कलकत्ता
(घ) गङ्गानाथझानुसन्धानसंस्था- प्रयाग
(ङ) विश्वेश्वरानन्दवैदिकानुसन्धानसंस्थानम्- होशियारपुर
(च) गुजरातविद्यासभा- अहमदाबाद
(छ) भारतीयविद्याभवनम्- बम्बई
(ज) एशियासमितिः- बम्बई
(झ) भाण्डारकरप्राच्यानुसन्धानसंस्थानम्- पूना
(ञ) भारतेतिहाससंशोधनमण्डलम्- पूना
(ट) अन्तर्राष्ट्रियप्रज्ञाप्रतिष्ठानं भारतीयासंस्कृतिश्च- देहली
(ठ) आन्ध्रेतिहासिकानुसन्धानसमितिः- राजहमुन्द्री
(ड) सरस्वतीभवनानुसन्धानसंस्थानम्- वाराणसी
(ढ) काशीराजन्यासः- वाराणसी
(ण) कुप्पूस्वामिशास्त्र्यनुसन्धानसंस्थानम्- मद्रास
(त) पौराणिकसमितिः- बङ्गलोर
(थ) सरस्वतीभवनपुस्तकालयः- मैसूर
(द) उत्कलेतिहासिकानुसधानसमितिः- भुवनेश्वर
(ध) अड्यारपुस्तकालयोऽनुसन्धानकेन्द्रं च-तामिलनाडु
(न) मिथिलानालन्दावैशालीसंस्थानम्- विहार
(प) रामवर्मानुसन्धानसंस्थानम्- त्रिचूर (मद्रास)
(फ) प्राच्यसंस्थानम्- बडौदा
(ब) सिन्धियाप्राच्यानुसन्धानम्-
(भ) दक्षिणमहाविद्यालयानुसन्धानसंस्थानम्- पूना
(म) कानडानुसन्धानसंस्थानम्- धारवाड
(य) प्राच्यसंस्थानम्- मैसूर

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

७. ३. संस्कृतशिक्षाक्षेत्रविस्तारसमस्या

अस्माकं संस्कृतेः सभ्यतायाः संरक्षणार्थं राष्ट्रभाषाया विकासार्थं राष्ट्रियैकतां द्रढयितुं च सम्पूर्णेऽधिराज्ये निम्नस्तरत उच्चस्तरपर्यन्तं संस्कृतशिक्षायाः सञ्चालनं विधायाधिराज्ये विस्तारः कर्तव्यः । निम्नस्तरोच्चस्तराध्ययनेषु परस्परानुकूलत्वं परस्परोपकारित्वमपि स्यादित्यप्यभीष्टमेव संस्कृतशिक्षायां वाञ्छितास्थामुत्पादयितुमनुसन्धानकार्यं प्रोत्साहनार्थं च । अतः संस्कृतशिक्षायां वाञ्छिताऽऽस्था कथमुत्पन्ना स्यादित्येका समस्या ।

८. प्रोत्साहनसम्बन्धिन्यौ समस्ये

८. १. शोधकर्तुः प्रोत्साहनोत्पादनसमस्या

अद्यपर्यन्तं संजातानामनुसन्धानक्रियाकलापानामावश्यकतामनुभूयान्यविषयेषु विद्वांसोऽनुसन्धानाय विदेशेषु प्रेषिताः । संस्कृतेऽप्येतत् कार्यमावश्यकम् । अन्यथा विदुषामनुसन्धाने प्रोत्साहो न जायते तत्र शैथिल्यमायाति च ।

८. २. प्रतिभापलायनम्

संस्कृताध्येतारो विद्वांसः संस्कृतक्षेत्रं विहाय क्षेत्रान्तरं गत्वा कार्यं कुर्वन्तो दृश्यन्ते । योग्यानां विदुषां संस्कृतक्षेत्रं विहायान्यत्रगमनेन संस्कृतानुसन्धानक्षेत्रे शैथिल्यमायाति । अतः प्रतिभापलायनं कथं न स्यादिति विचारणीयं वर्तते ।

९. प्रशासनसम्बन्धिन्यौ समस्ये

९. १. संस्कृतज्ञनिरीक्षकाभावः

संस्कृतशिक्षासंस्थानां निरीक्षणार्थं राजकीयसेवासु नियुक्ता जनाः प्रायः संस्कृतस्य पारम्परिकशिक्षाप्रणाल्या अनभिज्ञा भवन्ति । तेन संस्कृतशिक्षासंस्थासु 'कीदृशमध्ययनमध्यापनादिकं कार्यं प्रचलतीति ते सम्यङ् मूल्याङ्कनं कर्तुमक्षमा भवन्ति । समुचितनिरीक्षणनिर्देशनमूल्याङ्कनाभावेन संस्कृतशिक्षा ह्रासोन्मुखी जायते । अस्य प्रभावः स्नातकोत्तरपर्यन्तमागच्छति । तेनानुसन्धानकार्ये शैथिल्यं जायते ।

९. २. पुस्तकालयेषु संस्कृतज्ञप्रशिक्षितकर्मचारिणामपेक्षा

केषुचित् पुस्तकालयेषु संस्कृतपुस्तकानां व्यवस्थापनाय संस्कृतज्ञाः कर्मचारिणः सन्ति । तेषां पुस्तकालयविज्ञानप्रशिक्षणं न संजातम् । कुत्रचिच्च पुस्तकालयस्य कर्मचारिणः संस्कृतानभिज्ञा एव सन्ति । तादृशैः कार्यकर्तृभिः संस्कृतपुस्तकानां

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतानुसन्धानपत्रिकादीनां वाऽनुसन्धातॄणां कृते सम्यङ् निर्देशनं न सम्भवति । एतेनापि संस्कृतानुसन्धानक्षेत्रे वाधोपस्थिता भवति ।

१०. सङ्घटनसम्बन्धिन्यः समस्याः

१०. १. विदुषां सङ्घटनाभावः

संस्कृतवाङ्मयेऽनुसन्धानस्य क्षेत्रमतिविस्तृतं वर्तते ।[१५] वेदेषु पुराणेषु स्मृत्यादिषु च विस्तृताऽनुसन्धानसामग्री वर्तते याऽनुसन्धातारमेपक्षते । एकस्मिन्नेव पुराणे साहित्यं व्याकरणं ज्योतिषं दर्शनं धर्मशास्त्रं विज्ञानमायुर्विज्ञानमादयो विषया विद्यन्ते । तत्र यद्येकमेतादृशं संघटनं भवेत्, यत्र सर्वे सदस्या एकैकं ग्रन्थमादाय तत्रत्यान् विषयान् विवेचयेयुः स्वस्वविषयेऽनुसन्धानमपि कुर्युः । तत्र क्रमश एकैकः सदस्यः स्वग्रन्थविषयान् सर्वेषां पुरतः समुपस्थापयेत् । अन्ये सदस्यास्तद्ग्रन्थविवेचनसमये विषयं चिनुयुः । एवं कृते सति परस्परं भावनेन संस्कृतानुसन्धाने सारल्यमागच्छेदिति सम्भाव्यते । न विद्यते तादृक् संघटनं विदुषां तेनाप्यनुसन्धानकार्यं प्रगतिर्न जायते ।

१०. २. देशान्तरीयैर्विद्वद्भिः सह सम्मेलनस्यापेक्षा

संस्कृतविषयस्यानुसन्धानस्य प्रगत्यै यथासंभवं देशान्तरीयैर्विशेषतो भारतीयैः शर्मण्यदेशीयैश्च विद्वद्भिः सह समये समये सम्मेलनमपेक्षितं वर्तते ।

---

१५. संस्कृतवाङमयस्यानुसन्धानक्षेत्रस्यातिसंक्षिप्तं विवरणमित्थं प्रस्तोतुं शक्यते—

१. वेदः

(क) ऋग्वेदः	संहिता	पदपाठादि	ब्राह्मणानि	आरण्यकानि	श्रौतगृह्यसूत्राणि
(ख) कृष्णयजुर्वेदः	,,	,,	,,	,,	,,
(ग) शुक्लयजुर्वेदः	,,	,,	,,	,,	,,
(घ) सामवेदः	,,	,,	,,	,,	,,
(ङ) अथर्ववेदः	,,	,,	,,	,,	,,

(च) वेदलक्षणस्वरूपादिकम्- शिक्षाप्रातिशाख्यम्, निरुक्तम्, अनुक्रमणी, विधानादिः

(छ) वैदिकाः प्रयोगाः (दर्शपौर्णमासादिपद्धतयः)।

२. उपनिषदः

३. छन्दांसि- वैदिकानि लौकिकानि च नेपालकैः प्रणीता लौकिकच्छन्दोग्रन्थाश्च ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

४. व्याकरणम्– [क] पाणिनीयम् [ख] पाणिनीयेतरव्याकरणानि [ग] प्राकृतव्याकरणानि [घ] नेपालकानां व्याकरणानि । यथा– प्रतिसंस्कृता सिद्धान्तकौमुदी ।

५. ज्यौतिषम्– [क] गणितम् [ख] सिद्धान्तज्यौतिषम् [ग] फलितज्यौतिषम् [घ] ज्यौतिषस्य त्रिष्वेव स्कन्धेषु नेपालकानां कृतयः ।

६. धर्मशास्त्रम्– [क] धर्मसूत्राणि [ख] स्मृतयः [ग] धर्मशास्त्रप्रबन्धा ग्रन्थाः [घ] धर्मशास्त्रे नेपालकानां कृतयश्च । यथा– प्रायश्चित्तप्रदीपः ।

७. कर्मकाण्डम्– कर्मकाण्डेऽस्मद्देशे विशेषेण प्रचलिता अग्निस्थापनादयो ग्रन्थाः सत्कर्मरत्नावली-सदृशाः प्रबन्धग्रन्थाश्च ।

८. इतिहासः– पुराणं महाभारतं रामायणं पुराणान्युपपुराणान्यौपपुराणानि च ।

९. गीता– गीताविषयकाणि भाष्याणि व्याख्यानानि गीतायां नेपालकानां कृतयश्च ।

१०. दर्शनानि– [क] न्यायवैशेषिकदर्शने [ख] सांख्ययोगौ [ग] पूर्वोत्तरमीमांसे [घ] वेदान्तस्य शाङ्कररामानुजमध्ववल्लभरामानन्दादयो भेदाः [ङ] शैवदर्शनम् [च] पाशुपतदर्शनम् [छ] प्रत्यभिज्ञारसेश्वरदर्शने [ज] बौद्धदर्शनम् [झ] सर्वदर्शनम् [ञ] दर्शनक्षेत्रे नेपालकानां कृतयः । यथा– गोरक्षयोगसौरभं जोसमनीसम्प्रदायस्य च ग्रन्थाः ।

११. साहित्यम्– विशेषतो नेपालदेशस्य संस्कृतसाहित्यम् ।
[क] अलङ्कारसाहित्यग्रन्थाः [ख] साहित्यालोचनशास्त्रग्रन्थाः [ग] पद्यकाव्यम् [घ] गद्यकाव्यम् [ङ] नाटकानि [च] चम्पूकाव्यम् [छ] आख्यायिका [ज] सुभाषितम् [झ] उपाख्यानम् ।

१२. स्तोत्राणि– विशेषतो नेपालविषयकस्तोत्राणि । यथा– गण्डकीगौरवम् ।

१३. कोषग्रन्थाः– विशेषतो नेपालदेशे निर्मिताः ।

१४. चतुःषष्टिकलाः– कलासु नेपालकानां कृतयः ।

१५. तन्त्रशास्त्रम्– विशेषेण नेपालदेशस्य तन्त्रशास्त्रम् ।

१६. आयुर्वेदग्रन्थाः– विशेषेण नेपाले निर्मिताः । यथा– औषधरसायनम्, अजीर्णमञ्जरी वाजहोत्रमादयः ।

१७. बौद्धधर्मः– बौद्धदर्शनं बौद्धधर्मस्य शैवदर्शनस्य च नेपाले समन्वयः ।

१८. प्रकीर्णकम् ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

१०. ३. अनुसन्धानविषयचयनसमस्या[१६]

अनुसन्धानार्थं गृहीतस्य विषयस्योन्नतिर्भवेदिति सर्वैरनुभूयते । इदं प्रायो दृश्यतऽन्यत्र यत् केचिदनुसन्धातारः प्रायः सरलं विषयमादाय येन केनापि प्रकारेण शोधं प्रस्तुत्योपाधिं ग्रहीतुं तत्परा भवन्ति । अत्रावश्यका अपि कठिना विषयाः परित्यज्यन्ते, गभीरो विषयो नानुसन्धीयते । कठिनो गभीरश्च विषयश्च केन गृह्येत ? अत्र प्रौढनिर्देशकानामेतादृशं सङ्घटनं स्याद्यत्र सर्वे मिलित्वाऽनुसन्धानविषयस्य निर्णयं कुर्युर्यदेतादृशविषयस्य पूर्वमनुसन्धानं स्यादिति । एतादृशविषयसञ्चयनस्याप्यनुसन्धानक्षेत्रेऽपेक्षा वर्तते ।

उपसंहारः

इत्थं संस्कृतानुसन्धानक्षेत्रे सम्भाविताः काश्चन समस्या अत्रोपस्थापिताः । अस्माकं देशे पूर्वं सर्वमध्ययनाध्यापनं संस्कृतमयमासीत् । पश्चादस्माकं शिक्षापद्धतिः परेषामनुकरणप्रधाना संजाता ।

सर्वत्र शिक्षायामेकरूपतां विधातुं सर्वेषां कृते समानरूपेण शिक्षावसरं प्रदातुं शिक्षितानां जीविकासमस्यामपाकर्तुं राष्ट्रियभावनां देशनरेशभक्तिभावनां च प्रवर्धयितुं राष्ट्रियैकतां द्रढयितुं चास्मद्देशे नवीना राष्ट्रियशिक्षायोजना प्रस्तुता । राष्ट्रियशिक्षायोजनाया उद्देश्यानि सफलीकर्तुं संस्कृताध्ययनमनुसन्धानं चातीव सहायकम् । जननी जन्मभूमिश्च स्वर्गादपि गरीयसीति भावनामुत्पादयितुं सर्वथाऽलमेषा भाषा । किञ्च नेपाल एवाऽनुसंहितानां कालातीतादिदोषरहितानां बहुकाले गतेऽपि गुणोत्कर्षतो प्राप्नुवतां रसभस्मादीनां यथा जीवनारायणीतैलनवरससदृशानां महौषधानामनुसन्धानसमर्थस्य पारम्परिकायुर्वेदशास्त्रस्याध्ययनमनुसन्धानं च तस्य शास्त्रस्य संस्कृतभाषामयत्वादपि संस्कृतक्षेत्रेण विहितं स्यादिति वाञ्छितम् । सा च राष्ट्रियशिक्षायोजनाऽष्टाविंशत्युत्तरद्विसहस्र (२०२८) मितवैक्रमाब्दतः प्रयुक्ता सती वर्तमाने समये सम्पूर्णदेशं व्याप्नोति । अधुना देशे शिक्षकाः समानरूपेण वृत्तिं लभन्ते । तेषां निवृत्तिभरणसञ्चयकोषादीनामपि व्यवस्था जायमाना वर्तते । अस्यां योजनायां संस्कृतस्य कृते पृथक् स्थानं स्थापितमनुसन्धानस्तरपर्यन्तं च तस्यामध्ययनमपि व्यवस्थापितम् । कस्या अपि योजनायाः प्रारम्भकाले तस्यां भविष्यत्यापतन्तीनां समस्यानामनुभवो नैव जायत इति स्वाभाविकमेतत् । अत एव नवीनशिक्षायोजनानां कृतेऽपि प्रयत्ने संस्कृतशिक्षाविकासार्थं काश्चित् समस्या आपतिताः ।

१६. संस्कृतायोगप्रतिवेदनम् (१९५६–१९५७ ई)-- भारतीयशासनमुद्रणालयो देहली ।

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

संस्कृतशिक्षायामपि शिक्षणशुल्कव्यवस्थापनं छात्रशिक्षकानुपातानुसारं शिक्षाव्यवस्थापनं संस्कृतोच्चशिक्षाया माध्यमिकनिम्नशिक्षातः पृथक्करणं संस्कृतानिवार्यत्वस्य निरसनमादयो विषयाः संस्कृतशिक्षायां समस्यारूपाः । परमेतत्संस्थानाधिकारिणां महता प्रयासेन शिक्षणशुल्कच्छात्रानुपातादिसमस्यानां समाधानं सञ्जातमिति परं प्रमोदस्थानम् । किञ्च माध्यमिककक्षासु संस्कृतस्यानिवार्यत्वाय प्रयत्नोऽधुनाऽपि जायमान एव वर्तते । संस्कृतमाध्यमिकविद्यालया अपि संस्कृताध्ययनसंस्थानस्य प्रशासनक्षेत्रान्तर्गता इति सिद्धान्तोऽपि सम्भवतस्तेन संस्कृतशिक्षानीतिनिर्धारणे पाठ्यक्रमनिर्धारणे च सामञ्जस्यं भविष्यतीत्याशां कर्तुं शक्यते । एवमादिभिः प्रयत्नैः संस्कृतशिक्षायामधुना नवीना स्फूर्तिः समागता परमधुनाऽपि संस्कृतक्षेत्रे बह्वीः समस्याः समाधातुमवशिष्टाः ।

सामान्यरूपेणास्माभिर्विविभिन्नप्रकारैरनुभूता नेपालस्य संस्कृतक्षेत्रे सामयिकानुसन्धानकार्ये परिदृष्टाः समस्या अत्रोपस्थापिताः । तासु काश्चन समस्या मुख्याः काश्चन च गौण्यः साधारण्यो वा । विशेषसमस्यानां मध्ये भौतिकसाधनसम्बन्धिन्यः समस्याः शैक्षिकसमस्या अस्य कालस्यार्थप्रधानत्वादार्थिकसमस्याश्च प्रविधिसम्बन्धिन्यः समस्याः कार्यान्वयनसम्बन्धिन्यः समस्या मुख्या विशेषसमस्या वा । अन्या अवशिष्टाः समस्याः साधारण्यो गौण्यो वेत्यस्माकं विचारः । किञ्च प्राचीनलिप्यज्ञानेनाभिलेखालयस्थग्रन्थानामध्ययनस्याशक्यत्वात् प्रौढपाण्डित्याभावेऽनुसन्धानस्यैवाशक्यत्वाच्च प्राचीनलिप्यज्ञानं प्रौढपाण्डित्यसंरक्षणमादयोऽपि साधारणसमस्यारूपेणोपस्थापयितुं शक्यन्ते । अस्मिन् क्षेत्रे बह्व्योऽन्याः समस्या विद्यमाना भवितुं शक्नुवन्ति । अस्माभिस्तु स्वमत्यनुसारमेवोपस्थापिताः । अस्माकमनेन समस्योपस्थापनरूपेण कर्मणा समस्यानां समाधानमुपस्थापयितुं सौकर्यं स्यादिति मन्यामहे । यतो हि प्रवृत्ति प्रतीष्टसाधनताज्ञानं कृतिसाध्यताज्ञानं वा हेतुः । समस्योपस्थापने कृते सत्येवैतत् कार्यं मत्कृतिसाध्यं न वाऽनेन कार्येण मदिष्टसाधनं भविष्यति न वेति निश्चयो जायते । तद् विचार्यैव कृते कार्ये प्रवर्तते । अत एव कस्मिंश्चित् कार्ये पूर्वं तत्रत्याः समस्या एवोपस्थापनीया भवन्ति । तदेवास्माभिर्विहितम् । अत्र बह्व्यस्त्रुटयः सम्भाव्यन्ते, गुणगृह्या विपश्चितो हंसक्षीरन्यायेन दोषानपास्य गुणान् ग्रहिष्यन्तीत्याशास्महे । अतः परं विद्वांस एव प्रमाणम् । धन्यवादाः । शमिति ॥

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

सन्दर्भ-सूची

१. अग्निपुराणम्
२. वाराणसेयसंस्कृतविश्वविद्यालयस्योपकुलपतेर्दीक्षान्तभाषणम् . (२००८)
३. गरुडपुराणम्
४. ग्रिफिथ थम्सन् पु।– अनुसन्धानलेखननिर्देशिका सस्करणं मुद्रितममेरिकायाम् ।
५. नेपालको संविधान (२०२५) १ भाग ३ धारा
६. नेपालानुसन्धानकेन्द्रम्–विकासः फलं भविष्यश्च (१९६०–१९७५) –जर्मनप्राच्यपरिषद् ।
७. डा. भिट्सेल एवं प्रा. सरस्वतीप्रसादघिमिरे द्वयोः संयुक्तप्रतिवेदनम् (२०३४)
८. मत्स्यपुराणम्
९. मनुस्मृतिः
१०. मैक्समूलरः– धर्मस्योत्पत्तिर्विकासश्च (१९७८ प्रकाशितम्)
११. युगेश्वरवर्मा– संस्कृतवस्तुस्थितिरेवं कल्पना – वसुधा (२०३४)
१२. रुद्रराजपाण्डे– दीक्षान्तभाषणं त्रिभुवनविश्वविद्यालये (२०२६)
१३. विष्णुधर्मोत्तरपुराणम्
१४. संयुक्तप्रतिवेदनम् (२०३४) कार्यमूलसमितिः– (मानविक्यध्ययनसंस्थानान्तर्गता)
१५. संस्कृतानुसन्धानदक्षसमितेः प्रतिवेदनम् (२०३५) संयोजक– विद्यानाथ उपाध्यायः
१६. सस्कृतायोगप्रतिवेदनम् (ई. १९५६–१९५७) भारतीयशासनमुद्रणालयो, देहली
१७. योगसूत्रम्

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

परिशिष्टम्

भारतीयमधिशासनम्

संस्कृतायोगः

प्रश्नावली– संवत् २०१३

(नेपालदेशानुसन्धानसमस्यासामान्यादत्रानुसूची प्रस्तूयते ।)

संस्कृत-संशोधनम्–

२३. (क) संस्कृतविद्यासंशोधनार्थं सम्प्रति (१) विश्वविद्यालयेषु (२) तासु तासु संशोधनसंस्थासु (३) तत्राऽऽस्थानीयपीठेषु च या साधनसामग्र्युपलभ्यते, सा पर्याप्तेति भवन्तो मन्यन्ते किम् ? भवत्प्रदेशे विद्यमानां पर्यवस्थितिमन्तरेणास्ति किमपि सविशेषं भवतां विवक्षितम् ?

(ख) अपि सन्ति भवतां प्रदेशे प्रातिस्विकत्वेन व्यवस्थितानि कानिचित् संशोधनपीठानि ? न के तेषामर्थार्जनोपायाः ? तेषां समुचितं प्रवर्तमानकार्यफल-निष्पादनस्य तथैव संशोधनगुणवत्तायाः पर्याप्तत्वस्य परिपालनाय च कानुपायान् भवन्तो निर्दिशेयुः ?

(ग) संस्कृतस्य कृते तदानुषङ्गिकाणां च कृते प्रतिराज्यं संशोधनपीठेन भवितव्यमस्ति वैतद् भवतां मतम् ? एतादृशां प्रादेशिकसंस्कृतसंशोधनपीठानां संविधानं (निर्माण-प्रकारो वा) योजनाकार्यं च किंविधं स्यात् ? ईदृशानां संशोधनपीठानां निर्वाहः किमाश्रयः स्यात् ? एषु संशोधनपीठेष्वाधिशासनिकनियन्त्रणं भवतामभिमतं किम् ?

(घ) संस्कृतस्य संशोधनस्य के प्रधानाः प्रकाराः का वा समुपेक्षिताः सरण्यः सविशेषप्रवर्तनार्हा इति भवन्तो मन्यन्ते ?

(ङ) सामान्येन भारते देशे विशेषेण च तत्रभवतां प्रदेशे संस्कृतसंशोधनार्थं याः पद्धतयोऽनुक्रियन्ते, तासु भवन्मतानुसारेण कीदृशी न्यूनता विद्यते ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

(च) संशोधनफलस्योच्छ्रायणार्थं क उपाया भवद्भिराद्रियेरन् ?

(छ) संस्कृतविद्याविषये ये विविधाः संशोधनात्मका उपक्रमाः प्रवर्त्यन्ते, तेषां सुसन्धानाय किंविधं साधनतन्त्रं भवन्तः शंसेयुः ?

(ज) भवत्प्रदेशे संस्कृतमहाविद्यालयेषु पाठशालासु च संशोधनार्थमस्ति, कोऽप्यवकाशः साधनं सामग्री वा ? यदि वाऽसावपर्याप्ता स्यात्, कानुपायान् तद्विषये भवन्तो निर्दिशेयुः ?

२४. (क) अप्रकाशितानां प्राक्प्रकाशितानां वा ग्रन्थानां सुपरीक्षितानि संस्करणानि, स्वतन्त्रप्रबन्धा व्याख्यात्मिकाः कृतय इत्याद्यात्मकं यत् संस्कृतविषयविहितस्य संशोधनस्य फलितम्, तस्य प्रकाशनाय कीदृशमानुकूल्यं भवतां प्रदेश उपलभ्यते ? अपि भवतां मतेन पर्याप्तं तत् ?

(ख) केन प्रकारेण कियत्प्रमाणे वा केन्द्राधिशासनं राज्याधिशासनानि चेदृशां ग्रन्थानां प्रकाशने साहाय्यं कुर्युः ?

(ग) अप्रकाशितानां महार्हसंस्कृतग्रन्थानां प्रकाशनं कया विधया क्षेपीयं स्यात् ?

(घ) अपि सन्ति भवतां प्रदेशे केचिन्महार्हाः संशोधनात्मका ग्रन्था अप्रकाशिताः साभिप्रकाशिता वाऽवस्थिताः ? अपि विदिता भवतां महार्हाः केऽपि संशोधनात्मका उपक्रमा अयथोचितं संघटिता अपर्याप्तपोषिता वा ?

२५. (क) भवतां प्रदेशे प्रातिस्विकेषु संग्रहेष्ववस्थितानि संस्कृतहस्तलिखितानि यथोचितं परिरक्ष्यन्ते नन्वेकादशसंग्रहाणां स्वामिनः साधारणाश्च जनास्तादृशहस्तलिखितानां महत्त्वं विद्युरित्येतदर्थे कानुपायान् पश्यन्ति भवन्तः ?

(ख) संस्कृतहस्तलिखितानां संचयनं भवत्प्रदेशे सम्यक् संघटिते ननु ?

(ग) भवत्प्रदेशे विद्यमानानां हस्तलिखितालयगतानां संस्कृतहस्तलिखितानां दशा सरक्षणे सूचीप्रणयने च परितोषिणी ननु ?

(घ) अपि च तेषु हस्तलिखितानामुद्धारदानमनुलेखनं छायालेखाऽणुच्छायिकान्यणुच्छायिकवाचनं चैतेषां कर्मणां निवर्तने पर्याप्तमानुकूल्यं वर्तते किम् ?

२६. भवतां प्रदेशे ग्रन्थालयेषु संस्कृतग्रन्थानां संस्कृतहस्तलिखितानां च परिशीलनविषय उद्धारदानविषये वोपलभमानमानुकूल्यं किं रूपं कियत्प्रमाणं वा ?

२७. भारतीयैर्वैदेशिकैश्चाऽऽधुनिकैर्विद्वद्भिः संस्कृतविषये विहितानां संशोधनानां फलानि (१) पारमार्थिकपण्डितानां (२) साधारणजनानां च गोचरतां च नेतुं भवदभिमतेन कान्युपस्करणानि प्रयोक्तव्यानि ?

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

Aspects of Nepalese Culture: Ancient Inscriptions and Modern Yatras

Bernhard Koelver

The purpose of this conference is to enquire into ways and means for furthering the study of Sanskrit in Nepal, Sanskrit being the language which through many centuries, up to the recent past, has been the foremost vehicle of Nepalese thinkers to express themselves. In a sense, the task which lies ahead of us is fairly well outlined: there is the wealth of your manuscripts and inscriptions – and we have met to think about how to put this wealth to use in the process of keeping your indigenous traditions alive, in order to maintain your traditional heritage, to extend knowledge in this field, and thus to further the unity of your nation.

What I should like to take up today is a slightly different aspect of the same field. Though the written word no doubt was the chief medium of your culture, and though -- apart from temples -- this written tradition is its most accessible, and indeed most intriguing manifestation, there are, for the aims we have in mind, other fields quite as important, which yet are widely neglected by scholarship. I am referring to the rites and customs which are observed in the everyday life of your people.

Such customs are often maintained by the unlettered, and for this reason, purists among scholars have deemed them beneath notice, taking them as debased versions of rites the proper and correct forms of which are given in the traditional compendia of such knowledge, the *Srauta*– and *-Grhyatutras*. Well, it is the priviledge of the scholar to describe what he actually sees, without worrying too much about whether his observations exactly conform to an extraneous standard. And if such customs are approached in this attitude, then

Nepal Sanskrit University, Balmeeki Campus, Kathmandu

CC-0. In Public Domain. Digitization by eGangotri.Funding: MIDF

we find they at times contain historical or religious facts which are not accessible from other sources. Thus at an opportunity where we are thinking about the cultural heritage of Nepal, it may be thought useful to give them some consideration.

If I have decided to talk about this aspect, this is in no way meant to disparage the value of more conventional sources: the written testimonials of a tradition will always remain at the core of our endeavours. But when we attempt to survey a field in its entirety, we should perhaps extend our scope to include off-shoots which at times are a most welcome and indeed indispensable supplement to our chief sources.

Ancient and reliable sources for the history of Nepal are none too plentiful. It is a source of great satisfaction to a foreigner as indeed it must be to every Nepali — to see the chief materials, the oldest inscriptions, edited in such a thorough and painstaking manner as has been achieved by Dhanavajra Vajracharya and Hariram Josi — and we all hope the very great amount of work which has been accomplished by your scholars and scholarly institutions like the Itihasa Samsodhana Mandala on the inscriptions of later periods will be collected in a series of parallel volumes. Research in these inscriptions will extend our knowledge of the political, social, and religious history of ancient and mediaeval Nepal.

Among the inscriptions of Nepal, the most interesting group perhaps is the one which stems from Licchavi times. And in this group we find, among others, an edict of Amsuvarman which concerns taxation. This announces there will be officials coming into villages who are given the right to collect certain taxes; they are not permitted, however, to interfere with other matters, as, e. g., jurisdiction.

Of this edict, five copies have been traced until now, located in Patan, Budhanilkantha, Dharmasthali, and Bhaktapur.[1] All of them are chronologically

